THE BOOK WAS DRENCHED

TIGHT BINDING BOOK

UNIVERSAL
LIBRARY
OU_184045
UNIVERSAL
LIBRARY

শুক্লযজুঃপ্রাতিশাখ্যম্।



মহর্ষিকাত্যায়নপ্রণীতম্।

উব্বটকৃতভাষ্যযুতম্।



পণ্ডিতকুলপতিনা

বি, এ উপাধিধারিণা

শ্রীজীবানন্দবিদ্যাসাগরভট্টাচার্য্যেণ

সংস্কৃতং প্রকাশিতঞ্চ।



দ্বিতীয়সংস্করণম্।



কলিকাতানগরে

সরস্বতীযন্ত্রে

মুদ্রিতম্।



ইং ১৮৮৩

প্রকাশক শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথমজুমদারের ষ্ট্রীট্ কলিকাতা।
প্রিণ্টর শ্রীক্ষেত্রমোহনমুখোপাধ্যায়
৫৫ নং আমহার্ষ্ট ষ্ট্রীট্ কলিকাতা।

CHECKED 1950 By SL. Checked 1965

१ धातुपाठ व्याकरणम् २
२ षट्कम् पाणिनीयम् २
३ उणादिसूत्रम् सटीक २
४ अविकल्पद्रुम (धातुपाः) ।०
५ कलापव्याकरणं वा कातन्त्रं २
६ धातुरूपादर्शः १॥०
७ परिभाषेन्दुशेखर सटीक १
८ मुग्धबोधव्याकरणम् सटीक १॥०
९ वाक्यमञ्जरी (वङ्गाक्षरैः) ।०
१० वैयाकरणभूषणसार ॥०
११ लघुकौमुदीव्याकरणम् ॥०
१२ लिङ्गानुशासनं सटीक ।०
१३ शब्दरूपादर्शः ॥०
१४ शब्दार्थरत्नम् ॥०
१५ सारस्वतव्याकरण सटीक पूर्वार्द्धम् १
१६ सारस्वतव्याकरणं सटीक उत्तरार्द्धं २
१७ सिद्धान्तकौमुदी सरलासहिता १०
१८ ऋतुसंहार काव्य सटीक ।/
१९ काव्यसंग्रह मूलमात्र ५
२० काव्यसंग्रह सटीक प्रथमभागः २
२१ काव्यसंग्रह सटीक द्वितीयभागः २
२२ काव्यसंग्रह सटीक तृतीयभागः २
२३ किरातार्जुनीयकाव्य सटीक १॥०
२४ कुमारसम्भवकाव्यपूर्वखण्ड सटीक॥०
२५ कुमारसम्भवकाव्य उत्तरखण्डसटीक॥
२६ गीतगोविन्द काव्य सटीक ॥०
२७ चन्द्रशेखरचम्पूकाव्य २
२८ नलोदय काव्य सटीक ।/
२९ नैषधचरितम् काव्य सम्पूर्ण सटीक५
३० नैषधकाव्य नवमसर्गपर्य्यन्त सटीक२॥
३१ पुष्पबाणविलास काव्य सटीक ॥०
३२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य) ॥०
३३ भट्टिकाव्य टीकात्रयसहित २
३४ मालविकाग्निमित्रकाव्य सटीक ॥०
३५ मालविकाग्निमित्रकाव्य संक्षिप्तटीकासहित ।०
३६ चम्पूरामायणम् सटीक १
३७ (चम्पूरामायणम्) भोजचम्पू ॥०
३८ शतकत्रयम्: ॥०
३९ माधवचम्पूकाव्य ।०
४० मेघदूत मल्लिनाथकृत टीकासहित।/
४१ मेघदूत सटीक सुलभमूल्यकम् /०
४२ रघुवंश काव्य सटीक १॥०
४३ रघुवंश मूलमात्र ७,८,१२ सर्गाः/०
४४ राजप्रशस्ति सटीक /
४५ शिशुपालवधकाव्य सटीक (माघ) २
४६ गद्यकथासरित्सागर सम्पूर्ण ६
४७ कादम्बरी विस्तृतव्याख्यासहिता १
४८ दशकुमारचरितगद्यकाव्य सटीक १
४९ द्वात्रिंशत्पुत्तलिकासिंहासन १
५० पञ्चतन्त्रम् विष्णुशर्मकृत सटीक १
५१ बहुविवाहवाद ।०
५२ वासवदत्ता गद्यकाव्य सटीक १
५३ वेतालपञ्चविंशतिः (सरलगद्य) ॥०
५४ शङ्करविजय १॥०
५५ भोजप्रबन्ध सरल गद्य ॥०
५६ हर्षचरित सटीक बाणभट्टकृत २॥०
५७ हर्षचरितबाणभट्टकृतगद्य १
५८ संस्कृतशिक्षामञ्जरी प्रथमभागः /
५९ संस्कृतशिक्षामञ्जरी द्वितीयभागः ।०
६० संस्कृतशिक्षामञ्जरी तृतीयभागः ॥०
६१ संस्कृतशिक्षामञ्जरी चतुर्थभागः ।०
६२ हितोपदेश सटीक ॥०
६३ अमरकोष ॥०
६४ वाचस्पत्यम् (प्रथमभाग) १००
६५ मेदिनीकोष १
६६ शब्दसोममहानिधिः ८
६७ अनर्घराघवनाटक सटीक [मुरारि]२
६८ अनर्घराघवनाटक मूलमात्र १

७६ उत्तररामचरितनाटक सटीक १
७० कर्पूरमञ्जरीनाटिका सटीक ॥०
७१ चण्डकौशिकनाटक सटीक ॥०
७२ चैतन्यचन्द्रोदयनाटक सटीक २
७३ धनञ्जयविजयनाटक सटीक ।०
७४ नागानन्दनाटक सटीक ॥०
७५ नागानन्दनाटक मूल ।०
७६ प्रबोधचन्द्रोदयनाटक सटीक १
७७ प्रसन्नराघवनाटक जयदेवकृत १
७८ प्रियदर्शिका नाटिका सटीक ॥०
७९ बसन्ततिलक भाण नाटक ।/
८० बालरामायणनाटक सटीक २
८१ विक्रमोर्वशी नाटक (सटीक) १
८२ विद्धशालभञ्जिकानाटिका सटीक॥०
८३ वेणीसंहारनाटक सटीक ॥०
८४ मल्लिकामारुतनाटक सटीक २
८५ महानाटक हनुमन्नाटक सटीक १॥
८६ महानाटकम् (हनुमन्नाटकम्) ॥०
८७ महावीरचरितनाटक सटीक १॥०
८८ महावीरचरितनाटक मूलमात्र ॥०
८९ मालतीमाधवनाटक सटीक ॥०
९० मालविकाग्निमित्रनाटक सटीक १
९१ मुद्राराक्षसनाटक सटीक १
९२ रत्नकटिकनाटक सटीक १॥०
९३ रत्नावलीनाटिका सटीक ॥०
९४ अकुन्तलानाटक सटीक १
९५ काव्यप्रकाश अलङ्कार सटीक ४
९६ काव्यादर्श सटीक (अलङ्कार) १
९७ काव्यदीपिका अलङ्कार सटीक ॥०
९८ कुवलयानन्द अलङ्कार सटीक २
९९ चन्द्रालोक प्राचीन अलङ्कार ।०
१०० दशरूपकम् (अलङ्कार) १
१०१ साहित्यदर्पण सटीक अलङ्कार१॥
१०२ साहित्यदर्पणम् (मूलमात्र) ॥०
दायभाग सटीक २
१०३ काव्यालङ्कारसूत्रवृत्तिवामनकृत ॥०
१०४ वाग्भटालङ्कार ।०
१०५ सरस्वतीकण्ठाभरण सटीक २
१०६ सङ्गीतपारिजात[सङ्गीतशास्त्र]१॥०
१०७ छन्दोमञ्जरी वृत्तरत्नाकर सटीक ॥
१०८ श्रुतबोधः (छन्दोग्रन्थ) सटीक /
१०९ पिङ्गलछन्दः शास्त्र वृत्तिसहित १॥
११० महानिर्वाणतन्त्रम् सटीक ४
१११ शारदातिलक तन्त्रम् २
११२ मन्त्रमहोदधि तन्त्र सटीक २
११३ रुद्रयामल तन्त्र २
११४ इन्द्रजालविद्यासंग्रहः २
११५ कामन्दकी नीतिसारः ॥०
११६ चाणक्यशतकम् सटीक /
११७ शुक्रनीतिसारः सटीक २
११८ गयाश्राद्धादिपद्धतिः १
११९ तुलादानादिपद्धतिः (बङ्गाक्षरैः)४
१२० धर्मशास्त्रसंग्रहः १०
१२१ वीरमित्रोदय (स्मृतिशास्त्र) ५
१२२ मनुसंहिता कुल्लूकभट्टकृत टीका-
सहित २
१२३ वेदान्तदर्शन सभाष्य सटीक ६
१२४ भामती(वेदान्त)वाचस्पतिमिश्रकृत१
१२५ वेदान्तपरिभाषा ॥०
१२६ वेदान्तसार सटीक ॥०
१२७ विवेकचूडामणि वेदान्त /
१२८ पञ्चदशी (सटीक) वेदान्त १॥०
१२९ सिद्धान्तबिन्दुसारः (वेदान्त) ॥०
१३० पूर्णप्रज्ञदर्शनम् सभाष्य ॥०
१३१ सांख्यदर्शन (भाष्यसहित) २
१३२ सांख्यसूत्र अनिरुद्धवृत्तिसहित ॥०
१३३ सांख्यसार ।०
१३४ सांख्यतत्त्वकौमुदी सटीक २
१३५ सांख्यकारिका गौड़पादभाष्य ॥०
आश्वलायनगृह्यसूत्र सभाष्य ३

१२६ मीमांसादर्शनम् भाष्यसहित १२
१२७ मीमांसापरिभाषा ।०
१२८ माण्डिक्यसूत्र सभाष्य ॥०
१२९ जैमिनीय (न्यायमालाविस्तरः) ६
१३० वर्षसंग्रह (खौगाक्षिमीमांसा) ।०
१३१ न्यायदर्शन सभाष्य सवृत्ति २॥०
१३२ भाषापरिच्छेदः मुक्तावली ॥०
१३३ भाषापरिच्छेदमुक्तावली दिनकरी १॥
१३४ शब्दशक्तिप्रकाशिका (न्याय) ॥०
१३५ कुसुमाञ्जलि सटीक (न्याय) ।०
१३६ उपमानचिन्तामणिः ⁄
१३७ आत्मतत्त्वविवेक (बौद्धाधिकार) २
१३८ अनुमानचिन्तामणिः सटीक ४॥
१३९ तर्कामृत (जगदीशकृत) न्याय ।०
१४० तर्कसंग्रह दं अनुवादसहित ॥०
१४१ पातञ्जलदर्शन (सभाष्य सटीक) २
१४२ पातञ्जलदर्शन भोजवृत्तिसहित १
१४३ वैशेषिकदर्शनम् सटीक २
१४४ सर्वदर्शनसंग्रहः [दर्शनशास्त्र] १
१४५ आथर्वणोपनिषद् सभाष्य १
१४६ आरण्यसंहिता सभाष्य ॥०
१४७ ईश केन कठ प्रश्न मुण्ड माण्डूक्य उपनिषद् (सटीक सभाष्य) २
१४८ गायत्री व्याख्या ॥०
१४९ गोपथब्राह्मण (अथर्ववेदस्य) १
१५० छान्दोग्य उपनिषद् सटीक सभाष्य २
१५१ तैत्तिरीय ऐतरेय श्वेताश्वतर सभाष्य २
१५२ दैवत तथा षड्विंशब्राह्मणसभाष्य २
१५३ निरुक्त सभाष्य सटीक १२
१५४ सृष्टिसंहितावली सभाष्य २
१५५ छन्दोरत्नाकर सटीक सभाष्य ७
१५६ मुक्तिकोपनिषत् ⁄
१५७ यजुर्वेदसंहिता सभाष्य ४
१५८ यजुर्वेदस्य प्रातिशाख्य सभाष्य २
१५९ सामवेदसंहिता सभाष्य ४
१६० अग्निपुराणम् २
१६१ अध्यात्मरामायणम् सटीक २
१६२ कल्किपुराणम् १
१६३ गरुडपुराणम् २
१६४ सटीक वाल्मीकिरामायण बालकाण्डम् १
१६५ विष्णुपुराणम् सटीक १
१६६ ब्रह्मवैवर्तपुराण सम्पूर्ण ४
१६७ मत्स्यपुराणम् २
१६८ मार्कण्डेयपुराणम् १॥०
१६९ लिङ्गपुराणम् २
१७० श्रीमद्भगवद्गीता सभाष्य सटीक ४
१७१ अष्टाङ्गहृदय (वाग्भट) वैद्यक ३
१७२ चक्रदत्त (वैद्यक) १॥०
१७३ चरकसंहिता (वैद्यक) सम्पूर्ण ६
१७४ माधवनिदान सटीक १॥०
१७५ भावप्रकाश (वैद्यक) ५
१७६ मदनपालनिघण्टुः (वैद्यक) ॥०
१७७ रसेन्द्रचिन्तामणितथारसरत्नाकर ६
१७८ शार्ङ्गधरसंहिता (वैद्यक) १
१७९ सुश्रुतसंहिता सटीक (वैद्यक) १०
१८० सुश्रुतसंहिता मूलमात्र (वैद्यक) ४
१८१ चिकित्सासारसंग्रह वङ्गसेनकृत ५
१८२ गणिताध्यायः भास्कराचार्यकृत १
१८३ गोलाध्यायः भास्कराचार्यकृत ॥०
१८४ जडसंहिता वा वाराहीसंहिता २
१८५ भावकुतूहल (ज्योतिष) ॥०
१८६ लीलावती भास्कराचार्यरचित ॥०
१८७ बीजगणित भास्कराचार्यरचित ॥०
१८८ सूर्यसिद्धान्त सटीक २

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारकः
श्रीजीवानन्दविद्यासागर-भट्टाचार्यस्य सकाशात् अधीतानि ।



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College, Calcutta.

शुक्लयजुःप्रातिशाख्यम्।



प्रथमोऽध्यायः।

यस्य भृङ्गावलिः कण्ठे स्रुतदानाम्बुपूरिते।
भाति रुद्राक्षमालेव स वः पायाद् गणाधिपः॥ १॥
प्रणम्य परमात्मानं व्याख्यास्ये प्रातिशाख्यकम्।
सरस्वतीं च जगतस्तमोनाशनदीपिकाम्॥ २॥
जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये॥ ३॥

स्वरसंस्कारयोश्छन्दसि नियमः॥ १॥

स्वर उदात्तानुदात्तस्वरितप्रचितलक्षणः। संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षणः। तयोः स्वरसंस्कारयोः छन्दसि विषये नियमोऽधिकृतो वेदितव्यः। प्रतिज्ञासूत्रमेतत् प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था॥

लौकिकानामर्थपूर्वकत्वात्॥ २॥

लोके विदिता लौकिकाः लौकिकानां शब्दानामर्थपूर्वकत्वात्प्रयोजनपूर्वकत्वादस्मिन् शास्त्रे नियमो न क्रियते कथं प्रयोजनपूर्वकत्वम् कथं प्रयोजनपूर्वकाणां शब्दानां नियमो न क्रियते आह देवदत्त गामभ्याज शुक्लां दण्डेनेति यस्य पुरुषस्य देवदत्तकर्तृका गोत्वजात्युपलक्षितशुक्लद्रव्यकर्मिका दण्डकरणिकाऽभ्याजनक्रियाऽभिप्रेता स एवैतद्वाक्यं ब्रवीति। न तत्सर्वः अतोऽर्थपूर्वकत्वं लौकिकानां शब्दानाम् अर्थपूर्वकत्वे

सत्यर्थाभावे नोच्चारणं लौकिकानां शब्दानां, छन्दसि पुनरहरहः स्वाध्यायमधीयीतेति श्रुतिचोदनात् अतः सदाकालं छान्दसानां शब्दानामभ्यासः श्रुत्या विधीयते पुरुषस्याभ्युदयार्थम् अतस्तद्विषय एव स्वरसंस्कारयोर्नियम आरभ्यते न लौकिकानामर्थपूर्वकत्वात् ॥

न समत्वात् ॥ ३ ॥

नकारः प्रतिषेधवाच्युभयत्र सम्बध्यते काकाक्षिवत् न चैतद् यद्वैदिकानां शब्दानां स्वरसंस्कारनियमोऽभ्युदयहेतुः किं तर्हि लौकिकानामपि नियमोऽभ्युदयहेतुरेव कुतः समत्वात् तुल्यत्वाच्छब्दानां य एव वैदिकास्त एव लौकिकास्त एव तेषामर्था इति अतो यदुक्तं वैदिकानामेव स्वरसंस्करणमभ्युदयहेतुरित्येतन्न समत्वात् ॥

स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः ॥ ४ ॥

आम्नायो वेदस्तस्य धर्म आम्नायधर्मः आम्नायधर्मो विद्यते यस्य शब्दग्रामस्य स आम्नायधर्मी तस्य भाव आम्नायधर्मित्वम् तस्मादाम्नायधर्मित्वात् भवेद्वा छन्दसि शब्दानां स्वरसंस्कारनियमोऽभ्युदयाय महते स्याच्छन्दसि नियमो महोदयः कतमत्तदाम्नायधर्मित्वं [illegible] आह आम्नायः क्रियार्थो यज्ञार्थश्च । तद्यथा ब्राह्मणं विध्यर्थवादरूपम् मन्त्रस्तु कर्माङ्गभूतद्रव्यदेवतास्मारकः मन्त्रेण स्मृतं कर्म कर्त्तव्यमिति नियमार्थं वचनम् मन्त्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भवति अथ कर्मासमृद्धिः न केवलं कर्मासमृद्धिः किन्तर्हि दुरिष्टहेतुः प्रत्यवायः स्यात् । उक्तं च मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति दुष्प्रयुक्तमन्त्रविषयो

निन्दार्थवादः तथा स्वाध्यायविषयः फलार्थवादो भवति घृत-कुल्यामधुकुल्याः पितॄन् स्वधा अभिवहन्तीति न तु लौकिक-शब्दविषयमिदं किञ्चिदुपलभ्यते अतः स्वरसंस्कारयोश्छन्दसि नियमो महोदय इति ॥

यत्तन्न ॥ ५ ॥

एवं स्वरसंस्कारौ छन्दसि विषये प्रतिज्ञातौ छन्दोविषये महोदयफलावित्यवधार्य, अधुना शब्दस्वरूपजिज्ञापयिषयेदमाह। यत् न ज्ञायते शब्दस्य कारणभूतं तद् वक्ष्याम इति सूत्रशेषः ॥

वायुः खात् ॥ ६ ॥

वायुः कारणभूतः शब्दस्य स च खादाकाशादुत्पद्यते ॥

शब्दस्तत् ॥ ७ ॥

शब्दस्तदात्मको वायुात्मक इत्यर्थः ॥

सङ्करोप ॥ ८ ॥

यदि वायुात्मकः शब्दः वायोः सर्वगतत्वात् सदाकालं सर्वत्रोपलब्धिः प्राप्नोतीत्याशङ्क्याह। सङ्करोपेति। सम्यक्करणै-रुपहितो हृदि वायुर्वेणुशृङ्गादिभिः शब्दीभवति ॥

ससङ्घातादीन् वाक् ॥ ९ ॥

यो वायुः सम्यक्करणैरुपहितो वेणुशृङ्गादिभिः शब्दीभवति स एव सङ्घातादीन् प्राप्य वाग् भवति सङ्घातः पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते सङ्घातादयः तान् प्राप्य वाग्भ-वति वर्णो भवतीत्यर्थः ॥

त्रीणि स्थानानि ॥ १० ॥

सङ्घातः पुरुषप्रयत्न इत्युक्तम्। अधुना सङ्घात आदिभूतो येषां स्थानादीनां तान्युच्यन्ते त्रीणि स्थानानि वायोर्भवन्ति उरःकण्ठशिरात्मकानि शरीरे॥

द्वे करणे॥ ११॥

संवृतविवृताख्ये वायोर्भवतः॥

शरीरात्॥ १२॥

ये एते करणे संवृतविवृताख्ये यानि च त्रीणि स्थानानि शरीराद्वायोर्निर्मच्छतस्तानि भवन्ति यानि पुनरुपरिष्टाद्-च्यति स्थानकरणानि तानि मुखस्थानानि अत एवमाह शरीरादिति॥

शरीरम्॥ १३॥

एवमेतेन प्रकारेण शरीराद्वायुर्निर्गच्छन् कादिवर्णविशेष-व्यक्तिमापद्यते॥

शारीरे॥ १४॥

किं शरीराद्वायुर्निर्गच्छन्मात्रादिवर्णविशेषव्यक्तिमापद्यते नेत्याह शरीरे शरीरैकदेशे मुखे प्राप्तो वायुस्तालवादिस्थानेषु निषक्तः करणेन विशेषव्यक्तिरूपेण वर्णत्वमापद्यते॥

तेषाꣳ समूहात् स उदयꣳस्त्रैकाल्यम्॥१५॥

तेषां स्थानकरणप्रयत्नानां सम्बन्धिनः समूहात् स उदयन् वायुरुच्चन् त्रैकाल्यमभिधत्ते त्रयः कालाः समाहृताः त्रिकालम् त्रिकालमेव त्रैकाल्यं स्वार्थे ष्यञ्। त्रिकालसम्बद्धमर्थजातं भवद्भूतभविष्यत्सम्बद्धमर्थजातम्। वायुर्वर्णीभूतः पदवाक्यैरभिधत्ते त्रिकालसम्बद्धस्यार्थजातस्य वायुः शब्दरूपेण प्रकाशको भवतीत्यर्थः। वायोरियं विभर्तियाँ त्रयी विद्येति॥

ओङ्कारः स्वाध्यायादौ ॥ १६ ॥

यत्तन्नेत्येवमादिना वायुः पदवाक्यरूपेण सर्वं प्रकाशयतीत्युक्तम्। अधुना स्वाध्यायविधिरुच्यते ओङ्कारः स्वाध्यायादौ कर्त्तव्य इति सूत्रशेषः। तथा चाह मनुः ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्य्यते इति ॥

ओङ्काराथकारौ ॥ १७ ॥

ओङ्कारोच्चारणं स्वाध्यायादौ प्रतिज्ञातमेव तत्तुल्यफलोऽथशब्दोऽपीति सूत्रार्थः। तथा चोक्तम्। ओङ्कारश्चाथकारश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेनेमौ मङ्गलावुभौ ॥

ओङ्कारं वेदेषु ॥ १८ ॥

एवमधस्तनसूत्रेण ओङ्काराथशब्दयोः स्वाध्यायादावविशेषेणोच्चारणमुक्ताऽनेन सूत्रेण व्यवस्था क्रियते ओङ्कारं वेदेषु प्रयुञ्जीतेति सूत्रशेषः ॥

अथकारं भाष्येषु ॥ १९ ॥

भाष्येषु ग्रन्थेषु अथकारं प्रयुञ्जीतेति सूत्रशेषः ॥

प्रयतः ॥ २० ॥

प्रयतः शुचिरुच्यते पादशौचाचमनादिना शुचिरधीयीतेत्यर्थः ॥

शुचौ ॥ २१ ॥

शुचौ विविक्तदेशेऽधीयीत। उक्तञ्च। द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥

दृष्टम् ॥ २२ ॥

अभिरुचितमासनमासीनः ॥

ऋतुं प्राप्य ॥ २३ ॥

हेमन्तमृतुं प्राप्य रात्र्याश्चतुर्थप्रहरेऽधीयीत ॥

योजनान्न परम् ॥ २४ ॥

अधीयानो योजनात् परमध्वानं न गच्छेत् ॥

भोजनं मधुरठ० स्निग्धम् ॥ २५ ॥

मधुररसप्रायं घृतप्रायं चान्नं भुञ्जीत ॥

वर्णदोषविवेकार्थम् ॥ २६ ॥

अकारादयो वर्णाः तेषां दोषाः तेषां विवेचनाय नानाकरणाय तद्यथा त्रिमात्रिकस्य स्वरस्य द्विमात्रता द्विमात्रिकस्य मात्राकालता अनुनासिकस्य स्वरस्यैकदेशरक्तता यथा मह्राइन्द्रइति तथा व्यञ्जनानामनेकप्रकारा दोषाः सम्भवन्ति अयमपि वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति ॥

तिङ्कृत्तद्धितचतुष्टयसमासाः शब्दमयम् ॥२७॥

यत्किञ्चिच्छब्दमयमुपलभ्यते त्रयीलक्षणं तत् तिङ्कृत्तद्धितचतुष्टयसमासाः तिङ खलु आख्यातका भवन्ति पचति पठतीत्येवमादयः। कृतः कर्त्ता कारक इत्येवमादयः। तद्धिताः आग्नेयः सारस्वत इत्येवमादयः। चतुःप्रकाराः समासाः अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहयः। अव्ययीभावो यथा मम भूमि उपरिनाभि। तत्पुरुषो यथा प्रजापतिः वृत्रहा। द्वन्द्वो यथा इन्द्राग्नी मित्रावरुणौ। बहुव्रीहिर्यथा शुक्लबालः सर्वशुक्लबालः ॥

तां वाचमोङ्कारं पृच्छामः ॥ २८ ॥

तिङन्तसहितचतुष्टयसमासलक्षणां तामित्थं भूतां वाचम् ओङ्कारं पृच्छामः ओङ्कारो वाचः पुत्रः स पृष्टः सन् स्वाध्यायादावुच्चारणेन स्वां मातरमर्थतो ग्रन्थतश्च कथयिष्यति अतः स्वाध्यायादौ प्रणवः कार्यः। द्विकर्मा च पृच्छतिर्धातुः। अतो वाक्शब्दे ओङ्कारशब्दे च द्वितीया। माणवकं पन्थानं पृच्छतीति यथा॥

अथ शिक्षा विहिताः॥ २९॥

अथेत्ययं शब्दो विशेषाधिकारार्थः शिक्षाविहिताः स्थानकरणास्यप्रयत्नादयोऽभिधीयन्ते इत उत्तरमधिकारद्वयानुवृत्तिर्द्रष्टव्या। स्वरसंस्कारानुवृत्तिः शिक्षाविहितानुवृत्तिश्च॥

सवनक्रमेणोरःकण्ठभ्रूमध्यानि॥ ३०॥

अधस्तादुक्तं सप्तजातादीन् प्राप्य वाक् तस्यास्त्रीणि स्थानानि। ननु कतमानि तानीत्युक्तम् इह तु शिक्षाप्रक्रमात्तत्पर्यायेणोच्यन्ते सवनक्रमेणोरःकण्ठभ्रूमध्यानि। प्रातःसवनमाध्यन्दिनतृतीयसवनक्रमेण उरःकण्ठभ्रूमध्यानि त्रीणि स्थानानि वायोर्भवन्ति॥

आयाममार्दवाभिघाताः॥ ३१॥

एवमेतेषु स्थानेषु वर्णेषूच्चार्यमाणेषु त्रयो विकाराः शरीरस्य पर्यायेण भवन्ति आयाममार्दवाभिघाताः आयामो नाम ऊर्ध्वगमनं शरीरस्य। मार्दवं नामाधोगमनं गात्राणाम् अभिघातस्तिर्यग्गमनं गात्राणाम्॥

उच्चनीचविशेषः॥ ३२॥

योऽयत्नाभिघातः स्वरितः स उच्चनीचविशेषः उच्चनी-

चाभ्यामभिनिवर्त्यन्ते । एवं शरीरस्य प्रयत्नेन ये नियर्त्यन्ते तेषामुपरिष्टात् संज्ञां वक्ष्यति उच्चैरुदात्त इत्येवमादिना ॥

अथाख्याः समाम्नायाधिकाः प्राग्रिफितात् ॥ ३३ ॥

अथशब्दो मङ्गलार्थः संज्ञाः समाम्नायाधिकाः वर्णसमाम्नायं वक्ष्यति अथातो वर्णसमाम्नायं व्याख्यास्याम इति । तस्मादधिकाः प्राग्रिफितात् रिफितसंशब्दनात्प्राक् वक्ष्यति विसर्जनीयो रिफित इति तस्मात्प्राक् उपलक्षणार्थमेतत् परिभाषाप्यत्र भविष्यति तद्यथा ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् प्रथमग्रहणे वर्गमिति ॥

उपदिष्टा वर्णाः ॥ ३४ ॥

वर्णसमाम्नाये कथिता वर्णाः तद्यथा किंतिखितिगितिघितिङिति कवर्गः अथवा ये पदेषूपदिष्टा वर्णास्त एव प्रत्येतव्याः अन्यद्वचनाद्भविष्यति तद्यथा इषे त्वा अत्र संहितायामपि न वर्णान्यत्वम् वचनात् संहितायां विकारा भविष्यन्ति तांस्तत्रैव वक्ष्यामः । अथवा पदेषु सङ्ख्योपदिष्टा वर्णाः कर्त्तव्याः तद्यथा इषे त्रिवर्णं पदम् । त्वा त्रिवर्णं पदम् । ऊर्जे पञ्चवर्णं पदम् । उक्तं च स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगार्थ एव च । मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे इति ॥

अन्त्याद्वर्णात् पूर्व उपधा ॥ ३५ ॥

अन्ते भवोऽन्त्यो वर्णः ककारादिः अन्त्याद्वर्णात् पूर्व उपधासंज्ञो भवति तद्यथा महान् इन्द्र इति अत्र नकारस्याकार उपधासंज्ञकः । संज्ञाकरणे प्रयोजनं वक्ष्यति अनुनासिकमुपधा प्रागन्तस्थाया इति ॥

निर्देश इतिना ॥ ३६ ॥

वर्णानां निर्देश इतिना भवति तद्यथा कितिखितिगिति-घितिङिति कवर्ग इति ॥

कारेण च ॥ ३७ ॥

कारप्रत्ययेन च वर्णानां निर्देशो भवति तद्यथा यकार-रवकारयोर्जास्त्यै पद इति ॥

अव्यवहितेन व्यञ्जनस्य ॥ ३८ ॥

अकारव्यवहितेन कारप्रत्ययेन व्यञ्जनस्य निर्देशो भवति यथा ककारपकारयोः सकारमिति व्यञ्जनस्येति किम् अकार इकार उकार इति ॥

र एफेन च ॥ ३९ ॥

रः रेफस्य एफेन च निर्दिश्यते यथा रेफठं० स्वरधाविति चशब्दादितिना च यथा यितिरितिलितिविति ॥

स्वरैरपि ॥ ४० ॥

स्वरैरपि व्यञ्जनानां निर्देशो भवति यथा नु चक्रयोः शम् तथयोः समिति ॥

नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मा-नीयाः ॥ ४१ ॥

वक्ष्यति मं इत्यनुस्वारः तथा कुं खुं गुं घुं इति यमाः तथा अः इति विसर्जनीयः। तथा ऽक इति जिह्वामूलीयः। ऽप इत्युपध्मानीयः एते न कारप्रत्ययेन निर्देष्टव्याः यथा अनुस्वारठं० रोमसु मकार इति अनुस्वारस्य स्वशब्देनैव निर्देशः तथा अमभ्यः पञ्चमेषु यमापत्तिर्दोष इति यमस्य स्वशब्देनैवो-

पादानम्। तथा विसर्जनीयस्य विसर्जनीय इति। तथा जिह्वामूलीयोपध्मानीयौ शाकटायन इति॥

दन्त्यस्य मूर्धन्यापत्तिर्नतिः॥ ४२॥

दन्त्यस्य मूर्धन्यभावो नतिरुच्यते तद्यथा परिसिञ्चन्ति परिषिञ्चन्ति संज्ञाकरणे प्रयोजनं स्त्रिति चानतावित्यादि॥

समानस्थानकरणास्यप्रयत्नः सवर्णः॥४३॥

समानमेकं स्थानं करणमास्यप्रयत्नश्च यस्य स एवमुच्यते यो यस्य वर्णस्य समानस्थानः समानकरणः समातमुखप्रयत्नः स तस्य सवर्णसंज्ञो भवति। तद्यथा प्र अर्पयतु प्रार्पयतु तव अयम् तवायठ॰ सोमः स्रुचि इव स्रुचीव घृतम् अभि इन्वताम् अभीन्वतां मुखे अनु उज्जेषम् अनूज्जेषं वाजस्य अनु उज्जयताम् अनूज्जयताम् ऋकारऌकारयोरपि सवर्णदीर्घत्वमेव भवति यद्युदाहरणं छन्दसि लभ्यते सञ्ज्ञाकरणे प्रयोजनं वक्ष्यति। सिठ॰ सवर्णे दीर्घमिति॥

सिमादितोऽष्टौ स्वराणाम्॥ ४४॥

वर्णसमाम्नायस्यादौ अष्टानां स्वराणां सिम् संज्ञा भवति अष्टाविति विभक्तिव्यत्ययेन षष्ठीबहुवचनं द्रष्टव्यं स्वराणामिति सामानाधिकरण्यात् यथा अआइईउऊऋॠ वर्णसमाम्नाये त्रिमात्रा अपि वक्ष्यन्ते इह सन्धौ तु तेषां ग्रहणं न सम्भवति प्रयोजनाभावात् त्रिमात्रान् हि स्वयमेव वक्ष्यति सर्वमम्नाऽइ३ लाजीं३ छाचौ३निति त्रिमात्राणि चेत्यादिना सवर्णदीर्घत्वं च सञ्ज्ञाकरणे प्रयोजनम् न च सवर्णदीर्घत्वमुक्तानां प्लुतानां च सम्भवति अतः प्लुता न गृह्यन्ते। संज्ञाकरणे प्रयोजनं वक्ष्यति सिठ॰ सवर्णे दीर्घमिति॥

सन्ध्यक्षरं परम् ॥ ४५ ॥

स्वराणामित्यनुवर्त्तते स्वराणां यत्परमन्त्यमक्षरं तत्सन्ध्यक्षरसंज्ञं भवति सन्ध्यक्षरमिति जातावेकवचनम् यथा पक्को यव इति सन्ध्यक्षराणि पराणीत्यर्थः तानि चत्वारि द्विमात्राणि गृह्यन्ते न प्लुतान्यपि प्रयोजनाभावात् प्रयोजनार्थं च संज्ञापरिभाषाः क्रियन्ते। अतो द्विमात्राण्येव गृह्यन्ते। न सर्वाणीति। वर्णसमाम्नाये तु सर्वेषां वर्णानां पाठो युक्तरूप एव तत्र हि एतावन्तो वर्णाः सम्भवन्तीत्येतदेव ख्याप्यते अतस्तत्र सर्वेषां पाठो युक्तरूप एवेत्यदोषः इह तु कार्य्यवन्त एवोपदिश्यन्ते। तद्यथा ए ऐ ओ औ संज्ञायाः प्रयोजनं सन्ध्यक्षरमयवायावर्मिति ॥

अकण्ठ्यो भावी ॥ ४६ ॥

स्वराणामित्येव कण्ठ्यौ अकाराकारौ वर्जयित्वा स्वराणां भाविसंज्ञा भवति तद्यथा इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। संज्ञाकरणे प्रयोजनं वक्ष्यति भाव्युपधश्चरिद्विसर्जनीय इति ॥

व्यञ्जनं कादि ॥ ४७ ॥

ककारादि ऊष्मान्तं यद्वर्णजातं तद् व्यञ्जनसंज्ञं भवति क्तिन्तिक्तितिग्तितिघ्तितिङ्तिति इत्यादि अं इत्यनुस्वार एतदन्तम् संज्ञाकरणे प्रयोजनं व्यञ्जनमर्द्धमात्रेत्यादि ॥

अनन्तरठ० संयोगः ॥ ४८ ॥

अनन्तरमव्यवहितं व्यञ्जनं व्यञ्जनेन सह संयोगसंज्ञं भवति तद्यथा पक्वम् क्तिन्तिक्तितिक्तिति अक्षः ग्लिन्तिग्लितिक्लिति

संज्ञाकरणे प्रयोजनं वक्ष्यति स्वरात् संयोगादिर्हि रुच्यते सर्वत्रेति ॥

स्पर्शेष्वेव सङ्ख्या ॥ ४९ ॥

ककारादयः पञ्चवर्गाः पञ्चवर्णाः समाम्नाये स्पर्शसंज्ञा उक्ताः तेषु वर्गेषु संख्या ज्ञातव्या वक्ष्यति असस्थाने मुदि द्वितीयठं० शौनकस्य पञ्चमे पञ्चममिति परिभाषासूत्रमेतत् ॥

द्वौ द्वौ प्रथमौ जित् ॥ ५० ॥

स्पर्शेष्वेव संख्येति परिभाषितमेव अतस्तस्याः परिभाषाया इहोपस्थानम् द्वौ द्वौ प्रथमौ वर्णौ वर्गे वर्गे जित्संज्ञौ यथा। क ख च छ ट ठ त थ प फ संज्ञाकरणे प्रयोजनम् लुङ् मुदि जित्यर इति ॥

ऊष्माणश्च हवर्जम् ॥ ५१ ॥

ऊष्माणश्च जित्संज्ञका भवन्ति। हकारं वर्जयित्वा तद्यथा शषसाः च शब्दात् द्वौ द्वौ प्रथमौ वर्गे वर्गे क ख च छ ट ठ त थ प फ एते त्रयोदशवर्णा जित्संज्ञा वेदितव्याः ॥

मुच्च ॥ ५२ ॥

मुत्संज्ञकाः शषसा भवन्ति च शब्दाज्जित्संज्ञकाश्च शषसेष्वेव मुत्संज्ञा यथा स्यादिति पृथग् योगकरणम्। संज्ञायाः प्रयोजनं लुङ्मुदि जित्यर इति ॥

धिशेषः ॥ ५३ ॥

क्षतसंज्ञकेतरवचनः शेषशब्दः शेषो यो वर्णराशिः स धिसंज्ञो भवति तद्यथा वर्गाणामुत्तराश्चयो यरलवहकारा-श्चेति विंशतिवर्णा धिसंज्ञा भवन्ति संज्ञाकरणे प्रयोजनम् रेफठं० स्वरधाविति ॥

द्वितीयचतुर्थाः सोष्माणः ॥ ५४ ॥

द्वितीयाः ख छ ठ थ फाः श्चतुर्था घ झ ढ ध भाः एते दशवर्णाः सोष्मसंज्ञा भवन्ति इह यासां संज्ञानां शास्त्रे संव्यवहारो नोपलभ्यते पूर्वाचार्यसंज्ञास्ता वेदितव्याः शिष्यसंव्यवहारार्थाः शिष्या आभिः संव्यवहरेयुरिति पूर्वाचार्यसंज्ञानुकथनमस्मिन् शास्त्रे मङ्गलार्थं च पूर्वाचार्यशास्त्रकीर्त्यपरिणामार्थं वा यद्वा यथा एते वर्णा नित्या एवमेता अपि संज्ञा नित्या एव एवं च कृत्वा सर्वशास्त्रेष्वेता एव संज्ञा उपलभ्यन्ते द्वितीयचतुर्थाः सोष्माणः तथा ककारादीनां स्पर्शसंज्ञा तथा यकारादीनामन्तस्थसंज्ञा आभिः संज्ञाभिर्व्यवहरतां धर्मो भवति यद्वा नैव संज्ञा किन्तर्हि वर्णस्वरूपमनेन सूत्रेण कथ्यते ऊष्मा वायुः ऊष्मणा सह वर्त्तन्त इति सोष्माणः अतिशयार्थं वचनं महाप्राणा इत्यर्थः। अत एवैषां संयोगपीडने वायुर्निर्गच्छति तन्निर्द्धारयेत्। यथा। दग्ध्वा दकारो धकारप्रकृतिर्यमः नकार इति संयोगः अत्र धकारप्रकृतित्वात् यमस्य पीडने ऊष्मा निष्क्रामति तं सन्धारयेत् तदात्मकत्वात्तस्य वर्णस्याचार्योऽपि यमस्य स्फोटने दोषं वक्ष्यति ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोष इति, स्फोटनं च ककारवर्गे वा स्पर्शादिति ॥

अमात्रस्वरो ह्रस्वः ॥ ५५ ॥

अकारमात्रस्वरो ह्रस्वसंज्ञो भवति तद्यथा अ इ उ ऋ ऌ संज्ञाकरणे प्रयोजनं वक्ष्यति अनुस्वारो ह्रस्वपूर्वोऽर्धमात्रा पूर्वा चार्द्धमात्रेति ॥

मात्रा च ॥ ५६ ॥

मात्रा च यत्र श्रूयते तत्र अकारकालः मात्रस्वरः प्रत्येतव्यः ह्रस्वो मात्रेति पर्य्यायावित्यर्थः ॥

द्विस्तावान् दीर्घः ॥ ५७ ॥

ह्रस्वात् द्विगुणकालो वर्णो दीर्घसंज्ञो भवति यथा आ ई ऊ ॠ ॡ ए ऐ ओ औ इति संज्ञाकरणे प्रयोजनं दीर्घादर्द्धमात्रा पूर्वा चाध्यर्द्धेति ॥

प्लुतस्त्रिः ॥ ५८ ॥

ह्रस्वत्रिगुणकालः प्लुतसंज्ञो भवतीति यथा आ३ ई३ ऊ३ ॠ३ ॡ३ ए३ ऐ३ ओ३ औ३ संज्ञाकरणे प्रयोजनं प्लुतमितावित्यादि ॥

व्यञ्जनमर्द्धमात्रा ॥ ५९ ॥

कादीनां व्यञ्जनसंज्ञा कृता व्यञ्जनं कादीति अधुना तस्यार्द्धमात्राकालतोच्यते यथा प्राङ् प्रत्यङ् ङकारावर्द्धमात्रौ ॥

तदर्द्धमणु ॥ ६० ॥

अर्द्धमात्रार्द्धमणुसंज्ञं भवति संज्ञाकरणे प्रयोजनम् मात्रार्द्धमात्राणुमात्रावर्णापत्तीनामिति ॥

परमाण्वर्द्धाणुमात्रा ॥ ६१ ॥

अर्द्धाणुमात्रा परमाणुसंज्ञं भवति ॥

स्थाने ॥ ६२ ॥

अधिकरणं वर्णानां स्थानशब्देनोच्यते यदित ऊर्ध्वमनुक्रमिष्यामः स्थाने इत्येवं तदेदितव्यम् अधिकारसूत्रमेतत् ॥

ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात् ॥ ६३ ॥

ह्रस्वस्य वर्णस्य ग्रहणे दीर्घप्लुतावपि वर्णौ गृहीतौ द्रष्टव्यौ परिभाषेयं स्थानाधिकारार्था ॥

प्रथमग्रहणे वर्गम् ॥ ६४ ॥

वर्गादौ प्रथमवर्णग्रहणे वर्गं जानीयात् परिभाषेयम् ॥

ऋ ऽ क्वौ जिह्वामूले ॥ ६५ ॥

ऋऋऋ ३ इति त्रयः जिह्वामूलीयः कवर्ग इत्येते नव वर्णा जिह्वामूलस्थानाः ॥

इचशेयास्तालौ ॥ ६६ ॥

इईई ३ इति त्रयः चवर्गः शकार एकारो यकार इत्येते एकादशवर्णास्तालुस्थानाः ॥

षटौ मूर्द्धनि ॥ ६७ ॥

षकारटवर्ग इत्येते षड्वर्णा मूर्द्धन्या द्रष्टव्याः ॥

रो दन्तमूले ॥ ६८ ॥

रेफो दन्तमूलस्थानः प्रत्येतव्यः ॥

लृलसिता दन्ते ॥ ६९ ॥

लृलृलृ ३ एते त्रयः लकारः सकारस्तवर्ग इत्येते दशवर्णा दन्त्याः ॥

उवोपोपध्मा ओष्ठे ॥ ७० ॥

उऊऊ ३ एते त्रयः वकार ओकार उपध्मानीयः पवर्ग एते एकादशवर्णा औष्ठ्याः ॥

अहविसर्जनीयाः कण्ठे ॥ ७१ ॥

अकारो मात्रिको द्विमात्रिकस्त्रिमात्रिक इत्येते त्रयः हकारविसर्जनीयौ इत्येते पञ्चवर्णाः कण्ठ्याः प्रत्येतव्याः ॥

सवर्णवच्च ॥ ७२ ॥

अहविसर्जनीयाः कण्ठे इति अकारस्य मात्रिकस्य द्विमा-

त्रिकस्य त्रिमात्रिकस्य च कण्ठस्थानता उक्ता यथा कण्ठ्या मध्येनेति समानकरणता त्रयाणामपि आस्यप्रयत्नस्तु भिद्यते कोऽसावास्यप्रयत्नो नाम संवृतता विवृतता च अस्पृष्टता स्पृष्टता च ईषत्स्पृष्टता अर्द्धस्पृष्टता च इत्यास्यप्रयत्नः तद्यथा संवृतास्यप्रयत्नः अकारः विवृतास्यप्रयत्ना इतरे स्वराः यथा अस्पृष्टास्यप्रयत्नाः स्वराः स्पृष्टास्यप्रयत्नाः स्पर्शाः तथा ईषत्स्पृष्टास्यप्रयत्ना अन्तस्थाः अर्द्धस्पृष्टास्यप्रयत्ना ऊष्माणः अनुस्वारश्च त्रयमास्यप्रयत्नः शिक्षाविद्भिरुक्त इह गृह्यते अतोऽकारस्य मात्रिकस्य संवृतास्यप्रयत्नस्य इतरयोश्च विवृतास्यप्रयत्नयोर्हिमात्रिकत्रिमात्रिकयोः सह सावर्ण्यं तुल्यं न सम्भवतीति तदर्थमिदमारभ्यते सवर्णवच्च कार्यं भवति सवर्णदीर्घत्वं भवतीत्यर्थः तद्यथा सोमऽ आभूयो भर, मात्वा अग्निः मात्त्वाग्निर्दध्वनयीत् एवमन्यत्रापि सवर्णवत्कार्यं द्रष्टव्यम् ॥

ऐकारौकारयोः कण्ठ्या पूर्वा मात्रा तालव्योष्ठ्योरुत्तरा ॥ ७३ ॥

ऐकारस्य औकारस्य च कण्ठ्या पूर्वामात्रा अकारमात्रा उभयोरपि पूर्वा उत्तरा प्रथमस्य तालुस्थाना उत्तरा पूर्व एकार इत्यर्थः । तद्यथा अए ऐ इति द्वितीयस्योत्तरा ओष्ठस्थाना द्वितीयस्योत्तरा ओकार इत्यर्थः तद्यथा अओ औ इति । अत्र कैश्चिदाहुः अकारस्यार्द्धमात्रा एकारस्याध्यर्द्धा ऐकारे अकारस्यार्द्धमात्रा ओकारस्याध्यर्द्धा औकारे इति तथा चोक्तम् अर्द्धमात्रा तु कण्ठस्य ऐकारौकारयोर्भवेत् इति । अनेनैव क्रमेण एकारौकारौ व्याख्यातौ ॥

यमानुस्वारनासिक्यानां नासिके ॥ ७४ ॥

चत्वारो यमाः अनुस्वारनासिक्यौ चेति षड्वर्णा नासिकास्थाना इति ॥

मुखनासिकाकरणोऽनुनासिकः ॥ ७५ ॥

मुखसहितया नासिकया क्रियते इति मुखनासिकाकरणः मुखनासिकाकरणो वर्णोऽनुनासिकसंज्ञो भवति जातावेकवचनं स्वराणामयं वैकल्पिको धर्मः अन्तस्थानां रेफवर्जितानां च वाचनिकश्चायं धर्मः तद्यथा अनुनासिकमुपधा प्रागन्तस्थायाः यथा मह्ँा२।ऽइन्द्रः उन्नयामि स्वाँ२॥ऽअहम् ये वा वनस्पतीँ॥रनु अग्ने क्रत्वा क्रतूँ १। रनु अन्तस्थासु भवति वक्ष्यति अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् सँय्यौमि सँव्यपामि तँल्लोकम्पुण्यं प्रज्ञेषमिति इत उत्तरं करणाधिकारो भविष्यति ॥

दन्त्या जिह्वाग्रकरणाः ॥ ७६ ॥

दन्त्या जिह्वाग्रेण क्रियन्ते तद्यथा तथेति ॥

रश्च ॥ ७७ ॥

रेफश्च जिह्वाग्रेण क्रियते अन्यस्थानोऽपि ॥

मूर्द्धन्याः प्रतिवेष्ट्याग्रम् ॥ ७८ ॥

मूर्द्धन्याः षकारटवर्गौ एतौ प्रतिवेष्ट्य जिह्वाग्रेण क्रियन्ते।

तालुस्थाना मध्येन ॥ ७९ ॥

तालुस्थाना इचयिया एते जिह्वामध्येन क्रियन्ते ॥

सम्मानस्थानकरणा नासिक्यौष्ठ्याः ॥ ८० ॥

ङँकारो नासिक्यः स च नासिकास्थानः उवो षोपधा ओष्ठ इत्योष्ठस्थानाः एतेषां यदेव स्थानं तदेवकरणम् ॥

वो दन्त्यैः ॥ ८१ ॥

वकारस्तु ओष्ठ्योऽपि दन्ताग्रैः क्रियते ॥

नासिकामूलेन यमाः ॥ ८२ ॥

यमाश्चत्वारो नासिकामूलेन क्रियन्ते यथा यञ्ञः यँश्च रुक्म इति ॥

जिह्वामूलीयानुस्वारा हनुमूलेन ॥ ८३ ॥

जिह्वामूलस्थाना अनुस्वारश्च हनुमूलेन क्रियते यथा ऋक्सामयोः अर्ठ॰शुना ते अर्ठ॰शुः ॥

कण्ठ्या मध्येन ॥ ८४ ॥

कण्ठ्या वर्णा मध्येन हन्वोरेव क्रियन्ते यथा अह इति ॥

प्रथमोत्तमाः पदान्तीया अच्औ ॥८५॥

एवं तावदधस्तनेन वर्णानां स्थानानि करणानि चोक्तानि आस्यप्रयत्नस्तु जिह्वान्तराद् गृह्यते सवर्णसंज्ञाङ्गभूतत्वात् अधुना पदान्तीयवर्णनिरूपणायाह प्रथमोत्तमाः पदान्तीया भवन्ति चकारञकारौ वर्जयित्वा प्रथमा यथा प्राक् अपाक् विराट् सम्राट् यत् तत् त्रिष्टुप् अनुष्टुप् उत्तमा यथा प्राड् प्रत्यङ् त्रीन् समुद्रान् तं यज्ञम् ॥

विसर्जनीयः ॥ ८६ ॥

विसर्जनीयः पदान्तीयो भवति यथा अग्निः घर्मः ॥

स्वराश्च लृकारवर्जम् ॥ ८७ ॥

स्वराश्च पदान्तीया भवन्ति लृकारं वर्जयित्वा यथा द्यौष्पाय नौष्पाय अश्विना मित्रावरुणा शुचि इन्द्राग्नी मधु अन् हृषाखसू चमू इ विरूपे पृथिव्यै भूम्यै इन्दो अश्विनौ, एतानि स्वरान्तान्युदाहरणानि ॥

णकारर्काराववग्रहे ॥ ८८ ॥

प्रथमोत्तमाः पदान्तीया इत्यनेन णकारः पदान्तीयः प्राप्तः स्वरांश्च लकारवर्जमित्यनेन ऋकारश्च पदान्तीयः प्राप्तः अतस्तावुभौ पदान्तीयावापद्येते अवग्रह एव स्थाप्येते यथा पूषण्वान् वृषण्वसू पिष्टसदनाः पिष्टसदनम् ॥

अनुनासिकाश्चोत्तमाः ॥ ८९ ॥

वर्गोत्तमाः ङञणनमा अनुनासिका भवन्ति। चकारात् स्वकस्थानाद्यपरित्यागद्वारेण नासिकास्थानं द्वितीयमेषामित्यर्थः। वर्णस्वरूपज्ञापनार्थमिदम्। संज्ञार्थमित्यपरे ॥

स्पर्शान्तस्य स्थानकरणविमोक्षः ॥ ९० ॥

स्पर्शान्तस्य पदस्य स्थानकरणविमोक्षः कर्त्तव्यः अन्येन प्रयत्नेनान्यत्पदमारब्धव्यम् अन्यथा पदादेर्द्वित्वं भवति तद्यथा तत् नः, तन्नो मित्रो वरुणः, सं यौमि, सँय्यौमीदमग्नेः ॥

अवसाने च ॥ ९१ ॥

समाप्तौ च अर्द्चर्चादौ स्वरान्तानामपि पदानां स्थानकरणविमोक्षः कर्त्तव्यः यथा संमधुमतीर्मधुमतीभिः पृच्यन्ताम् शुक्रन्दुदुक्षेऽअक्षयः ॥

प्रगृह्यम् ॥ ९२ ॥

प्रगृह्यमित्ययमधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः प्रगृह्यमिति तद्वेदितव्यम् प्रगृह्यसंज्ञायाः प्रयोजनं प्रगृह्याऽ स्वरे इत्यादि ॥

एकारेकारोकारा द्विवचनान्ताः ॥ ९३ ॥

एकारः ईकार ऊकार एते द्विवचनप्रतिपादकाः सन्तः

प्रगृह्यसंज्ञा भवन्ति यथा एकारान्तस्य भवति हे इति शीर्षे इति यथा ऊकारान्तस्य भवति अद्वर्य्यू इति बाह्व इति ॥

ओकारश्च पदान्तेऽनवग्रहः ॥ ९४ ॥

ओकारश्च पदान्ते वर्त्तमानोऽवग्रहवर्जितः प्रगृह्यसंज्ञो भवति यथा अद्रिर्य्योऽद्रिभिः चित्रभानो इति इन्द्रायाहि चित्रभानो सुताः अनवग्रह इति किम् गोय्यच्छमिति गो। य्यच्छम्। गोघातमिति गो। घातम् ॥

उकारोऽपृक्तः ॥ ९५ ॥

उकारोऽपृक्तः प्रगृह्यसंज्ञो भवति। उकारोऽपृक्तो दीर्घमनुनासिकमिति वक्ष्यति एतेनेत्थं रूपं भवति यथा ऊँ मन्वे तवाउ नवा उऽएतत् अपृक्त इति किम् नु इन्द्र योजान्विन्द्रते ॥

चमू अस्मे त्वे ॥ ९६ ॥

चमू अस्मे त्वे एतानि पदानि प्रगृह्यसंज्ञकानि भवन्ति यथा चमू इति चमू सोममिन्द्रचमूसुतम् अस्मे इत्यस्मे इन्द्रोऽअस्मेऽआरात् त्वे इति त्वे बन्धुत्वे रायः ॥

मे उदात्तम् ॥ ९७ ॥

मे इत्येतत्पदमुदात्तं चेत्प्रगृह्यसंज्ञं भवति यथा मे इति मे, मे रायो मा व्वयम् उदात्त इति किं इममग्ने व्वरुण ॥

अमी पदम् ॥ ९८ ॥

अमी इत्येतत्पदं चेत्प्रगृह्यसंज्ञं भवति यथा अमी इत्यमी एष वोऽमी राजा, ये वामी रोचने दिवः, पदमिति किम् पदावयवस्य माभूत् अमीषाञ्चित्तम् ॥

स्वरोऽन्तरम् ॥ ९९ ॥

स्वरोऽक्षरसंज्ञो भवति यथा अइति इइति अक्षरसंज्ञायाः प्रयोजनम् प्रागुवर्णादक्षराणामेकोभाव इति वक्ष्यति। तथा चोक्तम्, सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरमिति॥

सहाद्यैर्व्यञ्जनैः॥ १०० ॥

आद्यैर्व्यञ्जनैः सहितः स्वरोऽक्षरं प्रत्येतव्यम् यथा मो ओकारसहितोऽक्षरं प्रत्येतव्यम् यथा द्रुअ्रब्रः द्रुब्रः चकारो दकाररेफसहितोऽक्षरम्॥

उत्तरैश्चावसितैः॥ १०१ ॥

आद्यैर्व्यञ्जनैः उत्तरैश्चावसानगतैः सहितः स्वरोऽक्षरं यथा वाक् वकारककारसहित आकारोऽक्षरम् प्राङ् पकाररेफङकारसहित आकारोऽक्षरम् एवन्तावद्यद्येकः स्वरो भवति तदधस्तनान्युपरितनानि च व्यञ्जनानि तदङ्गानि भवन्तीत्येतत्प्रतिपादितम्, अधुना स्वरयोर्मध्ये हिप्रभृतीनां व्यञ्जनानामङ्गत्वनिरूपणायाह॥

सँय्योगादिः पूर्वस्य॥ १०२ ॥

सँय्योगादिभूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति यथा अग्ग्रः द्वौ गकारौ वकारश्च सँय्योगः तत्र सँय्योगादिः पूर्वस्येति कृत्वा पूर्वः गकारः पूर्वस्य स्वरस्याङ्गम् उत्तरगकारवकारावुत्तरस्य स्वरस्याङ्गम् यथा ह्व्राम् द्वौ वकारौ यकारश्च सँय्योगः तत्रैको वकारः सँय्योगादिः पूर्वस्येति कृत्वा पूर्वस्याङ्गम् वकारयकारावुत्तरस्य॥

यमश्च॥ १०३ ॥

यमैः पूर्वस्याङ्गं भवति चशब्दात् पूर्ववर्णसहितः यथा वक्क्रम् ककारद्वययममकाराः सँय्योगः तत्र ककारयमौ पूर्वस्य मकार उत्तरस्य॥

क्रमजश्च ॥ १०४ ॥

क्रमाज्जातं क्रमजम् यत्सँय्योगादेः परस्य वर्णस्य द्विरुक्त्या जायते तत् क्रमजमित्युच्यते यथा पार्श्वग्रम् रेफो द्वौ शकारौ वकारो यकारश्च सँय्योगः तत्र रेफः सँय्योगादिः क्रमजश्च प्रथमः शकारः पूर्वाङ्गम्, द्वितीयः शकारो वकारो यकारश्चोत्तराङ्गम् वर्ष्याय रेफो द्वौ षकारौ यकारश्च सँय्योगः तत्र रेफः सँय्योगादिः पूर्वषकारः क्रमज एतौ पूर्वाङ्गम् अपरः षकारो यकारश्चोत्तराङ्गम् ॥

तस्माच्चोत्तरꣳ स्पर्शे ॥ १०५ ॥

तस्मात् क्रमजाद्यदुत्तरं व्यञ्जनं तत्पूर्वाङ्गं भवति स्पर्शे परभूते यथा पार्ष्ण्या रेफषकारौ द्वौ णकारौ यकारश्च सँय्योगः तत्र रेफः संयोगादिरिति कृत्वा षकारः क्रमजमिति कृत्वा तस्माच्चोत्तरꣳ स्पर्शे इति कृत्वा पूर्वणकारश्च एते पूर्वाङ्गम्, द्वितीयणकारो यकारश्चोत्तरस्य स्वरस्याङ्गम् ॥

अवसितं च ॥ १०६ ॥

अवसानगतं पूर्वाङ्गं भवति यथा वाक् ककारोऽवसितः, ऊर्क् अत्र रेफककारयोः संयोगः रेफः संयोगादिः ककारोऽवसितः एतौ पूर्वस्य स्वरस्याङ्गम्, पूर्वाङ्गपराङ्गचिन्तायाः प्रयोजनमाह ॥

व्यञ्जनꣳ स्वरेण सस्वरम् ॥ १०७ ॥

व्यञ्जनं यद्यस्य स्वरस्याङ्गं तत्तेनैव स्वरेण समानस्वरं भवति अधस्तनान्येवोदाहरणानि तथा चोक्तम् स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च। स्वरप्रधानं वैस्वर्यं व्यञ्जनं तेन सस्वरमिति अथ शिक्षा विहिता इत्युपक्रम्य उरःकण्ठभ्रू-

ध्यानि प्रातःसवनमाध्यन्दिनतृतीयसवनेषु यथाक्रमं स्थानानि भवन्तीति प्रतिपादितम् तत एकैकस्मिन् स्थाने वर्णेषु उच्चार्य्यमाणेषु त्रयो विकाराः शरीरस्य भवन्ति पर्य्यायेण ते प्रतिपादिता एव आयाममार्दवाभिघाता इत्यनेन सूत्रेण, अधुना तेषु शरीरविकारेषु सत्सु ये स्वरा निष्पद्यन्ते तान्निरूपणायाह ॥

उच्चैरुदात्तः ॥ १०८ ॥

आयामेनोर्द्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसंज्ञो भवति यथा (८अ० १० कण्डिका) अग्नाऽइ (२२अ० ७ क०) लाजोऽन् उदात्तवानुदात्त इत्येवमादयः ॥

नीचैरनुदात्तः ॥ १०९ ॥

नीचैर्मार्दवेणाधोगमनेन गात्राणां यः स्वरो निष्पद्यते सोऽनुदात्तसंज्ञो भवति (२१ अ० ६१ क०) यथा आर्षेयऽऋषीणाम् अनुदात्तप्रदेशाः उदात्तानुदात्तठ० स्वरितमित्येवमादयः ॥

उभयवान्तस्वरितः ॥ ११० ॥

उदात्तस्योर्द्ध्वगमनं गात्राणां प्रयत्न अनुदात्तस्याधोगमनं गात्राणां प्रयत्न आभ्यां प्रयत्नाभ्यां समाहारीभूताभ्यां यः स्वर उच्चार्य्यते स स्वरितसंज्ञो भवति यथा (१अ० २० क०) धान्यमसि (१अ० १२क०) वैष्णव्यौ स्थः ॥

एकपदे नीचपूर्वः सयवो जात्यः ॥ १११ ॥

एकस्मिन् पदे नीचपूर्वोऽनुदात्तपूर्वो यकारेण वकारेण सहितो जात्यः स्वरः प्रत्येतव्यः नीचपूर्व इति सम्भवव्यभिचारिविशेषणम्। अपूर्वोऽपि भवति नीचपूर्वो यथा (१७अ० ९७क०)

कन्या इव (१अ० २०क०) धान्यमसि । अपूर्वा (१८अ० ६४क०) यथा स्वर्देवेषु ॥

उदात्तादयः परे सप्त ॥ ११२ ॥

उदात्तादयः परे सप्त स्वराः प्रत्येतव्या यथा अभिनिहित, क्षैप्र, प्रश्लिष्ट, तैरोव्यञ्जन, तैरोविराम, पादवृत्त, तार्याभाव्याः ॥

त्रयो नीचस्वरपराः ॥ ११३ ॥

त्रयो नीचस्वरपरा ज्ञेयाः अभिनिहित, क्षैप्र, प्रश्लिष्टाः ॥

एदोद्भ्यामकारो लुगभिनिहितः ॥११४॥

एकारोकाराभ्यामुदात्ताभ्यामकारोऽनुदात्तो यत्र लुक् लुप्यते तत्राभिनिहितः स्वरो भवति यथा एकारस्य भवति, (२४अ० ३७क०) ते अप्सरसाम् तेऽप्सरसाम्, (१९अ० ५८क०) ते अवन्तु तेवन्त्वस्मान् ओकारस्य भवति यथा (२अ० २१क०) वेदः) असि वेदोसि, (५अ० ३१क०) तुथः) असि तुथोऽसि ॥

युवर्णौ यवौ क्षैप्रः ॥ ११५ ॥

ह्रस्व उस्व यू युवर्णौ उदात्तावनुदात्तस्वरोदयौ यकारवकाराभ्यां यथासंख्येन युक्तौ यदा तदा क्षैप्रसंज्ञः स्वरो भवति इवर्णस्य यथा (३ अ० ६० क०) त्रि अम्बकम् त्र्यम्बकँ यजामहे, (११ अ० ४४ क०) वाजो अर्वन् आशुर्भव वाज्यर्वन् उवर्णस्य यथा (३ अ० ५१ क०) नु इन्द्र योजान्विन्द्र ते हरी, (११ अ० ७० क०) द्रु अत्रः द्रवः सर्पिः) ॥

इवर्ण उभयतो ह्रस्वः प्रश्लिष्टः ॥ ११६ ॥

पूर्वो ह्रस्व इकार उदात्तः परश्च ह्रस्व इकारोऽनुदात्तस्तयोः परस्परप्रश्लिष्टे प्रश्लिष्टः स्वरो भवति यथा (११ अ० ६१ क०)

अभि इन्धताम् अभीन्धताम्, (२० अ० ७० क०) सुचि इव सुचीव घृतम् ॥

स्वरो व्यञ्जनयुतस्तैरो व्यञ्जनः ॥ ११७ ॥

उदात्तात् पूर्वस्मात् परो यः स्वरो व्यञ्जनयुतः स तैरो व्यञ्जनसंज्ञकः स्वरो भवति यथा (८ अ० ४३ क०) इडे रन्ते हव्ये काम्ये ॥

उदवग्रहस्तैरो विरामः ॥ ११८ ॥

उदात्तावग्रहस्तैरो विरामसंज्ञकः स्वरो भवति अयं च समस्तपदेषु भवति अवग्रहवचनात् अवग्रहाभावे तु तैरो व्यञ्जन एव यथा (१ अ० १ क०) गोपतावितिं गो। पतौ यज्ञपतिमितिं यज्ञपतिम् ॥

विवृत्तिलक्षणः पादवृत्तः ॥ ११९ ॥

स्वरयोरन्तरयोरन्तरं विवृत्तिरुच्यते तया लक्ष्यत इति विवृत्तिलक्षणः स पादवृत्तसंज्ञः स्वरो भवति विवृत्त्या व्यवहित इत्यर्थः। यथा (२ अ० ६ क०) ध्रुवाऽअसदन्नृतस्य (२३ अ० ५५ क०) का ईम् काऽइमरे पिशङ्गिला ॥

उदाद्यन्तोन्यवग्रहस्ताथाभाव्यः ॥ १२० ॥

उदात्तादिरुदात्तान्तो नीचावग्रहस्ताथाभाव्यसंज्ञः स्वरो भवति यथा (५ अ० ५ क०) तन्नपत्रऽइतिं तन्। नप्त्रे (२१ अ० १० क०) तन्नपादितिं तन। नपात् अयं तु स्वरितानां मध्ये पठ्यते नत्विह माध्यन्दिनानां स्वरित उपलभ्यते उदात्तानुदात्तौ तु पृथग्भूतावुपलभ्येते स्वरितश्चोदात्तानुदात्तयोरेकीभावे सति तस्मिँश्च तिर्य्यग्गमनं गात्राणां भवति न च तदिह किञ्चिदुपलभ्यते अतो माध्यन्दिनानां पदकाले

ताथाभाव्यसंज्ञकः कम्पो भवति तथा चोक्तमौज्जिहायनकैर्माध्यन्दिनमतानुसारिभिः । अवग्रहो यदा नीच उच्चयोर्मध्यतः क्वचित् । तथाभाव्यो भवेत् कम्पस्तनूनप्त्रे निदर्शनम् यस्तु ताथाभाव्यस्य स्वरितानां मध्ये पाठः अयमन्येषामाचार्य्याणां मतेन तेषां हि मतेन तनूशब्दः संहितावङ्गवति अतोऽसौ स्वरितो भवति तदभिप्रायेण स्वरितानां मध्ये पाठः अयमपि चोपरिष्टाद्वक्ष्यति, निहितमुदात्तस्वरितपरमनवग्रहे, स्वरितस्य चोत्तरो देशः प्रणिहन्यत इति तदभिप्रायेण वक्ष्यति, एवमुदात्तानुदात्तस्वरितलक्षणविधानानन्तरं हस्तलक्षणमाह ॥

हस्तेन ते ॥ १२१ ॥

अनेन प्रकारेण हस्तेन ते स्वराः प्रदृश्यन्ते तत्रोदात्ते ऊर्ध्वगमनं हस्तस्य अनुदात्तेऽधोगमनं हस्तस्य एतत्सर्वेषामाचार्य्याणां मतेन स्थितं, स्वरिते तु विप्रतिपद्यन्ते तत्प्रकाशनार्थमिदमाह ॥

चत्वार स्तिर्य्यक्स्वरिताः ॥ १२२ ॥

जात्याभिनिहितत्रैप्रश्लिष्टा एते चत्वारस्तिर्य्यग्घस्तं कृत्वा स्वरणीयाः पिप्लदानवद्धस्तं कृत्वेत्यर्थः ॥

अनुदात्तं चेत्पूर्वं तिर्य्यङ् निहत्य काण्वस्य ॥ १२३ ॥

एतेषां चतुर्णां जात्यादीनां यद्यनुदात्तं पूर्वं भवति तदा तिर्य्यग्घस्तं कृत्वा स्वरयितव्याः काण्वाचार्य्यस्य मतेन उदात्तपूर्वे अपूर्वे च न भवति अनुदात्तपूर्वो यथा (१अ० १२क०) वैष्णव्यौ (१अ० २०क०) धान्यमसि (५अ० ३१क०) स्तुपोसि (२अ० २१क०) वेदोसि (१७अ० १८क०) अभ्यर्षत (३अ० ५१क०)

योजान्विन्द्र ते (११अ० ६१क०) अभीन्धतामुखे (२०अ० ७६क०) स्रुचीव घृतम् एतेषु तिर्यग्घस्तः क्रियते उदात्तपूर्वेष्वपूर्वेषु च जात्यादिषु तैरो व्यञ्जनवद्धस्तः क्रियते उदात्तपूर्वो भवति यथा (१४अ० २३क०) पञ्चदशो व्योम (३१अ० १०क०) कतिधा व्यकल्पयन् अपूर्वो भवति (३अ० ६०क०) यथा त्र्यम्बकम् (११अ० ७०क०) द्व्यन्नः सर्पिरासुतिः॥

ऋजुन्निहत्य प्रणिहन्यते उदात्ते ॥ १२४ ॥

ऋजुन्निहत्य हस्तमनुदात्तवत् ततः प्रकर्षेण निहन्यते नीचीक्रियते जात्याभिनिहितचैप्रप्रश्लिष्टा उदात्ते परभूते यथा (३अ० १क०) भूर्भुवः स्वर्द्यौरिव (१अ० १०क०) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम् (१७अ० १६क०) यासद्विश्-ख्यत्रिणम् (२०अ० ६८क०) स्रुचीवेति उदात्त इति कस्मात् (१अ० २०) धान्यमसि धिनुहि देवान् (१अ० १२क०) पवित्रे स्थो वैष्णव्यौ॥

तीक्ष्णोऽभिनिहितः परम्परमृदुस्त्वन्यः ॥१२५॥

तीक्ष्ण उच्चारणतो हस्तेन चाभिनिहितः स्वरो भवति ततोऽन्यो मृदुप्रयत्नो भवति किमविशेषेणेत्याह परम्परम् शब्दोऽयम् पूर्वमपेक्ष्य परः परमपेक्ष्य पर इत्येवम् यथा अभिनिहितमपेक्ष्य चैप्रः चैप्रमपेक्ष्य प्रश्लिष्टः चैप्रे जात्यस्यान्तर्भावो द्रष्टव्यः तथा चोक्तम् सर्वतीक्ष्णोऽभिनिहितः प्रश्लिष्टस्तदनन्तरम्। ततो मृदुतरौ स्वारौ जात्यचैप्रावुभौ स्मृतौ १ ततो मृदुतरः स्वारस्तैरो व्यञ्जन उच्यते। पादवृत्तो मृदुतमस्त्वेतत् स्वरबलाबलमिति २॥

तस्यादित उदात्तꣳ स्वरार्द्धमात्रम् ॥१२६॥

स्वरितस्य स्वरस्यादावुदात्तं ज्ञातव्यं तच्च स्वरार्द्धमात्रा-

कालम् यद्येकमात्रो यदि द्विमात्रो यदि त्रिमात्रः स्वरस्तथाप्यर्द्धमुदात्तं परमनुदात्तं अयं तु स्वरिते उदात्तानुदात्तप्रविभागो द्रष्टव्यः स्वरितशब्दे नोदात्तानुदात्तं निर्वर्त्य पृथक् श्रुतिस्वरान्तरमभिधीयते यथा त्रपुताम्रयोः संयोगे धात्वन्तरस्य कांस्यस्योत्पत्तिः यथा च गुडदध्नोरेकीभावे मार्जिकोत्पत्तिः एवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः ॥

सप्त ॥ १२७ ॥

सामसु सप्तस्वरानाहुः षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादान् ननु यजुर्वेदलक्षणप्रक्रमे एवं उदात्तानुदात्तसंयोगे स्वरितोत्पत्तौ कः सामलक्षणप्रसङ्ग उच्यते अग्नौ यजुर्वेदे अध्वर्योः सामगानं विहितम् । नान्योऽध्वर्योर्गायेदिष्टका वा एता विहितचितो ह्यस्याद्यदन्योऽध्वर्योर्गायेत् इति ब्रा० २ । शतपथे ८ सञ्चितिकाण्डे, अतोऽध्वर्युकर्तृकमिति कृत्वा कश्चिल्लक्षणांशः कृतः सामसु, अपरे त्वाहुः जात्याभिनिहितत्वैप्रश्लिष्टतैरोव्यञ्जनतैरोविरामपादवृत्ताः सप्तस्वरा अत्रावधार्यन्ते तथाभाव्यस्तु वाजसनेयिनां निवार्यते ॥

त्रीन् ॥ १२८ ॥

उदात्तानुदात्तस्वरितान् यजुर्वेदे त्रीन् स्वरानाहुः, तथा च उक्ता एव सन्तोऽनूद्यन्ते एवेदानीमपवादार्थम् ॥

द्वौ ॥ १२९ ॥

किमविशेषेण यजुर्वेदे त्रीन् स्वरानाहुः नेत्युच्यते द्वौ स्वरावुदात्तानुदात्तौ भाषितलक्षितौ शतपथब्राह्मणे आहुः पारिशेष्यान्मन्त्रेषु वैस्वर्यम् ॥

एकम् ॥ १३० ॥

तानंलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि ॥

सामजपव्यूँखवर्जम् ॥ १३१ ॥

प्रगीतं मन्त्रवाक्यं सामशब्देनोच्यते विश्वे देवाः शृणुतेति जपः, व्यूँखो बह्वृचि प्रसिद्धः एतानि वर्जयित्वा यज्ञकर्मण्येकः स्वरो भवति तानलक्षणः ॥

प्रावचनो वा यजुषि ॥ १३२ ॥

प्रवचनशब्देनार्षपाठ उच्यते तत्र भवः स्वरः प्रावचनः स च यजुषि भवति वा तान इति विकल्पः स च तैस्वर्यलक्षण एव भवति प्रगृह्यं चर्चायामितिना पदेष्वित्यनेनैकस्मात् पर आर्ष इति ॥

तमितिविकारः ॥ १३३ ॥

तमित्युत्सृष्टसर्वनामका द्वितीया विभक्तिर्गृह्यते द्वितीयया यो निर्दिश्यते स विकारः प्रत्येतव्यः। यथा अनुस्वारठ० रोषसु मकार इति मकारोऽनुस्वारविकारमापद्यते भाविभ्यः स षठ० समानपद इति मकारः षकारविकारमापद्यते ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ १३४ ॥

तस्मिन्निति सप्तम्यन्तं परिगृह्यते सप्तम्या निर्दिष्टे पूर्वस्य कार्यं वेदितव्यम् पूर्वस्य पदान्तस्य विधिः प्रत्येतव्यः यथा ककारपकारयोः सकारमिति तथयोः समिति ॥

तस्मादित्युत्तरस्यादेः ॥ १३५ ॥

तस्मादिति पञ्चमी निर्दिष्टात्परस्य कार्यं वेदितव्यम् यथा उकारात्तु, परेः सिञ्चतेः ॥

षष्ठीस्थाने योगा ॥ १३६ ॥

षष्ठी विभक्तिस्थाने योगिनी वेदितव्या षष्ठ्यन्तस्य कार्यं भवतीत्यर्थः यथा यवयोः पदान्तयोः स्वरमध्ये लोपः ऐकारौकारयोः कण्ठ्यापूर्वामात्रा तालव्योष्ठयोरुत्तरा इति ॥

तेनेत्यागमः ॥ १३७ ॥

तेनेति तृतीयाग्रहणम् तृतीयया यो निर्दिश्यते स आगमः प्रत्येतव्यः यथा ङ्नौ त्साभ्याꣳ सकार इति प्रगृह्यं चर्चायामितिना पदेषु ॥

अन्तरेण पर्वणी ॥ १३८ ॥

पर्वशब्देन पदमुच्यते पदयोर्मध्ये आगमो भवति यथा प्राङ्सोमः (१०अ० ३१क०) प्राङ्क्सोमः प्रत्यङ्सोमः (१८अ० ३क०) प्रत्यङ्क्सोमः त्रीन् समुद्रान् (१३अ० ३०क०) त्रीन्त्समुद्रान् अस्मान् सीते (१२अ० ७०क०) अस्मान्त्सीते ॥

पर एकस्मात् ॥ १३९ ॥

एकस्य पदस्य मध्ये य आगमो विधीयते स परो भवति यथा (१७अ० १३क०) द्वे इति शौर्षे इति प्रगृह्यं चर्चायामितिना पदेष्वित्यनेनैकस्मात् पदात् पर इतिकार आगमो विधीयते इति ॥

उभयोर्विकारः ॥ १४० ॥

द्वितीयया निर्दिष्टो विकार इत्यधस्तादुक्तम्। स उभयोर्भवति अन्तरेण पर्वणी च पदान्तपदाद्योरित्यर्थः एकस्य वा वर्णस्य निर्दिश्यते यथा आ इदम् (४अ० १क०) एदम् इह ऊर्जम् (१८अ० ६३क०) इहोर्जन्दधातन एकवर्णस्य भवति यथा मो षु नः (३अ० ४६क०) 'मोषूण इन्द्रात्र' सुसाव (१८अ० २क०) सुषाव सोमम् ॥

वर्णस्यादर्शनं लोपः ॥ १४१ ॥

दृश्यिरुपलब्धिवचनः। अनुपलब्धिरदर्शनं वर्णस्य लोप इत्युच्यते वक्ष्यति "लोपं धौ" यथा अयक्ष्माः मा (४अ० १२क०) अयक्ष्मामा वस्तेनः, मत्याः नः (२अ० १०क०) मत्या नः-सन्त्वाशिषः ॥

विकारी यथासन्नम् ॥ १४२ ॥

विकारोऽस्यास्तीति विकारी विकारी वर्णोऽवचने यथासन्नम् यो य आसन्नस्तमापद्यते वक्ष्यति स्वरे भाव्यन्तस्थाम् यथा त्रि अम्बकम् त्र्यम्बकम् द्व्यन्नः द्व्नः वचनादन्यदपि भवति यथा अनमो वाहौ सकारो डकारमिति अनड्वान् वचनात् सकारस्य डकारः। परिभाषासूत्रमेतत् ॥

सङ्घातानामनूद्देशो यथासङ्ख्यम् ॥ १४३ ॥

समानसंख्यानां यः पश्चादुद्देशः स यथासंख्यम् भवति यस्य या संख्या प्रथमस्य प्रथमः द्वितीयस्य द्वितीयः तृतीयस्य तृतीय इत्यर्थः। वक्ष्यति सदो द्यौर्नमस्कृतं पिता पथेषु यथा (१९अ० १८क०) सदः कृतम् सदस्कृतम् (१३अ० ६क०) तेभ्यः सर्पेभ्यो नमः (२अ० ११क०) "द्यौः पिता" द्यौष्पितोपमाम् (१८अ० ५१क०) नमः पथे, शर्म सप्रथा नमस्पथे परिभाषासूत्रमेतत् ॥

सन्निकृष्टविप्रकृष्टयोः सन्निकृष्टस्य ॥ १४४ ॥

यत्रोदाहरणसंशयः तत्रेयं परिभाषोच्यते सन्निकृष्टविप्रकृष्टयोरुदाहरणयोः सन्निकृष्टस्यैवोदाहरणस्य कार्यं प्रत्येतव्यम् न तु विप्रकृष्टस्य यथा असि शिवा सुषदेत्येवमादिषु परभूतेषु असि शब्द आद्युदात्त उक्तः तत्र सन्देहः किं सुच्छा चासि शिवा चासि शोना चासि सुषदेत्यत्रासि शब्द आदु-

दात्तो भवति उत स्योना चासि सुषदेति उभयोरप्यसि शब्दः परभूतः तत्रानेनावधारणं क्रियते यत्रान्यत्रापि सन्निकृष्टानि पदानि भवन्ति तत्र कार्य्यं भवति तद्यथा असि शिवा सुषदा पयस्वतीत्यत्र परस्वतीसन्निधानात् सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदेत्ययमेवाद्युदात्तो भवति न तु स्योनासुषदेति विप्रकृष्टत्वात् ॥

पूर्वोत्तरयोरुत्तरस्य ॥ १४५ ॥

यत्र पूर्वस्योत्तरस्य च युगपत्कार्य्यं प्राप्नोति तत्रोत्तरस्यैव भवति न तु पूर्वस्य मृग्यमुदाहरणम् (२१अ० ६१क०) आ च गासस्वा च अत्र स्वरितोकार उदात्तः तत्र युगपत्कार्य्यमुभयोः सन्धावुदात्त एव स्वरविषयकं चैतत् सूत्रम् ॥

द्विरुक्तमाम्रेडितं पदम् ॥ १४६ ॥

द्विरभ्यस्तं पदमाम्रेडितसंज्ञं भवति यथा (२७अ० ४२क०) अग्नायेऽग्नावोऽग्नये, तत्र आम्रेडितसंज्ञायाः प्रयोजनम् आम्रेडितं चोत्तरमित्यादि ॥

सठं०हितꣳ स्थितोपस्थितम् ॥ १४७ ॥

इत उत्तरं पदसंहिता वर्त्तिष्यते द्विरुक्तमित्यनुवर्त्तते। द्विरुक्तं यत्पदमिति करणेन मध्यस्थितेन आद्यन्तसंहितेन पूर्वमादिसंहितमुत्तरपदमन्तसंहितं स्थितोपस्थितसंज्ञं भवति यथा (१७अ० ८३क०) हे, इति हे, (१७अ० ८३क०) शीर्षे इति शीर्षे, (४अ० १५क०) पुनरिति पुनः। (१अ० ८क०) वक्षितमिति वक्षि। तम्। (१अ० ८क०) सक्षितमिति सक्षि। तम्। (१अ० ८क०) पप्रितमिति पप्रि। तम्। तथा चोक्तम्। उपस्थितं सेतिकारं केवलं तु पदं स्थितम्। तत्स्थितोपस्थितनाम यत्रोभे आह संहिते। १। अस्यार्थः। इतिकर-

णसहितमुपस्थितसंज्ञं पदं भवति। केवलमितिकरणसहितं स्थितसंज्ञं भवति यत्र पदान्तपदादी इतिकरणेन संहितौ आह। तत्स्थितोपस्थितपदमुच्यते। स्थितोपस्थितप्रदेशाः। पूर्वोत्तरसंहितस्य स्थितोपस्थितमवग्रह्यस्येति स्थितोपस्थितस्यैव सावग्रहस्य स्वरविशेषविधानार्थमाह॥

सर्व॰हितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम्॥ १४८॥

अवग्रहशब्देन सावग्रहस्य पदस्य पूर्वपदमभिधीयते। अवग्रहः स्वरविधौ स्वरचिन्तायां संहितावत्स्वरं लभते। इतिकरणेन सह सन्धौ तस्मिंश्च सावग्रहे पदे इ भवतः तत्र पूर्वपदं तावदितिकरणेन सह सन्धौ संहितावत्स्वरं लभते। परं च अवग्रहात् परं पदं संहितावत्स्वरं लभते। यदि तत्सर्वमनुदात्तं भवति। यदि स्वतन्त्रं किञ्चिदक्षरमुदात्तं वा स्वरितं वा भवति। तदा स्वकीयया प्रकृत्या भवति। यथा वाङ्क्तमिति वाङ्क्। तम्। गृहपतऽइति गृह। पते। प्रजावतोरिति प्रजा। वतीः। परं च सर्वञ्चेदनुदात्तमिति कस्मात् ऊर्णामृदेणेत्यूर्णा। मृदेण। विकुरुचुरिति वि। कुरुचुः। द्रोणकलशऽइति द्रोण। कलशः। उदात्तोदाहरणम्, राजस्वऽइति राज। स्वः। स्वरितपदोदाहरणम्, स्वरविधाविति किम्। वर्णविधौ संहितावन्न भवति। महद्ब्रह्मऽइति महत्। भ्यः। तिष्ठद्ब्रह्मऽइति तिष्ठत्। भ्यः। (१६अ॰ २३क॰) धावद्ब्रह्मऽइति धावत्। भ्यः॥

इति परस्तिर्यङ्नीचोऽन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा॥ १४९॥

इति परस्तिर्यङ्नीचो भवति अनुदात्तो भवतीत्यर्थः।

अन्तोदात्ते मध्योदात्ते वा पदे वा शब्दो भिन्नक्रमो विकल्पार्थः । काण्वस्याचार्यस्य मतेन । (१९अ० ७८क०) ऊर्णा-सूत्रेणेत्यूर्णा । सूत्रेण, (१९अ० २५क०) द्रोणकलशऽइति द्रोण । कलशः ॥

उदात्तमयोऽन्यत्र नीच एव ॥ १५० ॥

काण्वस्येति वर्त्तते अन्तोदात्तमध्योदात्तयोः पर्वणोरन्यत्र इति करणात्परो नीच उदात्तमय एव भवति । प्रचित एव भवतीत्यर्थः । यथा । (१२अ० २०क०) सोमगोपा इति सोम । गोपाः । (१अ० ७क०) सस्नितमामिति सस्नि । तमम् । पप्रितमामिति पप्रि । तमम् ॥

एकवर्णः पदमपृक्तम् ॥ १५१ ॥

एकवर्णस्यापृक्तसंज्ञा विधीयते पदस्य यथा (१अ० १क०) आ (७अ० ४१क०) उ अपृक्तसंज्ञायाः प्रयोजनम् । अपृक्तमध्यानि त्रीणि स त्रिक्रमः ॥

स एवादिरन्तश्च ॥ १५२ ॥

स एवैको वर्णः पदसंज्ञः सन् पदादिसम्बन्धीनि पदान्तसम्बन्धीनि च कार्य्याणि लभते । यथा । (३३अ० २५क०) इन्द्र आ इहि । इन्द्रे हि ॥

अवग्रहः पदान्तवत् ॥ १५३ ॥

अवग्रहशब्देन पूर्वपदमिहाभिधीयते । अवग्रहः पदान्तसम्बन्धीनि कार्य्याणि लभते वर्णविधौ, स्वरविधौ तु अधस्तादुक्तम् संहितावदवग्रहः स्वरविधाविति, यथा (१३अ० ५०क०) भरद्वाजऽइति भरत् । वाजः । (१६अ० २३क०) तिष्ठद्वाऽइति तिष्ठत । भ्यः ॥

न त्विति करणम् ॥ १५४ ॥

अवग्रहः पदान्तवदित्यु पदशब्दादितिकरणमपि प्राप्नोति तन्निषिध्यते। यथा। (१३अ० २३क०) अन्तः श्लेषऽइत्यन्तः। श्लेषः)। रिफितं च संहितायामनिरुक्तमित्यनेनेतिकरणमपि प्राप्नोति तन्निषिध्यते॥

पूर्वेणोत्तरः सठ०हितः ॥ १५५ ॥

इत उत्तरं संहितोच्यते पूर्वेण पदान्तेन उत्तरः पदादिः संहिता यदा क्रियते स्वरतो वर्णतश्च तदा द्विपदसंहितोच्यते यथा (१अ० १क०) इषे त्वा, त्वोर्ज्जे क्रमसंहितेयम्॥

पदविच्छेदोऽसठ०हितः ॥ १५६ ॥

पदे पदे विच्छेदः पदविच्छेदः। पदविच्छेदो यदा क्रियते तदा असंहितः पाठः। यथा (१अ० १क) इषे त्वा ऊर्ज्जे त्वा॥

एकपदद्विपदत्रिपदचतुष्पदानेकपदाः पादाः ॥ १५७ ॥

एकं पदं यस्मिन् पादे स एकपदः पादः सा च पदसंहितोच्यते। छन्दसः पादपरिज्ञानार्थम्। एक पदः पादो यथा। (१५अ० ४४क०) हृदिस्पृशम्। द्विपदः पादो यथा। (१५अ० ४५क०) क्रतोः भद्रस्य। क्रतोर्भद्रस्य। त्रिपदः पादो यथा। (१५अ० ४४क०) अग्ने तम् अद्य। अग्ने तमद्य। चतुष्पदः पादो यथा। (१५अ० ४६क०) अग्ने विश्वेभिः सुमनाऽअनीकैः। अनेकपदः पादो यथा। (११अ० ३७क०) विधमम्। अग्ने। अरुषम् मियेध्य। विधममग्नेऽअरुषम्मियेध्य॥

वर्णानामेकप्राणयोगः सठ०हिता ॥१५८॥

एवं तावत्पादसंहिता ऋक्षु कर्त्तव्या यजुष्षु त्वयं विधिः। वर्णानामेकोच्छ्वासोच्चारणयोगः पदे वा वाक्ये विश्रामः सा च प्राणसंहिता यत्र भूयांसि पदानि अतिक्रम्यावसानं भवति न त्वेकेन प्राणेन तान्विच्याप्तुं शक्यन्ते तत्रायं विधिः। यथा। (२१अ० ६१क०) "त्वामद्याऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायं यजमानः" यत्र त्ववसानं शक्यते व्याप्तं, तत्रावसान एव विरतिः कर्त्तव्या यथा। (३६अ० ८क०) इन्द्रो विश्वस्य राजति ॥

विप्रतिषेधऽउत्तरम्बलवदलोपे ॥ १५९ ॥

शास्त्रद्वयमन्यत्र चरितार्थमेकस्मिन्नर्थे सङ्कछते यच्च स तुल्यबलविरोधो विप्रतिषेध उक्तः। तत्रोत्तरं शास्त्रं बलवद्भवति लोपं वर्जयित्वा लोपे तु यतो लोपस्तदेव शास्त्रं बलवद्भवति यथा "स्वरितवान्त्स्वरित" इत्यस्यावकाशः। अनुदात्तस्वरितसन्धौ स्वरितो भवति यथा (२२अ० ७क०) स्वाहाऽवक्रन्दायं। स्वाहाऽवक्रन्दायं, तथा च वक्ष्यति उदात्तवानुदात्तः। अस्यावकाशः। उदात्तानुदात्तसन्धौ उदात्तो भवति। यथा। (१अ० २७क०) मुञ्चा चु असि। मुञ्चा चासि। स्वरितोदात्तसन्धौ परत्वादुदात्त एव भवति। (१अ० ९क०) यथा सुप्वा इति। सुप्वेति, (३अ० १०क०) रात्रया इन्द्रवत्या। रात्रेन्द्रवत्या, अलोप इति किम्। स्य एष चेत्यनेन शास्त्रेण स्यशब्दस्य विसर्जनीयो व्यञ्जने परतो लुप्यते। यथा। (९अ० १४क० एषः। स्यः)। वाजी, एतच्च पूर्वं शास्त्रम्। अतोऽन्यद्भवति। रेफे लुप्यते दीर्घश्चोपधेत्यनेन शास्त्रेण रेफे परभूते लुप्यते विसर्जनीय उपधा च दीर्घमापद्यते। एतच्च परं शास्त्रम्

ततो लोपस्य बलीयस्त्वाल्लोप एव भवति नोपधादीर्घत्वम्। यथा (२३अ० १३क०) एषः। स्यः। राथ्यः। एषस्य राथ्यो वृषा, (२५अ० २६क०) एषः छागः। एषच्छागः। विसर्जनीयलोपः चक्रयोः शमिति न शकारः॥

विसर्जनीयो रिफितः॥ १९०॥

इत उत्तरमकारोपध आकारोपधश्च विसर्जनीयो रिफितसंज्ञो भवति। वक्ष्यति करमनुदात्तम्। यथा। (२५अ० ४१क०) अच्छिद्रा गात्राण्यसिना मिथूकः। संज्ञाकरणे प्रयोजनम्। आद्युपधश्च रिहिसर्जनीय इति। करितिकः॥

करमनुदात्तम्॥ १९१॥

करित्येतत्पदमनुदात्तं चेद्रिफितसंज्ञं भवति। अधिकारसूत्रमेतत्। यथा (३३अ० ५९क०) महिपाथः पर्यठ० सुध्राकः। अनुदात्तमिति किम्। (२३अ० ५९क०) कोऽअस्य वेद भुवनस्य नाभिम्॥

अन्तरनाद्युदात्तम्॥ १९२॥

अन्तरित्येतत्पदं रिफितसंज्ञं भवति आद्युदात्तं चेन्न भवति। अन्तरित्यन्तः (७अ० ५क०)। अन्तस्ते द्यावापृथिवी। अनाद्युदात्तमिति किम् (१०अ० १क०)। समुद्रस्य मध्यं चान्तश्च, (२३अ० ६२क०) इयं वेदिः परोऽन्तः॥

अहरभकारपरम्॥ १९३॥

अहरित्येतत्पदं रिफितसंज्ञं भवति भकारपरं चेन्न भवति। यथा। (१५अ० ६क०) प्रवयान्हाहर्जिन्वा (११अ ७५क०) अहरहरित्यहः। अहः। अहरहरप्रयावम्। अभ-

कारपरमिति किम् (६अ० १५क०) तत्ते॑ शुध्यतु शमह्नो॑भ्यः (३५अ० २क०)। द्युभि॒रह्नो॑भि॒रक्तु॑भि॒र्व्यु॑ष्टाम् ॥

आवर्वरिति समानर्चि ॥ १९४ ॥

आवः। वः। इत्येते पदे रिफिते भवतः। उभे अप्येकस्या-मृचि यदि भवतः। यथा (१३अ० ३क०)। आ॒व॒रित्या॑वः विसो॑-मतः॑ सु॒रुचो॑ वे॒नऽआ॑वः। व॒रिति॑ वः। स॒तस्त्व॒योनि॒मस॑तस्त्व॒ विव॑ः। समानर्चीति किम् (४अ० ५क०)। आ वो॑ देवास॒ईम॑हे, (१६अ० ४६क०) नमो॑ वः किरि॒केभ्य॑ः। (६अ० २२क०) अ॒स्मे वो॑ऽअस्विन्द्रि॒यम् ॥

स्तोत-वस्तः सनुत-रभा-वार्हा ॥ १९५ ॥

स्तोतः वस्तः सनुतः अभाः वाः हाः। एतानि पदानि रिफितसंज्ञकानि भवन्ति। यथा (२३अ० ७क०) ए॒तꣳ स्तो॑त॒रनेन॑। (३अ० २२क०) दोषा॑वस्तर्द्दि॒या व॒यम्। (२०अ० ५२क०) आरा॒ग्नि॒द्वे॒ष॑ः॒ सनुतयु॑योतु। (१२अ० ६१क०) अ॒ग्निꣳ स्वे योना॑वभारु॒खा। (५अ० ११क०) इ॒दम॒हन्त॒ꣳ वार्व॑हि॒र्हा। (३०अ० १०क०) हा॒र्य॑ः॒ साम॑म् ॥

स्वः पदमनरणे ॥ १९६ ॥

स्वरित्येतत्पदं रिफितसंज्ञं भवति। अरणशब्दो यदि परो न भवति यथा (१८अ० ५०क०) स्व॑ः॒ न। स्व॑र्ण घ॒र्मः॑। (१अ० ११क०) स्व॑ः॒ अ॒भि॒ विक्ख्ये॑षम्। स्व॑र॒भि॒ विक्ख्ये॑षम्, पदमिति किम्, पदावयवस्य रिफितसंज्ञा माभूत्। (१०अ० ६क०) रा॒ज॒स्व॒ऽइति॑ राज॒। स्व॑ः॒। सोम॑स्य दा॒त्रम॒भि॒ स्वा॑हा॑ राज॒स्व॑ः॒ अनरण इति किम्। (२६अ० २क०) स्वा॑य॒चार॑णाय च ? पदादिस्वाजित्यर इति वक्ष्यति तस्यायं पुरस्तादपवादः ॥

पदादिश्चाजित्परः ॥ १६७ ॥

पदादिश्च यदि स्वग्शब्दोभवति तदा रिफितसंज्ञो भवति जित्परश्चेन्न स्यात् "द्वौ द्वौ प्रथमौ जित्" । "जसाणश्च हवर्जं" जिदित्युक्तम् (११अ० २क० स्वर्ग्यायेति स्व॑ः। ग्याय। स्व॑र्ग्याय शक्त्या। पदादिरिति किम् (१०अ० ६क०) स्वाहा॑ राज॒स्व॑ः। अजित्परमिति किम् (३४अ० २०क०) स्व॑ः सामिति स्व॑ः साम्। पदसंहितोदाहरणम् ॥

ह्वाः सवितः पुनस्त्वष्टर्नेष्टरकर्होतर्मातः प्रातर्जामातरजोगः प्रणेतरिति च ॥ १६८ ॥

ह्वाः सवितः पुनः त्वष्टः नेष्टः अकः होतः मातः प्रातः जामातः अजोगः प्रणेतः एतेषां पदानां विसर्जनीयो रिफितसंज्ञो भवति। यथा (१अ० २क०) मा ह्वार्मा ते। (६अ० १क०) देव॑ सवि॒तरिति सवि॑तः। (४अ० १५क०) पुन॒र्मन॑ः। (६अ० २०क०) देव॑ त्वष्टर्भूरि॑ ते। (२६अ० २१क०) ग्रावो॒ नेष्टः॑ पिब॑, (३८अ० ५क०) सर॑स्वति॒ तमि॒ह धात॑वेऽकः। (२३अ० ६४क०) सोम॒र्तु॑ होतर्य॒ज॑। (१०अ० २३क०) पृथि॑वि मात॒र्मा मा॑ हिꣳसीः। (२०अ० २९क०) इन्द्र॑ प्रातर्जु॑षस्व नः। (२७अ० ३४क०) त्वष्टु॑र्जामातर॒द्भुत। (२९अ० १८क०) आदि॒त्यग्रसि॑ष्ठ॒ ओष॑धीरजोगः। (३४अ० ३६क०) भग॒ प्रणे॑त॒र्भग॒ सत्य॑ राधः ॥

हृद्धं हृद्भिः ॥ १६९ ॥

हृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य। शिक्षाविहितं

व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते। अत एव हेतोः शिष्याणामेतच्छास्त्रश्राविणां बुद्धिर्भवति॥

इति कात्यायनकृतौ प्रातिशाख्य-सूत्रे प्रथमोऽध्यायः।

इत्यानन्दपुरवास्तव्यश्रीवज्रटसुतोव्वटकृतौ प्रातिशाख्य-सूत्रभाष्ये प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः।

संज्ञाः परिभाषाश्च प्रथमाध्याये शास्त्रसंव्यवहारार्थमुक्ताः। इदानीं स्वरसंस्कारयोश्छन्दसि नियम इति प्रतिज्ञातौ। स्वर-संस्कारावारभ्येते तत्र च प्रथमं स्वरः प्रतिज्ञात इत्यतः स्वर एव प्रथममारभ्यते॥

स्वरितवर्जमेकोदात्तं पदम्॥ १॥

एकं स्वरितं प्रथमं वर्जयित्वा एकोदात्तं पदमवति सर्व-स्मिन्नेव पदे एकमक्षरं स्वरितमुदात्तं च भवति। अन्या अन्य-क्षराण्यनुदात्तानीति सूत्रार्थः। तत्र स्वरितस्य चत्वारो भेदा भवन्ति तद्यथा। आदिस्वरितमध्यस्वरितान्तस्वरितसर्वस्वरि-तानि पदानि भवन्ति। आदिस्वरितम् यथा (१६अ० २९क०) व्युप्तकेशायेति व्युप्त। केशाय। मध्यस्वरितं यथा (६अ० ६क०) मनुष्याणाम्। स्वर्गमर्याय। अन्तस्वरितं यथा (१अ० १२क०) वैष्णव्यौ, (१अ० २०क०) धान्यम्। सर्वस्वरितं यथा (३अ० ५क०) स्व। उदात्तस्य चत्वारो भेदा भवन्ति तद्यथा। आद्युदात्तमध्योदात्तान्तोदात्तसर्वोदात्तानि पदानि

भवन्ति। आद्युदात्तं यथा (२४अ० १क०) अग्नेः, (४अ० ६ क०) स्वाहा। मध्योदात्तं यथा (१अ० २३क०) त्रितायं द्वितायं। अन्तोदात्तं यथा (१४अ० २२क०) दृषे ऊर्जे रय्यै सर्वोदात्तं यथा (५अ० २०क०) प्र तत्। एता अष्टौ पदभक्तयोऽनेन सूत्रेणोक्ताः आद्युदात्तत्रयादात्तसर्वोदात्तानि वक्ष्यति। एवमेता एकादशपदभक्तयो भवन्ति सर्ववेदेषु॥

अनुदात्तम् ॥ २ ॥

स्वरितादचरादुदात्ताद्वा यदवशिष्टं तदनुदात्तं भवति। उक्तान्येवोदाहरणानि। अधिकारार्थमेतत्॥

नो नौ मे मदर्थे त्रिष्व्येकेषु ॥ ३ ॥

अनुदात्तमित्यनुवर्त्तते नः नौ मे। एतानि मदर्थे वर्त्तमानानि अस्मदर्थं यदि ब्रुवन्ति। बहुवचनद्विवचनैकवचनाभिधायकानि च यदि भवन्ति यथासंख्यं वर्त्तमानानि अनुदात्तानि भवन्ति। नः यथा, (३६अ० ११क०) शर्मऽइन्द्राग्नी, (२५अ० १८क०) स्वस्ति नऽइन्द्र÷। नौ यथा (२अ० २७क०) अस्थूरि णौ गार्हपत्यानि सन्तु, मे यथा (१७अ० २क०) इमामेऽअग्नऽइष्टका धेनवः÷। (२१अ० १क०) इमम् मे वरुण॥

मा च ॥ ४ ॥

मा इत्येतच्च पदमनुदात्तं भवति। अस्मदर्थे चेद्वर्त्तते। यथा (९अ० १८क०) आ मा गन्ताम्पितरा मातरा च। मदर्थ इति किम् (६अ० २२क०) मापो मौषधीर्हिꣳसीः॥

वो वान्ते त्वदर्थे ॥ ५ ॥

वः वाम् ते एतानि पदानि युष्मदर्थे वर्त्तमानानि बहु-

वचनद्विवचनैकवचनेषु यथासंख्यं वर्त्तमानानि अनुदात्तानि भवन्ति, वः । यथा (२६अ० ११क०) तँव्वो॑ ट्टक्षम् । (४अ० ५क०) आ वो॑ देवास॑ईमहे । वां यथा (७अ० ८क०) अ॒यँवां मित्रावरुणा सुत॑:। (७अ० ११क०) या वां॑ कशा॒ मधु॑मती, ते यथा (३अ० ५७क०) ए॒ष ते॑ रुद्र भा॒ग:॑ । (३अ० १३क०) अ॒यं ते॒ योनि॑: ॥

त्वा च ॥ ६ ॥

त्वा इत्येतच्च पदं युष्मदर्थे वर्त्तमानमनुदात्तं भवति । यथा (२५अ० ३७क०) मा त्वाग्निर्ध्वनयी॑द्धूमगन्धि॑: । (३अ० २६क०) तन्त्वा॑ यौचिष्ठ दीदिव॑: । नो नौ म इति यथाश्रुतेन सिद्धे यन्मदर्थ इति विद्येकेष्विति च वदति तच्छिष्यव्युत्पादनार्थम् । मा इत्येतस्य तु पदस्य मदर्थ इति विशेषणं कर्त्तव्यम् । प्रतिषेधार्थीयस्यापि सम्भवात् । वो वां ते त्वा एतेषां च पदानां त्वदर्थ इति विशेषणं शिष्यव्युत्पादनार्थमेव अन्यार्थस्याव्यभिचारात् ॥

पूर्ववाननुदेशः ॥ ७ ॥

पूर्वैः पदैः प्रज्ञापितस्यार्थस्य यत्पश्चात् । अस्मै एषां अस्मिन्नित्यादि सर्वनामपदं तस्यैवार्थस्याभिधायकम्भवति तदनुदेशशब्देनोच्यते । तदनुदात्तम्भवति । अस्मै यथा (११अ० ७४क०) भ॒रन्तोऽश्वा॑येव॒ तिष्ठते घा॒सम॑स्मै । एषां यथा (१०अ० ३२क०) दु॒र्हे॒षां क्षणु॑हि भोज॑नानि । अस्मिन् यथा (३अ० १क०) आस्मि॑न् ह॒व्या जु॑होतन । पूर्ववानिति किम्, (७अ० २१क०) सोम॑ः पवते॒ऽस्मे ब्रह्म॑णे । (१६अ० ४७क०) आ॒सां प्र॒जाना॒मेषाम्पशूनाम् ॥

असि ॥ ८ ॥

असीत्येतत्पदमनुदात्तं भवति (२अ० १क०) कृणोऽस्याखरेष्टृः, वेदिरसि बर्हिषे। आख्यातमसि शब्दस्तस्य वक्ष्यमाणोऽनुदात्तस्वरः प्राप्त एव इह यदुग्रहणं तदाख्यातपदानभिज्ञस्यापि ज्ञानार्थम् ॥

यथा गृभो भुवोऽग्निभ्यः ॥ ९ ॥

यथा शब्दो गृभो भुवोऽग्निशब्देभ्यः परोऽनुदात्तो भवति। गृभः, यथा (१२अ० ८५क०) पुरा जौर्व गृभो यथा। भुवः, यथा (२३अ० २९क०) मृत्यस्याक्षिभुवो यथा। अग्निर्यथा (८अ० ४०क०) भ्राजन्तोऽग्नयो यथा। एतेभ्यः किम् (३अ० ५८क०) यथा नो वस्यस्तस्करत् ॥

गिर्वणः ॥ १० ॥

गिर्वण इत्येतत् पदमनुदात्तं भवति। (५अ० २९क०) परि त्वा गिर्वणो गिरः। एतच्चामन्त्रितत्वादेवानुदात्तं प्राप्तं यत् पुनरुच्यते तदामन्त्रितानभिज्ञस्यापि प्रत्ययार्थम् ॥

अग्ने घृतेनेति च ॥ ११ ॥

अग्ने पूर्वं घृतेनेत्येतत्पदमनुदात्तं भवति। यथा (१७अ० ५०क०) अग्ने घृतेनाहुत। अग्ने पूर्वमिति किम्। (३अ० ३क०) अङ्गिरो घृतेन वर्धयामसि ॥

प्रचिकितश्च ॥ १२ ॥

प्रपूर्वं चिकित इत्येतत्पदमनुदात्तं भवति। यथा (१९अ० ५२क०) त्वष्टः सोम प्रचिकितो मनीषा। प्रपूर्वमिति किम्। अन्यपदपूर्वमनुदात्तं न भवति। एतदप्यामन्त्रितत्वादेवानुदात्तं मन्दधीप्रतिपत्त्यर्थमुच्यते ॥

एनोऽपापे ॥ १३ ॥

एन इत्येतत् पदमपापे वाच्येऽनुदात्तं भवति। अवशिष्टं चैतत्प्रातिपदिकमात्रं सर्वलिङ्गं गृह्यते पुल्लिङ्गं भवति यथा (१७अ० ५०क०) उदेनमुत्तरावय, स्त्रीलिङ्गं भवति यथा (१२अ० १५क०) मैनान्तपसा मार्चिषाऽभि शोचीः, नपुंसके भवति यथा। (१२अ० ३५क०) मातेव पुत्रं विभृताग्न एनत्। अपाप इति किम्। (८अ० १३क०) देवक्षेत्रस्यैनसोऽवयजनमसि, (३अ० ४५क०) यदेनश्चकृमा वयम्॥

इह पूर्वर्ठ० श्रुतम् ॥ १४ ॥

इह पूर्वं श्रुतमित्येतदनुदात्तम्भवति। यथा (७अ० ८क०) ममेदिह श्रुतर्ठ० हवम्। इह पूर्वमिति किम्। (७अ० ८क०) श्रुतम्मे मित्रावरुणा हवेमा। एतद्व्याख्यातत्वादनुदात्तं मन्दधीप्रतिपत्त्यर्थमुच्यते॥

मन्ये पदपूर्वर्ठ० सर्वत्र ॥ १५ ॥

मन्ये इत्येतत् पदं पदपूर्वं अनुदात्तं भवति सर्वत्र यथा (१५अ० ४७क०) अग्निर्ठ० होतारं मन्ये दास्वन्तम्। आख्यातत्वादाख्यातवद्योगादिभिः स्वरविकारो यः प्राप्तः सोऽनेन सर्वत्र ग्रहणेन निषिध्यते अपदपूर्वस्य स्थाप्यते॥

वा च कमु चित्समस्माद् घ ह स्म त्व ईम्मर्य्या अरे खिन्निपाताश्चेत् ॥ १६ ॥

वा च कम् उ चित्। समस्मात्। घ। ह। स्म। त्व ईम्। मर्य्याः। अरे। खित्। एतानि पदानि अनुदात्तानि भवन्ति यदि निपातानि भवन्ति। असत्त्ववचनानि भवन्तीत्यर्थः। वा यथा। (८अ० ७क०) वातो वा मनो वा। च यथा (२६अ०

१क०) अग्निश्च पृथिवी च सञ्चते। कं यथा। (२५अ० ४६क०) इमानु कं भुवना सीषधाम, उ यथा (४०अ० ८क०) यऽउ सञ्भूत्याऽऽसुताः। खि यथा। (८अ० २३क०) सुतार्पवस्ता हृदया विधश्चित्। समस्मात् यथा। (३अ० २६क०) एकया गोऽअधायतः। समस्मात्, घ (७अ० ३२क०) यथा। आ घा योऽग्निमिन्धते। ह यथा (२३अ० ६३क०) दधे ह गर्भमृत्वियम्। स्म यथा। (३अ० ४६क०) अस्ति हि मा ते शुष्मिन्नुयाः, त्वो यथा। (१२अ० ४२क०) पीपर्ति त्वोऽअनु त्वो गृणाति, ईम् यथा। (२३अ० ५५क०) काऽईमरे पिशङ्गिला। मर्याः यथा। (१०अ० ८क०) आविर्मर्याऽआविःस्तोऽग्निर्गृहपतिः। अरे यथा। (२३अ० ५७क०) अजारे पिशङ्गिला। खिद्यथा। (३३अ० ७४क०) अधः खिदासीदुपरि खिदासीत्। निपाता इति किम्। (४अ० १९क०) चिदसि मनामि॥

पदपूर्वमामन्त्रितमनानार्थे पादादौ ॥१७॥

पदपूर्वमामन्त्रितं यत् पदं तदनुदात्तं भवति। यदि तन्नानाभूतस्यार्थस्याभिधायकञ्च भवति। यदि तत् द्विवचनबहुवचनेनारभ्यत इत्यर्थः। यदि च पादादौ न भवति पदपूर्वं भवति यथा। (४अ० १६क०) त्वमग्ने व्रतपाऽअसि। (३अ० ५६क०) वयर्ठ० सोम व्रते तव। अनानार्थ इति किम्। (५अ० ३४क०) मित्रस्य मा चक्षुषेक्षध्वमग्नयः, (२२अ० १९क०) आदित्यानां पत्वान्विहि देवान्। अपादादाविति किम्। (७अ० ११क०) या वां कशा मधुमत्यश्विना। (१५अ० ३०क०) सर्ठ० समिद्युवसेतृषुजग्ने॥

तेनानन्तरा षष्ठ्येकपदवत् ॥ १८ ॥

तेनामन्त्रितेनाव्यवहिता षष्ठ्येकपदवद् भवति। आन-

न्तर्यं चेह देशकृतमर्थकृतं च गृह्यते। देशकृतं पुरस्ताद्वुपरिष्टाद्वा षष्ठ्यन्तं पदमामन्त्रितस्य। अर्थकृतमेकार्थीभावः। एतदुक्तं भवति। यदि तत् षष्ठ्यन्तमामन्त्रितस्य विशेषणं भवति। अथैकपदवत् स्वरो भवति। एतदुक्तं भवति यदि षष्ठ्यन्तं वाक्यादौ पादादौ वा न भवति पदपूर्वं भवति अथ तदप्यनुदात्तं भवति। अतोऽन्यथात्वे आद्युदात्तं भवति। यथा (६अ० २७क०)। अपान्नपात्। देवीरापोऽअपान्नपात्। ऋषीणान्नपात् यथा। (२१अ० ६१क०) ऋषीणान्नपादहणीत। (३७अ० १८क०) विश्वासां भुवां पते, (३४अ० ५६क०) उत्तिष्ठ ब्रह्मणस्पते। अनन्तरेति किम्। (३४अ० ५८क०) ब्रह्मणस्पते त्वमस्येत्यत्र एकपदवदिति च वदिति "व्युपदेशादन्यत्राद्युदात्तत्वं षष्ठ्या भवति यथा। (१२अ० १०८क०) ऊर्जो नपाज्जातवेद इत्यत्र ऊर्क्शब्दस्य षष्ठ्यन्तस्य तेनानन्तरा षष्ठ्येकपदवदित्यनेन सूत्रेणामन्त्रितस्यानन्तरा षष्ठ्येकपदवत् स्वरं लभते इत्येतदुक्तं भवति॥ अधुनाऽऽमन्त्रितेन सह षष्ठ्या यत्रैकार्थीभावो न भवति तत्प्रत्युदाहरणभूतं सूत्रं शिष्यभ्रान्तिव्युदासार्थं स्वयमेव सूत्रकारः पठति॥

न पृथिवि देवयजन्योषध्या देव भूरेः पवित्रपते पवित्रपूतस्यापान्नपान्नृपान्नृपते सोमाग्नेः सोमेन्द्रस्य सोमसुवीर्य्यस्य सोम विश्वेषां देवानां प्रजापते यस्य यस्य देवाग्ने तवाग्ने व्वाजस्याग्ने वरुणस्यापोऽअस्माकम्॥ १९॥

पृथिवि देवयजन्योषध्याः, देव भूरेः। पवित्रपते पवित्रपूतस्य अपां नपात्। नॄणां नृपते। सोमाग्नेः। सोमेन्द्रस्य।

सोम सुवीर्यस्य, सोम विश्वेषां देवानाम्। प्रजापते यस्य, यस्य देव। अग्ने तव। अग्ने वाजस्य। अग्ने वरुणस्य। आपोऽअस्माकम्। एतेषामामन्त्रितानां याऽनन्तरा षष्ठी साऽनेकार्थीभावान्नैकपदवत् स्वरं लभते। यथा (१अ० २५क०) पृथिवि देवयजनी। पृथिवि देवयजन्योषध्यास्ते। देव भूरेर्यथा। (८अ० ६क०) वामस्य हि क्षयस्य देव भूरेः। पवित्रपते पवित्रपूतस्य यथा। (४अ० ४क०) तस्य ते पवित्रपते पवित्रपूतस्य। अपान्नपाद्यथा। (८अ० २४क०) अपान्नपादाहुवेऽन्नमूर्ज्जम्। नृणान्नृपते यथा। (११अ० २७क०) त्वन्नृणान्नृपते जायसे शुचिः, सोमाग्नेर्यथा। (८अ० ५०क०) उताग्निक्त्वं देव सोमाग्नेः। सोमेन्द्रस्य यथा। (८अ० ५०क०) अग्नौ त्वं देव सोमेन्द्रस्य। सोम सुवीर्यस्य यथा। (७अ० १४क०) अच्छिन्नस्य ते देव सोम सुवीर्यस्य। सोम विश्वेषां देवानां यथा। (८अ० ५०क०) अस्मत्सखा त्वं देव सोम विश्वेषां देवानाम्॥ प्रजापते यस्य यथा। (१८अ० ४८क०) स नो भुवनस्य पते प्रजापते यस्य। यस्य यथा, (७अ० ७क०) यस्य देव दधिषे पूर्वपेयम्। अग्ने तव यथा। (१२अ० १०६क०) अग्ने तव श्रवो वयः। अग्ने वाजस्य यथा। (१५अ० ३५क०) अग्ने याजस्य गोमतः। अग्ने वरुणस्य यथा। (२१अ० ३क०) त्वन्नोऽअग्ने वरुणस्य विद्वान्। आपोऽअस्माकं यथा। (४अ० १२क०) आपोऽअस्माकमन्तरुदरे सुशेवाः। एवमादीन्यन्यान्यपि प्रत्युदाहरणानि द्रष्टव्यानि, यथा। (१२अ० ८६क०) यस्योषधीः प्रसर्पथ॥

सुमङ्गल सत्यराजन्विकिरिद्र विलोहित दरिद्र नीललोहित श्रेयस्कर भूयस्कराम्बेऽम्बि-

केऽम्बालिके शरव्ये ब्रह्म सर्ठ०शिते मरुतोऽअश्ख्विना यव्ये गव्ये द्यावापृथिवीऽउरोऽम्नाऽइद्व पत्क्रीवँल्लाजी३ऽच्छाची३न्मीढुष्टम शिवतम सहस्राच्च शतेषुधे व्वसुपते व्वसुदावन् ॥ २० ॥

सुमङ्गल सत्यराजन्। विकिरिद्र विलोहित। दरिद्र नीललोहित, श्रेयस्कर, भूयस्कर। अम्बेऽम्बिकेऽम्बालिके। शरव्ये ब्रह्म सर्ठ०शिते। मरुतोऽअश्विना। यव्ये गव्ये। द्यावापृथिवीऽउरो। अम्ना३इद्व पत्क्रीवन्। लाजी३न्। च्छाची३न्। मीढुष्टम शिवतम। सहस्राच्च शतेषुधे, वसुपते वसुदावन्। एतान्यामन्त्रितानि, नानुदात्तानि भवन्ति। पदपूर्वमित्यस्यापवादः। सुमङ्गल सत्यराजन्यथा (२०अ० ४क०) सुम्नो॑क् सुमङ्गल॑ सत्य॑राजन्। विकिरिद्र विलोहित यथा। (१६अ० ५२क०) विकि॑रिद्र॒ विलो॑हित॒ नम॑स्ते। दरिद्र नीललोहित यथा। (१६अ० ४७क०) अम्बंसस्ते॒ दरि॑द्र॒ नील॑लोहित। अत्र सुमङ्गलविकिरिद्रशब्दस्य पादादित्वादाद्युदात्तत्वं सिद्धमेव इति तद्विशेषणार्थं द्वितीयपदस्योच्यते। एवं सर्वत्रैतज्जातीयकेषु द्विपदेषु प्रयोजनं द्रष्टव्यम्। श्रेयस्कर भूयस्कर यथा। (१०अ० २८क०) बहु॑कार॒ श्रेय॑स्कर॒ भूय॑स्कर। अम्बेऽअम्बिके यथा। (२३अ० १८क०) अम्बेऽअम्बि॒केऽम्बा॑लिके॒ न मा॑ नयति॒ कश्च॒न, शरव्ये ब्रह्म सर्ठ०शिते यथा। (१७अ० ४५क०) परा॑पत॒ शर॑व्ये॒ ब्रह्म॑ सर्ठ०शिते। मरुतोऽअश्विना यथा। (३३अ० ४७क०) इता मरु॑तोऽअश्वि॑ना। यव्ये गव्ये यथा। (२३अ० ८क०) यव्ये गव्ये॑ऽए॒तदव॑मत्तदेवाः, द्यावा-

द्यविषीऽउरो यथा। (४अ० ७क०) द्यावापृथिवीऽउरोऽअन्तरिक्ष। अग्नाऽइह पत्क्लीवन्यथा। (८अ० १०क०) अग्नाऽइह पत्क्लीवन् सज्यः। लाजीइन् शाचीइन् यथा। (२३अ० ८क०) भूर्भुवः स्वर्लाजीइच्छाचीइन्। मौढुष्टम शिवतम यथा। (१६अ० ५१क०) मौढुष्टम शिवतम शिवो नः। सहस्राच्च शतेषुधे यथा। (१६अ० १३क०) धनुष्टर्ठ० सहस्राच्च शतेषुधे। वसुपते वसुदावन् यथा। (१२अ० ४३क०) मघवा वसुपते वसुदावन्॥

डडोत्तराणि नव स्वानोत्तराणि षडग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेकर्ठ० सिनीवाल्युत्तरञ्च प्रजापतये ब्रह्मन्निति च ॥२१॥

डडोत्तराणि नवामन्त्रितानि पदान्याद्युदात्तानि भवन्ति। यथा। (८अ० ४३क०) डडे, रन्ते। हव्ये, काम्ये। चन्द्रे, ज्योते। अदिति। सरस्वति। महि। विश्रुति। स्वानोत्तराणि षडामन्त्रितानि पदान्याद्युदात्तानि भवन्ति। यथा। (४अ० २७क०) स्वान। भ्राज। अङ्गारे। बम्भारे। हस्त। सुहस्त। अग्नानो। अग्न्युत्तराणि चत्वार्यामन्त्रितानि पदान्याद्युदात्तानि भवन्ति। यथा (३३अ० ४८क०) अग्ने। इन्द्र। वरुण। मित्र। देवा+, भगोत्तराणि च। चशब्दाच्चत्वार्येवामन्त्रितान्याद्युदात्तानि भवन्ति। यथा। (३४अ० ३६क०) भगप्णेतः। भग सत्यराधः। भग। इन्द्रोत्तरमेकं पदमाद्युदात्तं भवति। यथा। (२६अ० ४क०) इन्द्र। गोमन्। सिनीवाल्युत्तरञ्च। चशब्दादेकमेवामन्त्रितमाद्युदात्तं भवति। यथा। (३४अ० १०क०) सिनीवालि पृथुष्टुके। प्रजापतये ब्रह्मन्निति

च। अत्र ब्रह्मन्वित्यामन्त्रितमाद्युदात्तं भवति। यथा (२२अ० ४क०) प्र॒जाप॑तये॒ ब्रह्म॒ब्रह्म॑ ॥

भूतिरादुदात्तम् ॥ २२ ॥

अनुदात्ताधिकारो निवृत्तः। इत उत्तरमादुदात्ताधिकारः प्रवृत्तः, भूतिरित्येतत् पदमादुदात्तं भवति। यथा (३०अ० १७क०) भूत्यै॑ जागर॒णम्। (१२अ० ६५क०) नमो॑ भूत्यै॒ येदम्। भूतिरिति किम्। (१८अ० ११क०) भूतं॑ च॑ मे भवि॒ष्यच्च॑ मे ॥

कदा न रिष्येम पूर्वम् ॥ २३ ॥

कदेत्येतत्पदमादुदात्तं भवति। न रिष्येम पूर्वं चेन्नवति यथा (३४अ० ४१क०)। न रिष्येम॒ कदा॑ च॒न। न रिष्येम पूर्वमिति किम् (३अ० ३२क०)। कदा॑ च॒न स्तरीर॑सि ॥

आमन्त्रितञ्च ॥ २४ ॥

आमन्त्रितमादुदात्तम्भवति। यस्यामन्त्रितस्याधस्तात् स्वरो न विहितः। कस्य चाधस्तात् स्वरो न विहितः। पदपूर्वं यन्न भवति। पादादौ वाक्यादौ वा यन्नवति तदादुदात्तं भवति। अपदपूर्वम्भवति यथा (३अ० ३८क०)। अग्ने॑ गृहपते। वाक्यादौ भवति यथा (५अ० ३४क०)। अग्न॑यः सगराः (२२अ० १९क०)। देवा॑ आप्यापाला॑ः। पादादौ भवति यथा (७अ० ११क०)। या॒ वाङ्गा॒ मधु॑मत्यश्वि॒ना (३३अ० १०क०)। विश्वे॑भिः सो॒म्यम्मध्वग्ने॑। सुमङ्गलादि तु निपातितमेव ॥

कृष्णो मृगसँय्योगे ॥ २५ ॥

कृष्णशब्दो मृगवचनश्चादुदात्तो भवति। यथा। (२अ०

१क०) कृष्णो॑ऽस्याखरे॒ष्टः)। (२४अ० ३६क०) कृष्णो॒ रात्र्या॑ऽक्षत्तो॑ जनूः)। मृगसंयोग इति किम्। (२४अ० ४०क०) श्वा कृ॒ष्णः॑ कर्णौ॑ गर्द॒भः)। अत्र कृष्णशब्दो वर्णवचनः वर्णविशेषाभिमतत्वात्॥

व्ययवांश्चान्तः॥ २६॥

अन्तःशब्दो द्विविधः व्ययवानव्ययवांश्च यस्य विभक्त्यादिभिर्विकारो न क्रियते सोऽव्ययवान्। तथा चोक्तम्। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति। यस्य पुनर्विभक्त्यादिभिर्विकारः क्रियते स व्ययवान्। स चाद्युदात्तो भवति। यथा (१७अ० २क०)। समु॒द्रस्य॒ मध्यं॑ चान्तश्च॰ (२३अ० ६२क०)। इ॒यँ वेदि॒॑ः परो॑ऽन्त॑ः पृथि॒व्याः)। व्ययवानिति किम्। (७अ० ४क०) अ॒न्तय॑॑श्च मघवन्॥

परः प्रधाने॥ २७॥

परशब्दः प्रधानवचनः अपरिमितवचन आद्युदात्तो भवति। यथा। (८अ० ३६क०) यस्मान्न जा॒तः) परो॑ऽअ॒न्यो॑ऽअस्ति॑। (२३अ० ६२क०) इ॒यँ वेदि॒॑ः पर॑ः। प्रधान इति किम्। (१७अ० २९क०) प॒रो दि॒वा प॒रऽए॒ना पृ॑थि॒व्या॥

मात्रा च परिमाणे॥ २८॥

मात्राशब्दश्च परिमाणवचन आद्युदात्तो भवति। यथा। (२३अ० ४७क०) कस्य॒ मात्रा॒ न वि॑द्यते। (२३अ० ४८क०) गोस्तु मात्रा॒ न वि॑द्यते। परिमाण इति किम्। (२२अ० १९क०) वि॒भूर्मात्रा॑ प्र॒भूः) पि॒त्रा। अत्र मात्रशब्दस्य सम्बन्धिवचनस्य तृतीयान्तस्येतद्रूपं भवति। अतः परिमाणवाची न भवति॥

दक्षिणा च ॥ २९ ॥

दक्षिणाशब्दश्चादुदात्तो भवति। यथा। (१८अ० ४२क०) तस्य दक्षिणाऽअभ्रꣳसः। (१७अ० ४०क०) दक्षिणा यज्ञः पुरऽएतु सोमः॥

न दश विश्वकर्मा निषद्येन्द्रस्य पातु सदः सद्भ्येषु ॥ ३० ॥

दश विश्वकर्मा निषद्य। इन्द्रस्य। पातु। सदः। सद्भ्यः। एतेषु परभूतेषु दक्षिणाशब्द आदुदात्तो न भवति। दश (१६अ० ६४क०) यथा। दश दक्षिणा दश प्रतीचीः। विश्वकर्मा यथा। (१३अ० ५५क०) अयं दक्षिणा विश्वकर्मा। निषद्य यथा। (१८अ० ६२क०) आक्रम्या जानुं दक्षिणतो निषद्य। इन्द्रस्य यथा। (३७अ० १२क०) पुत्रवतो दक्षिणतऽइन्द्रस्याधिपत्ये। पातु यथा। (५अ० ११क०) मनोजवास्त्वा पितृभिर्दक्षिणतः पातु। सदः यथा। (९अ० ३६क०) यमनेत्वा दक्षिणासदः। सद्भ्यः यथा। (९अ० ३५क०) यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः॥

कर्णः स्वाङ्गे ॥ ३१ ॥

कर्णशब्दः स्वाङ्गाभिधाय्यादुदात्तो भवति। यथा। (२५अ० २१क०) भद्रं कर्णेभिः शृणुयाम देवाः। (२५अ० २क०) श्रोत्राभ्यां कर्णौ ते दृंहामि धरक्रकचेन। स्वाङ्ग इति किम्। (२४अ० ४०क०) श्वा कृष्णः कर्णौ गर्दभः॥

महो नपुंसके ॥ ३२ ॥

महश्शब्दो नपुंसकाभिधाय्यादुदात्तो भवति। यथा। (३अ० २०क०) महश्च मह्यै वो भवाय। नपुंसक इति किम्।

(४अ० ३५क०) महो देवाय तद्धृतर्ठ० संपश्यंत। (३३अ १७क०) महोऽग्नेः समिधानस्य शर्मणि॥

अवश्च ॥ ३३ ॥

अवःशब्दो नपुंसकवाच्याद्युदात्तो भवति यथा। (१२अ० १०६क०) अग्ने तव श्रवो वय÷। नपुंसक इति किम्। (१८अ० १क०) श्रवश्च मे श्रुतिश्च मे॥

अम्भो वीर्य्ये ॥ ३४ ॥

अम्भशब्दो वीर्य्यवचन आद्युदात्तो भवति। यथा। (३अ० २०क०) अम्भस्थान्भो वो भक्षीय। वीर्य्य इति किम्। (३०अ० १०क०) स्वप्नायाम्भमधर्माय। (४०अ० ८क०) अन्धन्तमः प्रविशन्ति॥

एता वर्णे ॥ ३५ ॥

एताशब्दो वर्णवचन आद्युदात्तो भवति। यथा। (२४अ० ८क०) एताऽऐन्द्राग्नाः)। वर्ण इति किम्। (१७अ० २क०) एता मेऽअग्न इष्टकाः॥

रोहितश्च केवलः ॥ ३६ ॥

रोहितशब्दश्च वर्णवचनः केवलः असमासस्थ आद्युदात्तो भवति। यथा। (२४अ० २क०) रोहितो धूम्ररोहितः। वर्णवाचीति किम्। (२४अ० ३७क०) रोहिल्लुण्डाचो गोलक्तिका। केवल इति किम्। (२४अ० २क०) धूम्ररोहितः कर्कन्धुरोहितः॥

यत्नौ राट् ॥ ३७ ॥

यत्नौशब्द आद्युदात्तो भवति। राट् परश्चेद्भवति।

यथा। (१४अ० २२क०) यन्त्री राट्। राट् पर इति किम्। यन्त्रासि यमनी॥

ओषधीरनामन्त्रिते ॥ ३८ ॥

ओषधीशब्दोऽनामन्त्रितविषय आद्युदात्तो भवति। यथा। (१२अ० ७५क०) याऽओषधीः पूर्वा जाताः)। अनामन्त्रित इति किम्। (१२अ० ८६क०) यस्यौषधीः प्रसर्पथ॥

सर्व विशख्ख मानुषाशाः स्वाहा व्राजः पयो नमः ॥ ३९ ॥

सर्व। विशख्ख। मानुषा। आशाः। स्वाहा। व्राजः। पयः। नमः। एतानि पदान्याद्युदात्तानि भवन्ति। सर्व यथा। (३२अ० २क०) सर्वे निमेषा जज्ञिरे। विशख्ख यथा। (३२अ० ८क०) यत्र विशख्खं भवत्येकनीडम्। मानुषा यथा। (१२अ० १११क०) दैव्यं मानुषा युगा। आशा यथा। (२७अ० ७क०) विशख्खाऽआशाः प्रमुञ्चन्मानुषीभ्यः)। स्वाहा यथा। (२२अ० ७क०) हिङ्कृताय स्वाहा। व्राजः यथा। (१८अ० १क०) व्राजश्च मे। पयः यथा। (१८अ० ३६क०) पयः पृथिव्याम्। नमः यथा। (१६अ० १७क०) नमो हिरण्यबाहवे॥

असि शिवा सुषदा पयस्वती यन्ते मधुमतीर्वर्चस्वानोजिष्ठो भ्राजिष्ठः शुक्रिणी भद्रवाच्याय वन्द्यो मेध्यो यमादित्यस्त्वितः सोमेन स्वसेत्येतेषु ॥ ४० ॥

शिवा। सुषदा। पयस्वती। यन्ते। मधुमतीः। वर्चस्वान्।

ओजिष्ठ। भ्राजिष्ठ शुष्मिणी। भद्रवाच्याय। वन्द्यः। मेध्यः। यमः। आदित्यः। क्षितः। सोमेन। स्वसा। असीत्यधस्तादनुदात्त उत्तरः स एतेषु परभूतेषु आद्युदात्तो भवति। शिवा यथा। (१अ० २७क०) सुक्षा चासि शिवा। सुषदा यथा। (१अ० २७क०) स्योना चासि सुषदा। पयस्वती यथा। (१अ० २७क०) ऊर्जस्वती चासि पयस्वती च। यत्ते यथा। (५अ० ६क०) योऽस्याम्पृथिव्यामसि यत्ते। मधुमतीर्यथा। (७अ० १क०) येषां भागोऽसि मधुमतीः। वर्चस्वान्यथा। (८अ० ३८क०) त्वन्ते वेष्वासि वर्चस्वान्। ओजिष्ठः यथा। (८अ० ३८क०) त्वन्ते वेष्वस्योजिष्ठः। भ्राजिष्ठः यथा। (८अ० ३८क०) त्वन्ते वेष्वसि भ्राजिष्ठः। शुष्मिणी यथा। (१८अ० ७क०) सुरा त्वमसि शुष्मिणी। भद्रवाच्याय यथा। (२१अ० ६१क०) होतरसि भद्रवाच्याय। वन्द्यः यथा। (२८अ० ३क०) दृह्यस्वासि वन्द्य। मेध्यः यथा। (२८अ० ३३क०) आशुस्वासि मेध्यस्व सप्ते। यमः यथा। (२८अ० १४क०) असि यमः। आदित्यः यथा। (२८अ० १४क०) अस्यादित्योऽअर्वन्। क्षितः यथा। (२८अ० १४क०) असि क्षितो गुप्तेन। सोमेन यथा। (२८अ० १४क०) असि सोमेन। स्वसा यथा। (३४अ० ३३क०) या देवानामसि स्वसा॥

धनदारत्नधाभ्याञ्च ॥ ४१ ॥

धनदारत्नधाभ्याम्परोऽसिशब्द आद्युदात्तो भवति। धनदा यथा। (९अ० २८क०) त्वष्टं० हि धनदाऽअसि। रत्नधा यथा। (२६अ० २१क०) त्वष्टं० हि रत्नधाऽअसि॥

रायोऽपोषे ॥ ४२ ॥

राय इत्येतत्पदमपोषे परे चाद्युदात्तं भवति यथा।

(४अ० २२क०) त्वे रायो मे रार्य+ । अपोष इति किम् । (४अ० २२क०) मा व्ययर्ठ० रायस्पोषेण व्वि यौष ॥

न भागमौशिषयोः ॥ ४३ ॥

राय इत्येतत्पदं भागमौशिषयोः परयोराद्युदात्तन्न भवति । भागं यथा । (३४अ० २३क०) रायो भागम् । ईशिषे यथा । (१७अ० ७१क०) रायऽईशिषे ॥

त्रिधा बर्ह्हितयोः ॥ ४४ ॥

त्रिधाशब्दो बर्ह्हितयोः परयोराद्युदात्तो भवति । बर्ह्हो यथा (१७अ० ९१क०) त्रिधा बर्ह्हो वृषभो रोरवीति । हितं यथा (१७अ० ९२क०) त्रिधा हितं पणिभिर्गुह्यमानम् ॥

सुकृतम्भूते ॥ ४५ ॥

सुकृतशब्दो भूताभिधाय्याद्युदात्तो भवति । यथा (७अ० ३९क०) उरुः पृथुः सुकृतः कर्त्तृभिर्भूत् । भूत इति किम् । सूक्तञ्च (१८अ० ५क०) मे सुकृतञ्च मे ॥

द्विरुदात्तानि ॥ ४६ ॥

द्विरुदात्तं येषु तानि पदानि वक्ष्यन्त इति सूत्रशेषः । अधिकारसूत्रमेतत् ॥

बृहस्पतिर्वनस्पतिर्नराशर्ठ० सस्त्तनूनपात्ते तनूनपान्नक्तोषासोषासानक्ता द्यावापृथिवी द्यावाक्षामा क्रतूदक्षाव्भ्यामेतवाऽअन्व्येतवा इति च ॥ ४७ ॥

(१७अ० ४०क०) बृहस्पतिः+ । (२०अ० ४५क०) वनस्पतिः+ (२०अ० ३७क०) नराशर्ठ० सः+, (४अ० ५क०) तनूनपात्ते,

(२०अ० ३७क०) तनूनपात्, (१२अ० २क०) नक्तोषासा, (२०अ० ४१क०) उषासा नक्ता, (१७अ० २०क०) द्यावापृथिवी, (१२अ० २क०) द्यावाहामा, (७अ० २७क०) क्रतूदक्षाभ्याम्, (१७अ० ९७क०) एतवै, (८अ० २३क०) अन्वेतवै, एतानि पदानि द्विरुदात्तानि भवन्ति अदेवताद्वन्द्वार्थं आरम्भः प्रचुराण्येवोदाहरणानि ॥

देवताद्वन्द्वानि चानामन्त्रितानि ॥ ४८ ॥

देवताद्वन्द्वानि च द्विरुदात्तानि भवन्ति आमन्त्रितानि वर्जयित्वा। यथा (२अ० १ क०) अग्नीषोमाभ्याञ्जुष्टं प्रोक्षामि (७अ० २३क०) मित्रावरुणाभ्यां त्वा। देवताद्वन्द्वानीति किम् (४अ० ९क०) ऋक्कामयोः शिल्पे (४अ० २क०) दीक्षातपसोस्तनूरसि। अनामन्त्रितानीति किम् (७अ० १०क०) तान्प्रेतं मित्रावरुणा, चशब्दादधस्तनसूत्रविहितान्यनामन्त्रितानि द्विरुदात्तानि भवन्ति आमन्त्रितानि त्वामन्त्रितस्वरभङ्गे। यथा (२६अ० ३क०) बृहस्पतेऽअति यदर्य्योऽअर्हात् (२८अ० २६क०) तनूनपात्पथऽऋतस्य यानान् ॥

इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि ॥ ४९ ॥

इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इत्येतयोः पदयोस्त्रीण्यचराण्युदात्तानि भवन्ति। इन्द्राबृहस्पतिभ्यां यथा (७अ० २१क०) इन्द्राबृहस्पतिभ्यां त्वा देवाव्यँय्यज्ञस्य। इन्द्राबृहस्पती यथा (२५अ० ६क०) इन्द्राबृहस्पतीऽऊरुभ्याम् ॥

सर्वमन्नाऽइऽइ लाजीऽइक्षाचीऽइनिति त्रिमात्राणि च ॥ ५० ॥

अग्नाऽइ लाजी३न् शाची३न् एतानि पदानि सर्वोदात्तानि भवन्ति त्रिमात्राणि च त्रीण्यक्षराण्येतेषु पदेषु भवन्ति, यथा (८अ० १०क०) अग्नाऽइ इह आकारस्त्रिमात्रः (२३अ० ८क०) लाजी३निहेकारः शाची३निहेकारः ॥

प्रणवश्च ॥ ५१ ॥

प्रणवश्च सर्वोदात्तो भवति त्रिमात्रश्च यथा (४०अ० १७क०) ओम् ३ खम्ब्रह्म ॥

विवेशा३ इति चानुदात्तम् ॥ ५२ ॥

विवेशा३ इत्येतत् पदं सर्वानुदात्तं भवति अन्त्यमक्षरं चास्य त्रिमात्रं भवति यथा (२३अ० ४९क०) तेषु विष्वं भुवनमाविवेशा३, इहाकारस्त्रिमात्रः। अनुदात्तमिति किम्, (२३अ० ५०क०) विष्वग्भुवनमाविवेश ॥

आसीदिति चोत्तरँव्विचारे ॥ ५३ ॥

आसीदित्येतत्पदं विचारे वर्त्तमानमुत्तरं सर्वानुदात्तं भवति तस्य चान्त्यमक्षरं त्रिमात्रं भवति यथा (३३अ० ७४क०) उपरि स्विदासी३त्, इहाकारस्त्रिमात्रः, विचार इति किम्, (२३अ० ११क०) का स्विदासीत् ॥

पूर्वमन्तोदात्तम् ॥ ५४ ॥

आसीदित्येतत्पदं पूर्वं विचारे वर्त्तमानमन्तोदात्तं भवति त्रिमात्रं चास्यान्त्यमक्षरं भवति। यथा (३२अ० ७४क०) अधः स्विदासी३त् इहेकारस्त्रिमात्रः ॥

इन्द्रश्चेन्द्रसोमपूर्वं पूषाग्निवायुषु ॥५५॥

देवताद्वन्द्वं च इन्द्रसोमपूर्वं पूषाग्निवायुषु परभूतेष्वन्तोदात्तं भवति, द्विरुदात्तापवादः, इन्द्रपूर्वं यथा (२५अ० २५क०)

इन्द्राग्नोः। प्रियमप्येति पाथः, (२अ० १५क०) इन्द्राग्न्योर्भाग-धेयीमनूज्येषम् (७अ० ८क०) इन्द्रवायुभ्यान्त्वैषते योनिः। सोमपूर्वस्य यथासम्भवमुदाहरणम् (२४अ० १क०) ब्राह्मोः। सोमापौष्णः॥

अग्निश्चेन्द्रे ॥ ५६ ॥

अग्निपूर्वश्चेन्द्रोत्तरपदो देवताद्वन्द्वसमासोऽन्तोदात्तो भवति यथा (७अ० ३२क०) अग्नोन्द्राभ्यान्त्वैषते योनिः॥

ऋक्कसाभ्यां च ॥ ५७ ॥

ऋक्पूर्वपदः सामशब्दोत्तरपदश्च द्वन्द्वसमासोऽन्तोदात्तो भवति। यथा (४अ० १क०) ऋक्सामाभ्यांꣳ सन्तरन्तः॥

यतौ गतौ ॥ ५८ ॥

यत इत्येतत्पदं गतौ वर्त्तमानमन्तोदात्तं भवति। यथा (११अ० ३क०) स्वर्यतो धिया दिवम्, इण्गतावित्यस्यैतद्रूपम्, गताविति किम् (२१अ० ६३क०) यतो जातः प्रजापतिः॥

पायोर्विशः ॥ ५९ ॥

पायुशब्दात्परो विशः शब्दोऽन्तोदात्तो भवति। यथा (१३अ० ११क०) प्रायुर्विशोऽस्याऽदब्धः, पायोरिति किम् (१७अ० ८६क०) इन्द्रदेवीर्विशो मरुतः॥

आयुरर्य्यमोर्वश्यस्तिभ्यः ॥ ६० ॥

आयुरित्येतत्पदम् अर्य्यमा उर्वशी अस्ति शब्देभ्यः परमन्तोदात्तं भवति। अर्य्यमा यथा (२५अ० २४क०) मा नो मित्रो वरुणोऽर्य्यमायुः, उर्वशी यथा (५अ० २क०) उर्वश्यस्यायुरसि, पदसंहितोदाहरणम्। अस्ति यथा (१५अ०

६२क०) अर्वस्म ते व्रजनं कृष्णमस्त्ति श्रायोष्टा । एतेभ्य इति किम् (१८अ० ३क०) आयुष्य मे जरा च मे ॥

अस्य रोचनाऽसौ बोधा मे पारम्पुराऽएतारो दिवः कोऽहन्त्वम्महीँय्यँ ईशऽईशानेभ्यः ॥६१॥

रोचना असौ बोधा मे पारम् पुराऽएतारः दिवः कः अहम् त्वम् महीम् यऽईशे ईशानम् एतेभ्यः परः अस्यशब्दोऽन्तोदात्तो भवति, रोचना यथा (३अ० ७क०) अन्तश्चं रति रोचनास्य, असौ यथा (१०अ० २०क०) असावस्य पिता वयए स्याम, बोधा मे यथा (१२अ० ४२क०) बोधा मेऽअस्य वचसो यविष्ठ, पारम् यथा (१२अ० ७३क०) अगन्म तमसस्पारमस्य, पुराऽएतारो यथा (१७अ० १४क०) ये ब्रह्मणः पुराऽएतारोऽअस्य, दिवः यथा (२१अ० ५०क०) एकेनाङ्गेन दिवोऽअस्य पृष्ठम्, कः यथा (२३अ० ५८क०) कोऽअस्य वेद भुवनस्य नाभिम्, अहं यथा (२३अ० ६०क०) वेदाहमस्य भुवनस्य नाभिम्, त्वम् यथा (३४अ० ५८क०) ब्रह्मणस्पते त्वमस्य यन्ता, महीम् यथा (१३अ० २८क०) इमान्ते धियम्भरे महो महीमस्य, यऽईशे यथा (२३अ० ३क०) यऽईशेऽअस्य द्विपदः, ईशानम् यथा (२७अ० ३५क०) ईशानमस्य जगतः ॥

प्रत्नां यज्ञस्य हविषः पाहीत्पातं मह्वो यजमानस्य होतुरजरासो लोकेषु च ॥६२॥

प्रत्नाम् यज्ञस्य हविषः पाहि इत् पातम् महः यजमानस्य होतुः अजरासः लोकः इत्येतेषु च प्रत्ययेषु परम शब्दोऽन्तोदात्तो भवति, प्रत्नां यथा (३अ० १६क०) प्रत्नस्य प्रत्नामनुयुतम्, यज्ञस्य यथा (४अ० १०क०) आस्य यज्ञस्योदर्कः,

हविषः यथा (६अ० ११क०) अस्य हविष्स्तनो यज, पाहि यथा (२६अ० २३क०) घंग्ध्यत्तमठं० सुमनोऽअस्य पाहि। इत् यथा (३३अ० ९७क०) अस्येदिन्द्रो वावृधे, पातम् यथा (७अ० ३१क०) अस्य पातम्बियेषिता, मदः यथा (९अ० १८क०) अस्य मदः÷ पिबत, यजमानस्य यथा (२२अ० २२क०) अस्य यजमानस्य वीरो जायताम्, होतुर्यथा (२८अ० ११क०) अस्य होतुः÷ प्रदिशतस्य वाचि। अजरासो यथा (३३अ० १क०) अस्याजरासो दमाम्, लोकः यथा (३५अ० १क०) लोकः सुतावतः॥

अनुदात्तमन्यत् ॥ ९३ ॥

अस्येत्येतत् पदमुक्तादन्यदनुदात्तं भवति, यथा (२३अ० ५८क०) षडस्य विष्ठाः शतम् (३३अ० ९७क०) अद्यातमस्य, पूर्ववाननुदेश इत्येतस्यैवायं प्रपञ्चः॥

पक्त्रीर्हंसयोरन्त उदात्तं आदिर्वा ॥ ९४ ॥

पक्त्रीः शब्दस्य हंसशब्दस्य चान्त उदात्तो भवति आदिर्वा उदात्तो भवति स्वरविकल्पः, पक्त्रीर्यथा (२१अ० ५८क०) पचन्पक्त्रीः, हंसः यथा (३०अ० २०क०) पुंसूनुः हंसाय॥

दृढं दृढिः ॥ ९५ ॥

इत्युक्तार्थम्॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे
द्वितीयोऽध्यायः।

इत्यानन्दपुरवास्तव्यवज्झटसुतोव्वटकृतौ
प्रातिशाख्यभाष्ये द्वितीयोऽध्यायः॥

तृतीयोऽध्यायः ।

स्वरसंस्कारयोश्छन्दसि नियम इति प्रतिज्ञातम्, तत्र प्रथमाध्याये स्वरसंस्कारयोरेवाङ्गभूताः संज्ञाः परिभाषा उक्ताः, द्वितीये स्वरः । अधुना क्रमप्राप्तः संस्कारोऽभिधीयते लोपागमवर्णविकारप्रकृतिभावलक्षणः ॥

सठ०हितायाम् ॥ १ ॥

इत्ययमधिकारः आसप्तमाध्यायपरिसमाप्तेः, यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यं वक्ष्यति च "उदः स्तभाने लोपम्" उत् (१७अ० ७२क०) स्तभान उत्त्भान् तेजसा दिशऽउट्ठ०ह ॥

अर्थः पदम् ॥ २ ॥

संहितालक्षणमुक्तम् (प्रा० अ० १ सू० १५८) "वर्णानामेकप्राणयोगः सठ०हितेति" अधुना पदलक्षणमुच्यते अर्थाभिधायि पदम् पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम् यद्येवम् निपातस्यानर्थकस्य पदसंज्ञा न प्राप्नोति नैष दोषः उपरिष्टादर्थभेदनिबन्धनं पदचतुष्टयं वक्ष्यति "नामाख्यातोपसर्गनिपाताश्चेति" तत्रास्य पदसंज्ञा भविष्यति यथा क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्त्वाभिधायकन्नाम निपातः पादपूरण इति सूत्रकारस्य त्वयमभिप्रायः पदप्रतिरूपकस्य पदावयवस्य पदसंज्ञा माभूदित्यतोऽर्थग्रहणं इहैव पदसंज्ञा यथा स्यात् (१०अ० १८क०) गोष्यच्छमन्तकाय गोघ्नतम्, इह माभूत् (१८अ० १२क०) गोधूमाश्च मे ॥

पदान्तपदाद्योः सन्धिः ॥ ३ ॥

यः कश्चिद्वैदिकमाक्षसन्धिरुच्यते स पदान्तपदाद्योर्वेदि-

तव्य इति, ते सम्भवत्वारो भवन्ति स्वरयोः, व्यञ्जनयोः, स्वरव्यञ्जनयोस्तु द्विप्रकारः। पूर्वः स्वरो भवति पश्चाद्व्यञ्जनानि, व्यञ्जनानि वा पूर्वाणि भवन्ति पश्चात्स्वर इति, स्वरयोर्भवति यथा (४अ० १क०) आ इदम् एदम्। (१८अ० ४५क०) वरुण इह वरु णेह। व्यञ्जनयोर्भवति यथा (१अ० २२क०) सम् यौमि, सँय्यौमि, (१अ० २१क०) सम् वपामि सँवपामि, स्वरपूर्वो भवति यथा (१अ० १क०) इषे त्वा इषे त्वा, ऊर्जे त्वा ऊर्जे त्वा, व्यञ्जनपूर्वो भवति यथा (१७अ० ५०क०) उत् एनम् उदेनम्, परिभाषासूत्रमेतत्॥

न परकालः पूर्वकाले पुनः॥ ४॥

ह्यन्तराः काला इति वक्ष्यति तत्र यः परकालः सन्धिः पूर्वकाले सन्धौ सति पुनः प्राप्नुवन्न भवति यथा (प्रा० अ० ३ सू० १४२) "आकारोपधो यकारमिति, नकारस्याकारोपधस्य यकारो विहितः स्वरे प्रत्यये, (७अ० ३९क०) मुहाऽऽइन्द्रं इति, यथा (प्रा० अ० ४। सू० ३६) "कण्ठ्यपूर्वो यकारमरिफित इति, अवर्णपूर्वस्य विसर्जनीयस्य यकारो विहितः स्वरे प्रत्यये, (१२अ० ९२क०) याऽओषधीरिति ततो द्विग्रब्दात् परं लक्षणमुक्तम् (प्रा० अ० ४। सू० १२२) "यवयोः पदान्तयोः स्वरमध्ये लोपः" ततो यलोपे कृते द्विग्रब्दात् पूर्वं ग्राब्दं पुनः प्रवर्त्तते (प्रा० अ० ४। सू० ५२, ५३) "कण्ठ्यादिवर्ण एकारम्", "उवर्ण ओकारमिति। तत्प्रवर्त्तमानन्निषिध्यत इति सूत्रार्थः॥

ह्यन्तराः कालाः॥ ५॥

कालाधिकारः किः अन्तरा येषां सन्धिकालानां ते ह्यन्तराः कालाः कालग्रब्दः स्थानपर्य्यायः, उक्तमुदाहरणम्॥

विसर्जनीयः ॥ ६ ॥

विसर्जनीयसम्बिरधिकृत इति सूत्रार्थः ॥

चछयोः शम् ॥ ७ ॥

चकारछकारयोः प्रत्यययोर्विसर्जनीयः शकारमापद्यते, चकारे यथा (१८अ० १क०) वाजः॑ च मे, वाजश्च मे, छे यथा (१४अ० १८क०) अस्रीवयः॑ छन्दः॑ अस्रीवयश्छन्दः॑ ॥

तथयोः सम् ॥ ८ ॥

तकारथकारयोः प्रत्यययोर्विसर्जनीयः सकारमापद्यते, तकारे यथा (३अ० ५७क०) आखुः॑ ते पशुः॑ आखुस्ते पशुः॑, (१६अ० १क०) नमः॑ ते रुद्र नमस्ते रुद्र, विसर्जनीयथकारसन्धिस्तु संहितायां न विद्यते अतो रूपोदाहरणं दीयते, कः थकारः कस्थकारः ॥

प्रत्ययसवर्णम्मृदि शाकटायनः ॥ ९ ॥

शषसा मुक्ता उक्ताः, मुक्तेषु परभूतेषु विसर्जनीयः परसवर्णमापद्यते शाकटायनाचार्यस्य मतेन, यथा (१७अ० ३३क०) आशुः॑ शिशानः॑ आशुश्शिशानः॑, (८अ० ३४क०) अदितिः॑ षोडशाक्षरेण अदितिष्षोडशाक्षरेण, (१अ० १क०) देवो वः॑ सविता देवो वस्सविता ॥

अविकारर्थ० शाकल्यः शषसेषु ॥ १० ॥

विसर्जनीयस्य विकारत्वं मन्यते शाकल्यः शषसेषु परभूतेषु, यथा आशुः॑ शिशानः॑ आशुः॑ शिशानः, अदितिः॑ षोडशाक्षरेण अदितिः॑ षोडशाक्षरेण, देवो वः॑ सविता देवो वः॑ सविता ॥

प्रकृत्या कखयोः पफयोश्च ॥ ११ ॥

प्रकृत्या विसर्जनीयं मन्यते कखयोः पफयोश्च प्रत्ययथोः शाकल्यः, कखयोर्भवति यथा (१२अ० ५क०) विष्णोः क्रमं ÷ विष्णोः क्रम ÷, (११अ० २२क०) तत्तं ÷ खनेम तत्तं ÷ खनेम, पफयोर्भवति यथा (८अ० १क०) देवं सवितुः प्रसुवं देवं सवितुः प्रसुव, (१२अ० ८८क०) याः फलिनीः याः फलिनीर्याऽअफलाः, कखयोः पफयोश्चेति पृथक्करणमुत्तरार्थम् ॥

जिह्वामूलीयोपध्मानीयौ शाकटायनः ॥ १२ ॥

जिह्वामूलीयोपध्मानीयौ विसर्जनीय आपद्यते यथासंख्यम् कखयोर्जिह्वामूलीयमापद्यते पफयोस्तूपध्मानीयम् शाकटायनाचार्यस्य मतेन, कखयोर्यथा विष्णोः क्रमं ÷ विष्णोः क्रमं ÷, तत्तं ÷ खनेम तत्तं ÷ खनेम, पफयोर्यथा (१अ० २क०) वसोः पवित्रम् वसोः पवित्रम्, याः फलिनीः याः फलिनीर्याऽअफलाः ॥

लुङ्ङ्मुदि जित्परे ॥ १३ ॥

मुत्संज्ञकाः षषसाः, जित्संज्ञका द्वौ द्वौ प्रथमौ षषसाश्च, तत्र षषसेषु "प्रत्ययसवर्णमिति" विसर्जनीयसन्धिरुक्तः अत इह दशैव जित्संज्ञका गृह्यन्ते, लुक् लुप्यते विसर्जनीयो मुत्संज्ञके जित्परे परतः, यथा (३अ० २०क०) अन्धं ÷ त्य। अन्धस्त्यान्धो वो भक्षीय, (१८अ० २७क०) स्थालीभिं ÷ स्थालीः। स्थालीभिस्त्थालीरापूरयति, मुदि जित्पर इति किम् (२५अ० १८क०) स्वस्ति नं ÷ तार्क्ष्यं ÷। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति ॥

उपवसने पीवः ॥ १४ ॥

उपवसने प्रत्यये पीवश्शब्दसम्बन्धी विसर्जनीयो लुप्यते, यथा (२१अ० ४३क०) पीवः उपवसनानाम् पीवोऽपवसनानाम् ॥

सऽओषधीमयोः ॥ १५ ॥

सपदसम्बन्धी विसर्जनीयो लुप्यते ओषधीमयोः प्रत्ययोः, ओषधी यथा (१२अ० ३६क०) सःऽओषधीः सौषधीरनुरुध्यसे, द्रुम यथा (२८अ० ५४क०) सः द्रुमाम् सेमान्नो हव्यदातिं जुषाणः ॥

व्यञ्जने च ॥ १६ ॥

व्यञ्जने च प्रत्यये सपदसम्बन्धी विसर्जनीयो लुप्यते, यथा (३अ० २६क०) सः नः स नो बोधि श्रुधी हवम्, (१५अ० २८क०) सः जायसे मत्यमानः, व्यञ्जन इति किम्, (१५अ० ४२क०) सः अग्निः साऽग्निर्यो वसुर्गृणे ॥

स्य एष च ॥ १७ ॥

स्यएषपदयोः सम्बन्धी विसर्जनीयो लुप्यते व्यञ्जनमात्रे, यथा (२२अ० १३क०) स्यः रात्र्याः एष स्य रात्र्या एषा, (८अ० १४क०) स्यः वाजी एष स्य वाजी क्षिपणिम्, (२५अ० २६क०) एषः छागं ÷ एष छागं ÷ एषोऽअश्वेन ॥

निशब्दो बहुलम् ॥ १८ ॥

निशब्दः पदान्तीयो लुप्यते बहुलम्, शृङ्गा शृङ्गाणीति प्राप्ते यथा (१७अ० ९१क०) चत्वारि शृङ्गा त्रयोऽस्य पादाः, पदा पदानीति प्राप्ते यथा (३४अ० ४३क०) त्रीणि पदा विचक्रमे, बहुलग्रहणात् क्वचिन्न च लोपो भवति, यथा (८अ० ४३क०) एता तेऽअग्ने नामानि, क्वचिदिकारमात्रस्य

भवति, एमन् एमनीति प्राप्ते यथा (१३अ० ५३क०) एमन् आदयामि, क्वचिन्नकारमात्रस्य भवति इष्कर्त्तारम् निष्कर्त्तारमिति प्राप्ते यथा (१२अ० ११०क०) इष्कर्त्तारमहरत्, इत्यंभूतपदाद्यन्तप्रज्ञप्त्यर्थं बहुलग्रहणम् ॥

अनितावध्याये ॥ १९ ॥

अस्मिन्नध्यायशेषे येऽन्तःपद आगमा विकाराश्च वक्ष्यन्ते ते अनितौ इतिकरणे परत्वावस्थिते न भवन्तीति सूत्रार्थः। यथा (३अ० ५८क०) श्रेयस्कर श्रेय÷करेति, (१अ० १६क०) चक्षुषाः चक्षुः पा इति, (३४अ०२०क०) स्वर्षाम् स्वः सामिति, (४अ० ३३क०) धर्षाहो धूः सहाविति, (३अ० ३६क०)दूडभ÷दुर्दभ इति, (३३अ० ११क०) वनर्षद÷ वनसद् इति, (३०अ० १८क०) अवरस्पराय अवरपरायेति, (२८अ० ५५क०) दुदुक्षन् दुधुक्षन्निति, (१८अ० २क०) सुषाव सुसाविति, (११अ० ४४क) पुरीषवाहनः पुरीषवाहनऽइति, (१७अ०५५क०) मामहानः ममहानऽइति, (७अ० ४ क०) वृष्टिमाँ२ऽइव वृष्टिमानिवेति, अध्यायशेष इति किम्, (११अ० १५क०) तवस्तरमिति तव÷ । तरम्, अचेतिकरणे परत्वावस्थितेऽपि सकारो विद्यत एव अस्यावधेः प्राग्भूतत्वात् ॥

इतिवच्चर्चायाम् ॥ २० ॥

इतिकरणात् पुरतो यत् पुनः पदवचनं तच्चर्चाशब्देनोच्यते तत्रेतिवत् इतावित्र। यथा इतिकरणे परत्वावस्थिते आगमविकाराश्च न भवन्ति एवमिहापि न भवन्ति। यथा श्रेयः कर, चक्षुः पाः। स्वः साम्, धूः सहौ, दुः दभः। वन सदः। अवरः पराय। सु चन्द्र। दुधुक्षन्। सुसाव। पुरीषवाहनः। ममहानः। वृष्टिमान् इव। एवं ह्याहुः "लोपागम-

विकारांश्च नैवेतिकरणे स्मृताः । अवग्रहस्तु चर्चायामितिना चोपदिश्यते ॥

ककारपकारयोः सकारम् ॥ २१ ॥

विसर्जनीयोऽधिकृतः स यथादिष्टं ककारपकारयोः प्रत्ययोः सकारमापद्यते, यद्यप्यत्राविशेषेण सकार उक्तः तथापि कण्ठ्यपूर्वस्यैव सकारः, अकण्ठ्यपूर्वस्य तु षकारोऽभिप्रेतः, यतः "क्षुधीश्च क्षुधो सकारमिति" अकण्ठ्यपूर्वस्य सकारं विदधाति, अतोऽकण्ठ्यपूर्वस्य षकारो भवतीति निश्चीयते ॥

भाव्युपधः षकारम् ॥ २२ ॥

अकण्ठ्यो भावोत्युक्तम् भाव्युपधो विसर्जनीयः षकारमापद्यते ककारपकारयोः प्रत्ययोः । कण्ठ्यपूर्वस्य तु सकार एव । एतयोरुदाहरणान्यग्रेतनसूत्रेषु द्रष्टव्यानि । अधिकारसूत्रमेतत् ॥

आविर्निरिडडायावसतिर्वरिवः ॥ २३ ॥

आविः निः इडः इडायाः वसतिः वरिवः इति एतेषां विसर्जनीयः सकारं षकारं चापद्यते यथायोगं ककारपकारयोः प्रत्ययोः । यथा (१३अ० १३क०) आविः + कृणुष्व, आविष्कृणुष्व, निः) यथा (६अ० २६क०) अस्मन्निष्टरसमरीर्विदाम्, इडः) यथा (१५अ० ३ क०) इडस्पदे समिध्यसे, इडायाः यथा (४अ० २२क०) इडायास्पदमसि । वसतिः) यथा (१२अ० ७८क०) पूर्णवो वसतिष्कृता, वरिवः यथा (५अ० ३७क०) अयन्नोऽग्निर्वरिवस्कृणोतु ॥

दिवोऽकक्रुत्पृथिव्योः ॥ २४ ॥

दिव इत्येतस्य सम्बन्धी विसर्जनीयः सकारमापद्यते ककुत्-

पृथिवीशब्दौ वर्जयित्वा। यथा (४अ० ३५क०) द्यि॑वः॑) पृ॒ष्ठाय॑ द्यि॒वस्पृ॒ष्ठाय॒ सू॒र्य्या॑य, (१५अ० ६१क०) द्यि॒वस्पृ॒ष्ठे व्यच॑स्वतीम्, (१५अ० ५८क०) दिवस्पृ॒ष्ठे ज्योति॑ष्मतीम्, अककुत्पृथिव्योरिति किम्, (३अ० १२क०) अ॒ग्निर्म॒र्द्धा द्यि॒वः॑) क॒कुत्, (२८अ० ५३क०) द्यि॒वः॑ पृथि॒व्याः॑) पर्य्यो॑ज॑ + ॥

रायः सहसः पोषपुत्त्वयोः ॥ २५ ॥

रायः सहस इत्येतौ विसर्जनीयौ सकारमापद्येते यथासंख्यं पोषपुत्त्वयोः परयोः, रा॒यः॑ यथा (४अ० २२क०) रा॒यः॑ पोषे॑ण, मा व॒यꣳ॑ रा॒यस्पोषे॑ण॒ वि यौ॑ष, सहसः यथा (११अ० ७०क०) सह॑सः॑ पुत्रः॑) सह॑सस्प्रो॑ऽभङ्क्त॑॑ः ॥

तमसोऽपरस्तात् ॥ २६ ॥

तमस इत्ययं विसर्जनीयः सकारमापद्यते परस्ताच्छब्दं मुक्त्वा, यथा (१२अ० ७३क०) तम॑सः॑ पा॒रम् तम॑स्पा॒रम॒स्य, अपरस्तादिति किम् (३१अ० १८क०) आ॒दि॒त्यव॑र्णं॒ तम॑सः॑ प॒रस्ता॑त् ॥

तपसस्पृथिव्याम् ॥ २७ ॥

तपस इत्ययं विसर्जनीयः पृथिव्यां प्रत्यये सकारमापद्यते, यथा (३७अ० १६क०) ध॒र्त्ता द्यि॒वो वि॑भा॒ति॒ तप॑सस्पृथि॒व्याम्।

अध्वनो रजसो रिषः स्पृशस्पातौ ॥ २८ ॥

अध्वनः रजसः रिषः स्पृशः एतं विसर्जनीयाः पातौ प्रत्यये सकारमापद्यन्ते, अध्वनः यथा (३अ० १९क०) अध्व॑न॑ः॑ पा॒तु पषाऽध्व॑नस्पा॒त्विन्द्रा॑य। रजसः यथा (१७अ० ६०क०) रज॑सः॑ पा॒ति॒ रज॑सस्पा॒त्यन्तौ॑, रि॒षः॑ यथा (१८अ० ७३क०) रि॒षः॑ पा॑तु स नो॑ दि॒वा स रि॒षस्पा॑तु न॒क्तम्, पाताविति धातु-

ग्रहणम् क्वत इहापि भवति, (३अ० ४८क०) देव॒ ऋिषस्॑ाहि स्पृशः यथा (३७अ० ११क०) स॒ꣳस्पृ॑शस्स्वाहि ॥

अध्वनस्कु॒र्विति च ॥ २९ ॥

अध्वन इत्ययं विसर्जनीयः कुर्वित्येतस्मिंश्च प्रत्यये सकारमापद्यते, यथा (२६अ० १क०) सका॒मँ॑ाऽ२॥ अध्वनस्कुरु ॥

समानपदे च ॥ ३० ॥

एकस्मिंश्च पदे यो विसर्जनीयः स ककारपकारयोः प्रत्ययोर्य्यथायोगं सकारं षकारं चापद्यते, यथा (१०अ० २८क०) श्रेय॑ः÷ कर श्रेयस्कर, भूय॑ः÷ कर भूयस्कर, (२२अ० १क०) आ॒यु॑ः पाः॑ आयुष्पा॑ः ॥

पराववसाने ॥ ३१ ॥

अवसानस्थे परीत्येतस्मिन् पदे प्रत्यये अधस्तनपदसम्बन्धी विसर्जनीयः सकारमापद्यते, यथा (१२अ० ९१क०) ओष॑धय॒ः परि॑ द्विवऽओषधय॒स्परि॑, अवसान इति किम् (१३अ० ४५क०) तम॑ग्ने हेड॒ः परि॑ ते दधक्तु ॥

कविष्करत्कृधिषु ॥ ३२ ॥

कविः करत् कृधि एतेषु च पदेषु प्रत्ययेषु अधस्तनपदसम्बन्धी विसर्जनीयः सकारं षकारं चापद्यते, कविः यथा (१५अ० ३१क०) वसु॑÷ क॒विः॑ सऽइ॑धा॒नो वसुष्क॒विः, करत् यथा (३अ० ५८क०) यथा॑ नो वस्य॒स॒ः करत् यथा॑ नो वस्य॒सस्करत्, कृधि यथा (४अ० १४क०) पुन॑÷ कृधि॒ प्रबुधे॑ न॒ः पुन॑स्कृधि ॥

कृषीश्च कृधौ सकारम् ॥ ३३ ॥

कृधौ च प्रत्यये कृषीरित्ययं विसर्जनीयः सकारमापद्यते,

यथा (४अ० १०क०) कृषीः। कृधि सम्स्याः। कृषीस्कृधि, ननु कविष्करत्कृधिष्विति क्रधौ क्षषोरिति विसर्जनीयस्य सकारः प्राप्तः किमनेन सूत्रेण क्रियते एवन्तर्ह्यकण्ठ्योपधस्य षकारोऽभिप्रेतः स मा भूदिति सकारविधानम् यस्माच्च ज्ञापकादकण्ठ्योपधः षकारमापद्यते इत्येतदध्यवस्यामः॥

सदो द्यौर्नमस्कृतम्पितापथेषु ॥ ३४ ॥

सदः द्यौः नमः एतेषां सम्बन्धी विसर्जनीयः यथासङ्ख्यं कृतं पिता पथ इत्येतेषु पदेषु प्रत्ययेषु सकारषकारावापद्येते, सदः यथा (१३अ० ८क०) येषामस्सु सदस्कृतम्, द्यौः यथा (२अ० ११क०) उपश्रुतो द्यौष्पिता, नमः यथा (१८अ० ५४क०) विश्वायुः शर्म सप्रथा नमस्सथे॥

पतितालव्यस्वरोदये ॥ ३५ ॥

पतिशब्दे तालव्यस्वरोदये प्रत्ययेऽधस्तनपदसम्बन्धी विसर्जनीयः सकारमापद्यते। यथा (५अ० ४५क०) वाचःऽ पतिम् वाचस्पतिं विश्वकर्माणमूतये, (३४अ० ५८क०) ब्रह्मणः पुत्र ब्रह्मणस्पत त्वमस्य, (७अ० १क०) वाचःऽ पतये वाचस्पतये पवस्व॥

पदे च ॥ ३६ ॥

पतिशब्दे च पदे एतद्भवति न पदावयवे यथा (८अ० ४५क०) वाचःऽ पतिम्, पद इति किम् (२३अ० ६३क०) यतो जातः प्रजापतिः, (८अ० ५४क०) परमेष्ठ्यभिधीतः प्रजापतिः॥

न परुषः परुषि ॥ ३७ ॥

परुष इत्ययं विसर्जनीयः परुषि प्रत्यये न सकारमापद्यते,

यथा (१३अ० २०क०) पर॑षः परषस्परि, समानपदे चेति प्राप्तस्य प्रतिषेधः ॥

वाजपतिर्वासऽएदिधिषुरन्तःपर्श्व्येनान्तः-पार्श्व्यमिति च ॥ ३८ ॥

वाजपतिः वासः एदिधिषुः अन्तःपर्श्व्येन अन्तःपार्श्व्यमित्येते विसर्जनीयाः यथाप्राप्तं न सकारषकारावापद्येते, (११अ० २५क०) वाज॑पतिः क॒विः॒ "कविः करत्क्रधिष्विति" प्राप्तिः (३०अ० १२क०) वास॑ः पल्यू॒लीम्, (३०अ० ६क०) ए॒दि॒धि॒षु॑ः पतिम्, "समानपदे च" इत्युभयोः प्राप्तिः अन्त॑ः॒पर्श्व्येन॑ यथा (३६अ० ८क०) अन्त॑ः॒पर्श्व्येनो॒ग्रम्, अन्तःपार्श्व्यम् यथा (३६अ० ६क०) अ॒न्त॑ः॒पार्श्व्यम्॑ हाटे॒वस्य॑, "समानपदे च" इत्युभयोः प्राप्तिः ॥

अहः पतौ रेफम् ॥ ३९ ॥

अहरित्ययं विसर्जनीयः पतिशब्दे प्रत्यये रेफमापद्यते, यथा (६अ० २०क०) अ॒हर्प॑तये स्वाहा॑, समानपद इति प्राप्ते सकारे तदपवादो रेफः ॥

परश्च मूर्ध्न्यम् ॥ ४० ॥

इत उत्तरं लोपागमवर्णविकारान् वक्ष्यामः ते तावद्भविष्यन्ति परश्च दन्त्यो मूर्ध्न्यमापद्यते अधिकारसूत्रमेतत् ॥

स्वर्धूः साऽसहयोः ॥ ४१ ॥

स्वः धूः एतौ विसर्जनीयौ रेफमापद्यते यथासंख्यं साऽसहयोः प्रत्ययोः परश्च दन्त्यो मूर्ध्न्यमापद्यते । स्वः यथा (३४अ० २०क०) स्व॑ः साम॑ स्व॒र्षामृ॒षिं॑ वृ॒जन॑स्य गो॒पाम्, धूः यथा (४अ० ३३क०) धू॒र्षा॒ड्भ्यो यु॒ज्येभ्या॑म् ॥

उकारं दुर्दे ॥ ४२ ॥

दुरित्ययं विसर्जनीय उकारमापद्यते दकारे प्रत्यये उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते। यथा (३अ० ३६क०) दुः दर्भ ÷ परि ते दूडभो रथं ÷ ॥

नाशे च ॥ ४३ ॥

नाशे च प्रत्यये दुरित्ययं विसर्जनीय उकारमापद्यते उकारात्परश्च दन्त्यो मूर्द्धन्यमापद्यते। यथा दुः नाशः दूणाशः मृग्यमुदाहरणम् ॥

पुरो दाशे ॥ ४४ ॥

पुर इत्ययं विसर्जनीयो दाशे प्रत्यये उकारमापद्यते परश्च मूर्द्धन्यम् यथा पुरः दाशः अत्र रूपसिद्धिः विसर्जनीयादेशस्योकारस्य चोपधाकारस्य च उवर्ण अकारमित्येकादेश ओकारः ततः परस्य दकारस्य डकारः, (१८अ० २०क०) पुरोडाशैर्ऋ-वीष्या ॥

अनसो वाहौ सकारो डकारम् ॥ ४५ ॥

अनश्शब्दः सान्तः तस्य वाहौ प्रत्यये सकारमापद्यते। यथा (३५अ० १३क०) अनस् वाहम् अनड्वाहमन्वारभामहे ॥

उकारमितः सिञ्चतौ सोपधः ॥ ४६ ॥

इतः शब्दसम्बन्धी विसर्जनीय उपधासहित ओकारमापद्यते सिञ्चतौ प्रत्यये परश्च मूर्द्धन्यम्। यथा (१८अ०२क०) इतः सिञ्चत परीतो षिञ्चता सुतम् ॥

षड्दशदन्तयोः सङ्ख्ययोऽर्थयोश्च ॥४७॥

षडित्येतस्य शब्दस्य च शब्दादन्त्यो वर्णः सोपध ओकारमापद्यते परश्च मूर्द्धन्यं दशदन्तयोः प्रत्ययोर्यथासंख्यं संख्या-

वयसोरभिधायकयोः । यथा (१८अ० २५क०) षट् दश षोडश च मे, षट् दन्ता अस्येति षोडन्तः एतच्च शिष्यव्युत्पादनार्थं न हि संहितायामुदाहरणं लभ्यते ॥

त आघादनाडम्बरात् ॥ ४८ ॥

आघाशब्दात्परस्तकारः परश्च मूर्ध्न्यमित्यनेन मूर्ध्न्यमापद्यते स चेदाघाशब्द आडम्बरशब्दात् परो न भवति । यथा (२४अ० ३५क०) दारु आघातः गोधा कालका दार्वाघाटः, अनाडम्बरादिति किम् (३०अ० १८क०) शब्दायाडम्बराघातम् ॥

वनसदोऽवेटो रेफेण ॥ ४९ ॥

वनशब्दः सदशब्दे प्रत्यये रेफेण व्यवधीयते स चेद्वनशब्दो वेट्शब्दात् परो न भवति । यथा (३३अ० १क०) वनसद ऋवनर्षदो वायवो न सोमाः, अवेट् इति किम् (१७अ० १२क०) बर्हिषदे वेड्ड नसदे वेट् ॥

पत्यौ च सकारेण ॥ ५० ॥

पतिशब्दे च प्रत्यये वनशब्दः सकारेण व्यवधीयते, यथा (२८अ० ३५क०) वनपतिः वनस्पतिः शमिता देवः ॥

ऋतावरौ च पतिपरयोः ॥ ५१ ॥

ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासङ्ख्यं पतिपरयोः प्रत्ययोः, यथा (२७अ० ३४क०) ऋतपते ऋतस्पते त्वष्टुर्जामातरद्भुत, (३०अ० १८क०) अवरपराय अवरस्पराय ग्रह्मम् ॥

तद्वृहतौ करपत्योस्तलोपश्च ॥ ५२ ॥

तत् वृहत् एतौ करपतिशब्दयोः प्रत्ययोर्यथासङ्ख्य

सकारेण व्यवधीयेते पूर्वपदयोश्च तकारलोपो भवति। यथा (११अ० ७८क०) तत् करान् तस्क'राँ२॥ऽउत्, (२५अ० १९क०) बृहत् पतिः बृहस्पति+॥

परिक्रते षकारेण॥ ५३॥

परीत्येतत्पदं क्रते प्रत्यये षकारेण व्यवधीयते, यथा (२१अ० ४२क०) परिक्रताः परिष्कृताः शुक्राः ऽ॥

चन्द्रे सु शकारेण॥ ५४॥

चन्द्रे प्रत्यये सुशब्दः शकारेण व्यवधीयते। यथा (१५अ० ४३क०) सुचन्द्र उभे सु'श्चन्द्र सर्पिष'+॥

दुधुक्षन्धो दकारम्॥ ५५॥

दुधुक्षत्रित्येतस्य शब्दस्य धकारो दकारमापद्यते, यथा (३३अ० २८क०) दुधुक्षन् सहस्रधाराम्बृहतीन्दुदु'क्षन्॥

भाविभ्यः सः षठ० समानपदे॥ ५६॥

अकण्ठ्यो भावीत्युक्तम् भाविभ्य उत्तरः सकारः षकारमापद्यते एकपदस्थो चेद्भाविसकारो भवतः, यथा (१अ० २५क०) गोस्थानम् व्रजङ्'क्ष गोष्ठानम्, (८अ० ५४क०) परमेस्थी परमे'ष्ठ्यभिधी'तः, (१९अ० २क०) सुषाव सोमम्, (२५अ० ४६क०) सीसधाम सी'षधामेन्द्र'श्च, भाविभ्य इति किम् (९अ० २क०) ध्रुवसदन्त्वा, समानपद इति किम् (१२अ० ३क०) वि सी'मतः सुरुचं+॥

अनुस्वाराच्च तत्पूर्वात्॥ ५७॥

अनुस्वाराच्च परः सकारः षकारमापद्यते, भाविपूर्वात् यथा (१३अ० ९क०) तपू'ष्यग्ने, (१९अ० २०क०) पुरोडाशै'-

र्ष्वीण्या, तत्पूर्वादिति किम् (१७अ० ४२क०) उत्सस्त्वना-म्नामकानाम्नानाण्सि ॥

करेफाभ्याञ्च ॥ ५८ ॥

ककाररेफाभ्यां च परः सकारः षकारमापद्यते, ककारा-द्भवति यथा (१६अ० ६क०) दिक् सु ये चैनꣳ० कुद्राऽभितो ट्रिक्षु, ऋक् सु ऋक्षु, रेफाद्भवति यथा (३३अ० १क०) गौः सु गौर्षु, धूः सु धूर्षु, ननु च यत्र पदकारोऽन्यथाभूतं पदं करोति अन्यथा चार्षसंहिता तत्रैव लक्षणं कर्त्तुं युज्यते, यथा सुसाव सुषाव, यत्र पुनः पदकारस्य चार्षसंहितायाश्च समान-वाक्यत्वं तत्र लक्षणं न घटते व्याकरणस्य विषयः सत्यमेव यदि नाम प्रसङ्गमुपजीवदाचार्य्येण शिष्यव्युत्पत्त्यर्थं कश्चिद्व्याकरण-लक्षण इहासञ्चितः एवं संहितायामविद्यमानेषु लक्षणं द्रष्ट-व्यम्, अथवा यथा एधाहारस्य मध्वाहरणमुदकाहारस्य मत्स्या-हरणं पुष्पाहारस्य फलाहरणम् एवमेतदपि एवं च कृत्वा अदोष एवेति ॥

नेः सीदतेः ॥ ५९ ॥

नेः परस्य सीदतेः सकारः षकारमापद्यते । यथा (७अ० ३४क०) नि सीदत एदं बर्हिर्निषीदत ॥

ससाद च ॥ ६० ॥

नेःपरस्य ससादशब्दस्य सकारः षकारमापद्यते, यथा (१०अ० २७क०) नि ससाद नि षसाद धृतव्रतः, असमान-पदार्थ आरम्भः ॥

ओकारात्तु ॥ ६१ ॥

ओकारात्परादात्परः सुसकारः षकारमापद्यते, यथा (३अ० ४६क०) मा सुनः मा षूणः॥

ऊञ्चापृक्तात् ॥ ६२ ॥

एकवर्णं पदमपृक्तमित्युक्तम् ऊकाराच्चापृक्तसंज्ञात्परः सुसकारः षकारमापद्यते, यथा (११अ० ४२क०) ऊँ इति ऊ सु नः ऊर्ध्वऊषुणः॥

अभेश्च ॥ ६३ ॥

अभेरुपसर्गाच्च परः सुसकारः षकारमापद्यते, यथा (३६अ० ६क०) अभि सु नः अभीषुणः सखीनाम्॥

परेश्च सिञ्चतेः ॥ ६४ ॥

परेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते, यथा (१८अ० २८क०) परि सिञ्चन्ति॥

अभेश्च ॥ ६५ ॥

अभेरुपसर्गाच्च परः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (८अ० ३०क०) अभि सिञ्चामि अभिषिञ्चाम्यसौ॥

अव्यवहितोऽपि ॥ ६६ ॥

अकारव्यवहितोऽप्यभेरुत्तरः सिञ्चतेः सकारः षकारमापद्यते संहितायाम्, यथा (१०अ० १क०) अभ्यसिञ्चन् याभिर्मित्रावरुणावभ्यषिञ्चन्॥

वेर्यदयः ॥ ६७ ॥

वेरुपसर्गात्परः सकारो यकारोदयः षकारमापद्यते, (१२अ० ६५क०) विस्यामि तन्त्रे विष्याम्यायुष्मो न मध्यात्

यकारोदय इति किम् (७अ० ४५क०) विष्टः पश्यन्नन्तरि-क्षम् ॥

हेर्मिथोदयः ॥ ६८ ॥

हिशब्दात् परः सकारो मकारोदयो वा यकारोदयो वा षकारमापद्यते, मकारोदयो यथा (३अ० ४६क०) हि स्म अस्ति हि ष्मा ते शुष्मिन्नवयाः), यकारोदयो यथा (११अ० ५०क०) हि स्था आपो हि ष्ठा मयोभुवः ॥

द्यवेश्च ॥ ६९ ॥

द्यविशब्दाच्च परः सकारः षकारमापद्यते यथासम्भवं मकारोदयः यकारोदयश्च संहितायाम्, यथा (३३अ० ५२क०) द्यवि स्थ येऽअन्तरिक्षेऽयऽउप द्यविष्ठ ॥

नेः स्थास्तनोः ॥ ७० ॥

नेरुपसर्गात् परयोः स्थास्तन्योर्धात्वोः सकारः षकारमाप-द्यते संहितायाम्, यथा (६अ० १५क०) निः स्थायताम् आर्त्या-यतान्निष्ठायताम्, निस्तनिहि (२८अ० ५६क०) निष्टनिहि दुरिता बाधमानः ॥

ततक्षौ ॥ ७१ ॥

ततक्षुरित्येतस्मिन्नुत्तरपदे निरुपसर्गसम्बन्धिविसर्जनीय-सकारः षकारमापद्यते। यथा (१७अ० ८२क०) निः ततक्षुः स्रुचया निष्टतक्षुः ॥

अनोः स्तुवन्त्याम् ॥ ७२ ॥

अनोरुपसर्गात् परः स्तुवन्तिसकारः षकारमापद्यते। यथा (३३अ० ९७क०) अनु स्तुवन्ति अनुष्टुवन्ति पूर्वथा ॥

दुष्वप्नाम् ॥ ७३ ॥

निपातनसूत्रमेतत् भाविभ्य उत्तरस्य सकारस्य षत्वमित्युक्तं समानपदे इह तु विसर्जनीयेन व्यवधानान्न प्राप्नोति अतः षत्वं निपात्यते संहितायाम्, यथा (३५अ० ११क०) दुःष्वप्नम् अप दुःष्वप्नाठ० सुव ॥

वन्दारुर्माकिः ॥ ७४ ॥

वन्दारुः माकिः अनयोर्विसर्जनीयस्य सकारः षकारमापद्यते संहितायाम्, तथयोः सर्मिति विसर्जनीयस्य सकार उक्तस्तस्यैव षत्वम्, यथा (१२अ० ४२क०) वन्दारुः ते वन्दारुष्टे तन्वं वन्दे अग्ने, (१३अ० ११क०) माकिः ते माकिष्टे व्यथिरादधर्षीत् ॥

सहेः पृतनायाः ॥ ७५ ॥

एतदपि निपातनसूत्रम् अभाविपूर्वत्वात् षकारो न प्राप्नोति स निपात्यते। यथा (१८अ० ६८क०) पृतनासाह्याय च पृतनाषाह्याय च ॥

सधिरठ०शुरदितिः ॥ ७६ ॥

सधिः अꣳशुः अदितिः एतेषां विसर्जनीयसकारः षकारमापद्यते संहितायाम्, सधिः यथा (१२अ० ३६क०) सधिः तव सधिष्टव सौषधीः, अꣳशुः यथा (५अ० ७क०) अꣳशुः ते अꣳशुष्टे देव सोम, अदितिः यथा (११अ० ६१क०) अदितिः त्वा अदितिष्ट्वा देवी ॥

वायुरग्निरग्नेरेकाक्षरे ॥ ७७ ॥

वायुः अग्निः अग्नेः एतेषां विसर्जनीयसकारः षकारमापद्यते एकाक्षरे पदे प्रत्यये, यथा (१४अ० १४क०) वायुः ते वायुष्टेऽधिपतिः, (१३अ० २४क०) अग्निः ते अग्निष्टेऽधिपतिः,

(२अ० ११क०) अग्नेः॑ त्वा अ॒ग्नेष्टवा॒स्येन, एकाक्षर इति किम् (१७अ० १६क०) अग्निः॑ तिग्मे॒न अ॒ग्निस्ति॒ग्मेने॑ शोचिषा॑, (१अ० १५क०) अग्नेः॑ तनूः॑ अ॒ग्नेस्त॒नूर॑सि ॥

सकारपरे च ॥ ७८ ॥

सकारः परो यस्मादेकाक्षरात् स तथोक्तः तस्मिन्नेकाक्षरे प्रत्यये च शब्दादवस्तनपदसम्बन्धो विसर्जनीयसकारः षकारमापद्यते संहितायाम्, यथा (४अ० २१क०) बृहस्पतिः त्वा सुम्ने बृ॒हस्प॑तिष्टवा॒ सुम्ने, (१३अ० १७क०) प्रजापतिः त्वा सादयतु प्र॒जाप॑तिष्टवा॒ सादयतु, सकारपर इति किम् (२अ० ८क०) विष्णो॑स्त्वा क्रमताम् (१अ० ३१क०) स॒वि॒तुस्त्वा॑ प्रस॒वे ॥

मात्रभिरर्चिभिः पायुभिर्वरूत्रीः ॥ ७९ ॥

मात्रभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां च पदानां विसर्जनीयसकारः षकारमापद्यते एकाक्षरे प्रत्यये, मात्रभिः यथा (१२अ० ३८क०) मात्रभिः त्वम् मा॒त्र॒भि॒ष्ट्वम्, अर्चिभिः यथा (१२अ० ३२क०) अर्चिभिः त्वम् अ॒र्चि॒भि॒ष्ट्वम्, पायुभिः यथा (३३अ० ६८क०) पायुभिः त्वम् पा॒यु॒भि॒ष्ट्वम्, वरूत्रीः यथा (११अ० ६१क०) वरूत्रीः त्वा वरू॑त्रीष्टवा॒ देवीः॑ ॥

षात्तथौ मूर्ध्न्यम् ॥ ८० ॥

षकारात्परः तकारथकारौ मूर्ध्न्यमापद्यते विकारौ यथा सन्नमिति परिभाषितत्वात् तकारस्य टकारः थकारस्य ठकारः, यथा (११अ० ६१क०) वरू॑त्रीष्टवा (२अ० १क०) कृष्णो॑ऽस्याखरे॒ष्ठः ॥

प्रकृत्या नानापदस्थे तकारे ॥ ८१ ॥

इत उत्तरं प्रकृत्या सकारो भविष्यति समानपदस्थः

नानापदस्थस्तु यः प्रकृतिभावः स तकारे प्रत्येतव्यः। अपवादसूत्रमेतत्॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दृशमभिसत्त्वाऽभिसंविशन्तु सुसस्याऽतिस्थूलम्मुसलेपत्क्रीसँय्याजान् क्रतुस्थलाञ्जिसक्थो दिविस्पृशा हृदिस्पृशर्ठ० हिँसौर्ऋक्सामयोर्ऋक्सामाभ्यान्तित्तिरिः सीसेन सीसाः सोसम्पशुसनिगोसनि प्रतिसट्टङ् प्रतिसट्टचासश्चतुस्खिँश्यत्॥ ८२॥

अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसंदृशम् अभि सत्त्वा अभि संविशन्तु सुसस्याः अतिस्थूलम् मुसले पत्नीसंयाजान् क्रतुस्थला अञ्जिसक्थः दिविस्पृशाः हृदिस्पृशम् हिँसौः ऋक्सामयोः ऋक्सामाभ्याम् तित्तिरिः सीसेन सीसा सोसम् पशुसनि गोसनि प्रतिसट्टङ् प्रतिसट्टचासः चतुस्खिँश्यत् एते सकाराः प्रकृत्या भवन्ति सकारः षकारं प्राप्नोति स निषिध्यत इति सूत्रार्थः, इदानीमुदाहरणानि दीयन्ते। अनुसन्तनोतु यथा इदम्मे कर्मेदं वीर्य्यम्मेऽनुसन्तनोतु, बृहस्पतिसुतस्य यथा (८अ० ८क०) बृहस्पतिसुतस्य देव, सुसमिद्धाय यथा (३अ० २क०) सुसमिद्धाय शोचिषे, सुसन्दृशम् यथा (३अ० ५२क०) सुसन्दृशम्त्वा वयम्, अभि सत्वा यथा (१७अ० ३७क०) अभि वीरोऽअभि सत्त्वा सहोजाः, अभि संविशन्तु यथा (१३अ० २५क०) इन्द्रमिव देवाऽअभि संविशन्तु, सुसस्याः यथा (४अ० १०क०) सुमस्याः कृषीष्कृधि, अतिस्थूलम् यथा (३०अ० २२क०) अतिस्थूलन्त्वातिकृशञ्च,

मुसले यथा उलूखलमुसले, पत्नीसँय्याजान् यथा (१६ अ० २६ क०) शँय्नो पत्क्नीसँय्याजान्, क्रतुस्थला यथा (१५ अ० १५ क०) पुञ्जिकस्थला च क्रतुस्थला च, अञ्जिमक्थो यथा (२४ अ० ४ क०) शितिकक्षोञ्जिमक्थः, दिविस्पृशा यथा (१५अ० २७क०) घृतप्रतीको बृहता दिविस्पृशा, हृदिस्पृशम् यथा (१५अ० ४४क०) क्रतुन्न भद्रए हृदिस्पृशम्, एतेषां पदानां सकारो भाव्युपधत्वात् षत्वं प्राप्नोति तस्यैतेन प्रकृतिभावः, हिए्सीः यथा (४अ० १क०) स्वधिते मैनए हिंठ०सीः अनुस्वाराच्च तत्पूर्वादिति प्राप्तिः, ऋक्सामयोः यथा (४अ० ६क०) ऋक्सामयोः शिल्पे ऋक्सामाभ्याए सन्तरन्तः, करेफाभ्याञ्चेति प्राप्तिः, तित्तिरिः यथा (२४अ० ३६क०) तित्तिरिस्ते मर्पाणाम्, एकाक्षरे सकारपरे चेति प्राप्तिः, इदमर्थेन च नानापदस्थे तकार इति सूत्रावयवः कृतः अन्यथातित्तिरिपदे सकारो न विद्यत इति मोहः स्यात्, सीसेन यथा (१६अ० ८०क०) सीसेन तन्त्रं मनसा, सीसाः यथा (२३अ० ३७क०) रजता हरिणीः सीमायुजो युज्यम्, सौसम् यथा (१८अ० १३क०) सौसञ्च मे, पशुसनि यथा (१६अ० ४८क०) प्रजासनि पशुसनि, गोसनिर्यथा (८अ० १२क०) यो गोसनिस्तस्यऽत इष्टयजुषः। प्रतिसट्टङ् यथा (१७अ० ८१क०) मट्टङ् च प्रतिमट्टङ् च, प्रतिसट्टासः यथा (१९अ० ८४अ०) प्रतिसट्टासऽएतन, चतुस्त्रिए्शत् यथा (२५अ० ४१क०) चतुस्त्रिए्शद्वाजिन+, न चात्र भाविविसर्जनीयव्यवहितः अतो नैवेह षत्वशङ्का किमनेन सूत्रावयवेनेति एवन्तर्हि येऽन्येऽपि चतुःशब्दविसर्जनीयव्यवहितास्तेषां षत्वार्थम्। (१४अ० २४क०) यथा चतुः स्तोमः चतुष्टोम+ ॥

ऋकाररेफारुदयश्च ॥ ८३ ॥

ऋकारोदयः रेफोदयः अरुदयश्च सकारः प्रकृत्या भवति, ऋकारोदयः यथा (१४अ० २८क०) तिस्रभिरस्तुवत, रेफोदयः यथा (१७अ० २४क०) तिस्रश्चमे, अरुदयः यथा (१अ० १५क०) वाचो विसर्जनम् ॥

पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः ॥८४॥

पृथिवि दिवि उपरि चर्षणि शकुनि यासि एतेभ्यो भाविभ्यः षरः सकारः प्रकृत्या भवति संहितायाम्, पृथिवि यथा (६अ० २क०) पृथिवि सदन्वा, दिवि यथा (६अ० २क०) दिवि सदन्दिवसदम्, उपरि यथा (६अ० ३६क०) उपरि सदो दुवस्वन्तः, चर्षणि यथा (२८अ० १क०) चर्षणीसहा वेत्तु, शकुनि यथा (२५अ० ३क०) शकुनि सादनं, यासि यथा (२१अ० ३क०) अवयासि सिसीष्ठाः ॥

ऋषरेभ्यो नकारो णकारꣳ समानपदे ॥८५॥

ऋकारषकाररेफेभ्य उत्तरो नकारो णकारमापद्यते समानपदे, ऋकाराङ्गवति यथा (११अ० २७क०) नृणाम्, षकाराङ्गवति यथा (१अ० १०क०) पूषणः, रेफाङ्गवति यथा (३अ० ४९क०) पूर्णा, एते प्रत्ययनकाराः ऋषरेफेभ्य उत्तराः सन्तो णकारमापद्यन्ते, अयं तावत् सूत्रार्थो व्याकरणविषयप्रदर्शनार्थं क्रियते ॥

स्वरयवहकपैश्च ॥ ८६ ॥

स्वरैर्यकारवकारहकारैः कवर्गपवर्गाभ्याञ्च व्यवहितो नकारः ऋषरेभ्य उत्तरो णकारमापद्यते संहितायाम्, यथा (१२अ० २८क०) नृमनाः तृतीयमप्सु, नृमणाः, (११अ०

४४क०) पुरीषवाहनः अग्नेऽपुरीषवाहणः, (५अ० ३१क० प्रवाहनः विभूरसि प्रवाहणः, ऋषरेभ्य इति किम् (५अ० ३१क०) वक्षेरसि हव्यवाहनः, समानपद इति किम् (८अ० २८क०) प्र नो यच्छत्वर्य्यमा ॥

निषसाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रत्त्राणः षूणः षुणः षुणासत्या स्वर्णास्थूरि णौ प्रणऽआयूंषि ॥८७॥

निषसाय रथवाहणम् इन्द्र एणम् परिणीयते समिन्द्रणः उरुष्याणः रत्त्राणः षूणः षुणः षुणासत्या स्वर्ण अस्थूरि णौ प्रणऽआयूंषि एते च णकारा निपात्यन्ते यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम्। यथा निषसाय अत्र हयोर्नकारयोर्णत्वं निपात्यते प्रथमस्य तवर्गे चेति निषेधः उत्तरस्य तु नकारव्यवहितत्वात् नकारश्च स्वरयवहकपां मध्ये न पठ्यते, (२२अ० ८क०) निषसाय स्वाहोत्थिताय, रथवाहणं यथा (२८अ० ४५क०) रथवाहनम् थकारेण व्यवधानादप्राप्तिः अतो निपात्यते रथवाहणठं० हविरस्य नाम, इन्द्रऽएणम् यथा (२८अ० १३क०) इन्द्रऽएनम् इतऽउत्तरमसमानपदत्वादप्राप्तं णत्वं निपात्यते। इन्द्रऽएणं प्रथमोऽध्यतिष्ठत्, परिणीयते यथा (३१अ० ७४क०) परिनीयते सोऽअध्वराय परिणीयते कविः), समिन्द्रणः यथा (८अ० १५क०) इन्द्र नः समिन्द्र णो मनसा नेषि गोभिः, उरुष्याणः यथा (३अ० २७क०) उरुष्यानः उरुष्याणोऽअघायतः) समस्मात्, रत्त्राणः यथा (३अ० २८क०) रत्त्र नः रत्त्राणो ब्रह्मणस्पते, षूणः यथा (३अ० ४६क०) षूनः सोषूणऽइन्द्रात्र, षुषः यथा (२७अ० ४१क०) अभीषु नः अभीषुणः सखीनाम्, षुणा यथा (२०अ० ८१क०) गोमदूषु नासत्या

गोमदूषु सक्थ्या, स्वर्ण यथा (१८अ० ५०क०) स्वः न स्वर्ण घर्मः स्वाहा, अस्थूरि णौ यथा (२अ० २७क०) अस्थूरि नौ अस्थूरि णौ गार्हपत्यानि सन्तु, प्रण आयूंषि यथा (२३अ० ३१क०) प्र नः आयूंषि प्रण आयूंषि तारिषः, आयूंषीति किम् (३४अ० ३६क०) भग प्र नो जनय गोभिः॥

परिणऽइति शाकटायनः॥ ८८॥

परिण इति निपात्यते शाकटायनाचार्यस्य मतेन, यथा परि नः परिणो रुद्रस्य हेतिः, शाकटायन इति किम् (१६अ० ५०क०) परि नो रुद्रस्य हेतिः॥

प्र नेतिनुदातिहिनोमीनाम्॥ ८९॥

प्रपूर्वाणाम् नेति नुदाति हिनोमि एषां शब्दरूपाणां नकारो णकारमापद्यते संहितायाम्, अत्र नेतिनुदात्योर्धातुग्रहणमतः सर्वप्रत्ययान्तयोर्भवति हिनोतेस्तु विकरणनिर्देशाद्यत्र विकरणं तत्रैव भवति, नेति यथा (११अ० ८क०) प्र नय प्रणय देवाव्यम्, नुदाति यथा (१५अ० १क०) प्र नुदानः अग्ने जातान् प्रणुदानः, हिनोमि यथा (३५अ० १९क०) प्रहिनोमि क्रव्यादमग्निं प्रहिणोमि॥

प्रकृत्या पदान्तीयः॥ ९०॥

पदान्तीयो नकारो हल् प्रकृत्या भवति, समानपद इति प्राप्तिः, यथा (१९अ० ७०क०) पितॄन् हविषेऽअत्तवे, (३४अ० ४१क०) पूषन्तवं व्रते वयम्, (३अ० ४७क०) अकृन् कर्म कर्मकृतः॥

निवनिनसः प्रपीनम्॥ ९१॥

नि वनि नसः प्रपीनम् एते नकाराः प्रकृत्या भवन्ति, समानपद इति प्राप्तिः। नि यथा (२४अ० १८क०) कृष्णा

ब्रध्नमी॑काशाः, वनि यथा (१अ० १७क०) ब्रह्मवनि॑ त्वा क्षत्रवनि॑, नसः यथा (२४अ० ३८क०) वार्त्रीन॒मस्ते म॒ह्या अर॑ण्याय, प्रपीनम् यथा (१७अ० ७८क०) अ॒पाम्प्रपी॑नमग्न ॥

श्रौमनाऽइत्येके ॥ ९२ ॥

अयञ्च नकारः प्रकृत्या भवति एकेषामाचार्य्याणाम्मतेन, यथा (१७अ० ५७क०) श्रौम॑नाः घृ॒तप॑याः, एकेषामिति किम् श्रौम॑णाः घृ॒तप॑याः ॥

इन्द्राग्नी चित्रभानो वार्त्रघ्नम् दुःष्वप्नम् ध्रुवयोनिः पुरोऽनुवाक्याभिः पुरोऽनुवाक्यास्वर्मन्नम् ॥ ९३ ॥

इन्द्राग्नी चित्रभानो वार्त्रघ्नम् दुःष्वप्न्यम् ध्रुवयोनिः पुरोऽनुवाक्याभिः पुरोऽनुवाक्याः चर्मन्नम् एते च नकाराः समानपद इति प्राप्तणकाराः प्रकृत्या भवन्ति, इन्द्राग्नी यथा (२अ० १५क०) इन्द्रा॒ग्न्योरुज्जि॑तिम्, चित्रभानो यथा (२०अ० ८७क०) इन्द्रा॑याहि चित्रभानो, वार्त्रघ्नम् यथा (९अ० ८क०) इन्द्र॑स्य वार्त्र॑घ्नमसि, दुः ष्वप्नम् यथा (३५अ० ११क०) अप॑ दुः॑ष्वप्न॑ꣳ सुव, ध्रुवयोनिर्यथा (१४अ० १क०) ध्रु॒वच्चि॑तिर्ध्रु॒वयो॑निः, पुरोऽनुवाक्याभिः यथा (२०अ० १२क०) ऋच॑ ÷ पुरोऽनुवा॒क्या॒भिः, पुरोऽनुवाक्याः यथा (२०अ० १२क०) पुरोऽनुवा॒क्या॒ या॒ज्या॒भिः, चर्मन्नम् यथा (३०अ० १५क०) सा॒ध्येभ्य॑श्च॒र्म॑न्नम् ॥

तवर्गे च ॥ ९४ ॥

तवर्गे च प्रत्यये ऋषरेफेभ्य उत्तरो नकारः प्रकृत्या भवति,

यथा (७अ० १५क०) तृप्यन्तु होत्राः, (२५अ० १क०) अव-क्रन्देन तालु ॥

षादनन्तरऋकारे ॥ ९५ ॥

षकारादनन्तरो नकारऋकारे प्रत्यये प्रकृत्या भवति, यथा (३३अ० ८क०) उग्रस्वृषन्मणः ॥

शिलिसिवर्गमध्यमव्यवहितोऽपि ॥ ९६ ॥

शकारलकारसकारव्यवहितः वर्गाश्च ते मध्यमाश्च वर्ग-मध्यमाः चटतवर्गाः तैश्च व्यवहितो नकारऋषरेभ्य उत्तरः प्रकृत्या भवति, शकारव्यवहितो यथा (१२अ० १क०) दृशानो रुक्मः, (५अ० ३२क०) सम्राडसि कृशानुः, लकारव्यवहितः यथा (२५अ० २क०) निर्ऋतिर्निर्जर्जल्येन, सकारव्यवहितः यथा (१९अ० ९४क०) अपाꣳ रसेन वरुणः, चवर्गव्यवहितः यथा (२०अ० ४२क०) प्राचीनं ज्योतिः, (३अ० ७क०) अन्त-श्चरति रोचना, टवर्गव्यवहितः यथा (११अ० ९क०) वैष्टुभेन छन्दसा, (११अ० ११क०) अनुष्टुभेन छन्दसा, तवर्गव्यवहितो यथा (२९अ० ५७क०) रथिनो जयन्तु, (१०) वात्रौ हुमे, ननु शिलिसिवर्गमध्यमव्यवहितोऽपीत्यनेन सूत्रेण एतैर्वर्णैर्व्यव-हितऋषरेफेभ्य उत्तरो नकारः प्रकृत्या भवति समानपद इत्युक्तम्, तथा "ऋषरेफेभ्यो नकारो णकारꣳ समानपदे" "स्वरयवहकपैश्च" इत्यनेन एतैर्वर्णैर्व्यवहितोऽपि नकारो णका-रमापद्यते समानपदे इत्युक्तम्, एवं य एव स्वरयवहकपव्यति-रिक्ता वर्णास्त एव शिलिसिवर्गमध्यमाः अतोऽनेन सूत्रेण न प्रयोजनम् एवन्तर्ह्युभयथा लक्षणानुकथनं शिष्यबुद्धिव्युत्पाद-नार्थम् ॥

दीर्घम् ॥ ९७ ॥

विसर्जनीय इत्युपक्रम्य द्वयोर्व्यञ्जनयोः सन्धौ ये लोपागमवर्णविकारास्ते प्रतिपादिताः, अधुना स्वरस्य व्यञ्जनेन सह सन्धौ यः स्वरविकारः स उच्यते ह्रस्वः स्वरो दीर्घविकारमापद्यते अधिकारसूत्रमेतत् ॥

अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यर्त्ताभ्यवताध्यर्चशक्तिपुरुशचि वकारे ॥ ९८ ॥

अश्व रश्मि मति सुमति श्व सुत चारय घृणि सेदिम इन्द्रिय धारय चित्र भङ्गुर वयुन अश्वस्य हृदय घुष्य ऋत अभि अवत अधि अर्च शक्ति पुरु शचि एते ह्रस्वस्वरा वकारे प्रत्यये दीर्घमापद्यन्ते, अश्व यथा (१२अ० ८१क०) अश्वावतीए सोमावतीम्, रश्मि यथा (१५अ० ६३क०) रश्मीवतीभास्वतीम्, मति यथा (२२अ० १२क०) प्रदेवाय मतीविदे, सुमति यथा (२२अ० १२क०) सुष्टुतिए सुमतीवृधः, श्व यथा (२४अ० ३३क०) श्वाविद्भौमी, सुत यथा (२०अ० ८८क०) विप्रजूतः सुतावतः, चारय यथा (२३अ० २१क०) समञ्जिश्चारया वृषन्, घृणि यथा (२४अ० ३९क०) उष्ट्रो घृणीवान्। सेदिम यथा (२५अ० १५क०) देवानाए सख्यमुपसेदिमा वयम्। इन्द्रिय यथा (६अ० २७क०) इन्द्रियावान्मदिन्तमः। धारय यथा (६अ० ८क०) बृहस्पते धारया वसूनि, चित्र यथा (३अ० १८क०) चित्रावसो स्वस्ति ते पारमशीय, भङ्गुर यथा (११अ० २६क०) हन्तारंभङ्गुरावताम्। वयुन यथा (५अ० १४क०) विहोत्रा दधे वयुनाविदेकः। अश्वस्य यथा (२५अ० ४२क०) एकखुरश्वस्या विशस्ता, हृदय यथा (८अ० २३क०) शृतापवस्ता हृदया विधस्वित्, घुष्य यथा

(२५अ० ४१क) परु॑ष्परुरनुघु॒ष्या वि॑श्वस्, ऋत यथा (१२अ० १११क०) ऋतावा॑नम्महि॒षम्, अभि यथा (१४अ० २३क०) अभी॒वर्त्तः॑ऽ सवि॒तु॑० भो वर्चो॑ दावि॒ष्णः), अवत यथा (१२अ० ८८क०) इ॒दम्मे॒ प्राव॑ता॒ वच॑÷, अधि यथा (२५अ० ३८क०) अधी॒वासँ॑य्या हिर॑ण्यान्यस्मै, अर्च यथा (३३अ० २३क०) अर्चा॑ वि॒ख्वान॑राय विख्वा भुवे॑, शक्ति यथा (२८अ० ४६क०) कु॒च्छ्रे श्रि॒तः॑ शक्ती॑वन्तो गभी॒राः), पुरु यथा (३३अ० ८१क०) इ॒मा-ऽउ॑ त्वा पुरूवसो। शचि यथा शचीवसे॥

नाश्ववद्धिरण्यात्॥ ९९॥

अश्ववदित्येतत्पदन्न दीर्घमापद्यते हिरण्यशब्दाद्यदि परं भवति, यथा (८अ० ६२क०) आप॑वस्व॒ हिर॑ण्यवद॒श्ववत्॥

अभि विख्येषँ वीर विश्व वत्स हृत्र वाजयन्तेषु॥ १००॥

अभीत्येतत्पदं विख्येषम् वीर विश्व वत्स हृत्र वाजयन्त इत्येतेषु न दीर्घमापद्यते। विख्येषं यथा (१अ० ११क०) स्व॑रभि॒विख्ये॑षम्। वीर यथा (१७अ० ३७क०) अभिवी॑रो-ऽअ॒भिस॑त्वा सहो॒जाः), विश्व यथा (२अ० १८क०) इ॒मा वाच॑-म॒भि विश्वे॑ गृ॒णन्त॑÷, वत्स यथा (२६अ० ११क०) अ॒भि व॒त्सन्न स्वस॑रेषु धे॒नव॑÷, हृत्र यथा (१८अ० ६९क०) अ॒भि हृत्रँ॑ वर्ध॑मान॒म्पिया॑रुम्, वाजयन्तः यथा (१८अ० ७४क०) अश्या॑म॒ वाज॑म॒भि वा॒जय॑न्तः॥

अश्वस्य वाजिन इति च॥ १०१॥

अश्वस्य वाजिन इति च द्विपदस्य न पूर्वपदान्तो दीर्घ-

मापद्यते, यथा (२२अ० ३७क०) अश्वस्य वाजिनश्चि सिमाः) ॥

विश्व सहभुवपुषवसुषु ॥ १०२ ॥

विश्व इत्येतत्पदं सह इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, सह यथा (७अ० ३६क०) विश्वा साहमवसे नूतनाय, भुव यथा (३३अ० २३क०) अर्चा विश्वा नराय विश्वाभुवे, पुष यथा (२५अ० ४५क०) विश्वा पुषण् रयिम्, वसु यथा (२अ० ३क०) गन्धर्वस्त्वा विश्वा वसुः ॥

नरहामित्रेषु च ॥ १०३ ॥

नरहामित्रेषु च प्रत्ययेषु विश्वशब्दो दीर्घमापद्यते, नर यथा (३३अ० २३क०) अर्चा विश्वा नराय, हा यथा (१७अ० ४८क०) विश्वाहा शर्म यच्छतु, मित्र यथा (१३अ० ५७क०) विश्वा मित्रऽऋषिः । पृथग्योगकरणं शिष्याणामवग्रहत्वव्युदासप्रश्नस्यर्थम् । अर्थव्याख्यानार्थं त्ववयवदर्शनम् ॥

तिष्ठाद्युदात्तम् ॥ १०४ ॥

तिष्ठेत्येतत् पदं दीर्घमापद्यते यद्यादुदात्तं भवति, यथा (११अ० ४२क०) तिष्ठा देवो न सविता, (१०अ० २२क०) तिष्ठा रथमधियँ वज्रहस्ता, आद्युदात्तमिति किम् (८अ० ३३क०) आतिष्ठ वृत्रहन्नृथम् ॥

प्र वणशृङ्गयासेषु ॥ १०५ ॥

प्र इत्येतत् पदं वन शृङ्ग यास इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, वन यथा (१२अ० ५०क०) प्रा वणेभिः मजोषसः। शृङ्ग यथा (२४अ० १७क०) प्रा शृङ्गा मोहेन्द्राः), यास यथा (३९अ० ११क०) प्रा यासाय स्वाहा ॥

नि वारहारयोरनवग्रहे ॥ १०६ ॥

नि इत्ययमुपसर्गो वारहारयोः प्रत्यययोर्दीर्घमापद्यते अवग्रहवर्जिते, वार यथा (१८अ० १२क०) नीवारा॑श्च मे, हार-यथा (१७अ० ३२क०) नीहा॑रेण प्रावृ॑ता, अवयवव्युत्पत्त्यर्थं वचनम् अनवग्रहाणां हि मध्ये वक्ष्यति ॥

नाऽवनयामि ॥ १०७ ॥

अवेत्येतत् पदं न दीर्घमापद्यते नयामीत्येतस्मिन् प्रत्यये यथा (५अ० २५क०) अवं॑ नयामि वैष्णवान्। धारयामेत्येत-स्मिन् सूत्रेऽवशब्दस्य नकारे दीर्घत्वं वक्ष्यति तस्यायं पुरस्ता-दपवादः ॥

धारयाम योजाव सचस्व नुद मोषु जयतो-रुष्य रत्त यज यक्ष मत्सथ पिपृत गायतातु येन नकारे ॥ १०८ ॥

धारयाम योज अव सचस्व नुद मोषु जयत उरुष्य रत्त यज यक्ष मत्सथ पिपृत गायत आतु येन एते कृत्वा नकारे प्रत्यये दीर्घमापद्यन्ते, धारयाम यथा (१७अ० ८०क०) धार-यामा॒ नमो॑भिः, योज यथा (३अ० ५२क०) योजा॒न्विन्द्र ते॒ हरी॑, अव यथा (११अ० ४१क०) अवा॑ नो दे॒व्या धि॒या, सचस्व यथा (३अ० २४क०) सच॑स्वा नः॑ स्व॒स्तये॑, नुद यथा (१५अ० १क०) अग्ने॑ जा॒तान् प्रणु॑दा नः॑, मोषु यथा (३अ० ४६क०) मो षू॑ण॑ऽइन्द्रात्र॑ पृत्सु॒ देवैः॑ऽ, मोऽइति किम् (११अ० ४२क०) ऊ॒र्ध्व॑ऽऊ॒ षु॑ण॑ऽऊ॒तये॑, जयत यथा (१७अ० ४६क०) प्रे॒ता जय॑ता नर॑ः, उरुष्य यथा (३अ० २६क०) उ॒रु॒ष्याणो॑ऽअघा-य॒तः॑ऽ। रत्त यथा (३अ० ३०क०) रत्ता॑ णो ब्रह्मणस्पते, यज

यथा (३३अ० ३क०) यज्ञा नो मित्रावरुणा, यच्छ यथा (३६अ० १३क०) यच्छा नः शर्म सप्रथाः, मत्सथ यथा (३३अ० ३४क०) अपि यथा युवानो मत्सथा नः, पिपृत यथा (३३अ० ४२क०) निरवद्यैरभीशुभिः पिपृता निरवद्यात्, गायत यथा (३३अ० ६२क०) उपास्मै गायता नरः, आतु यथा (३३अ० ६५क०) आतू नोऽइन्द्र वृत्रहन्, (३३अ० ९७क०) येन यथा (३४अ० १७क०) येना नः पूर्वे पितरः ॥

भव च ॥ १०९ ॥

भवेत्ययं ह्रस्वो दीर्घमापद्यते नकारे प्रत्यये, यथा (१२अ० ११४क०) भवा नः सप्रथस्तमः सखा वृधे, पृथग्योगकरणमुत्तरार्थम् ॥

सचा वरूथ्य वाजस्य पायुषु च ॥ ११० ॥

सचा वरूथ्य वाजस्य पायुः एषु च प्रत्ययेषु भवेत्येतत्पदं दीर्घमापद्यते, सचा यथा (३४अ० ५६क०) इन्द्रं प्राशूर्भवा सचा, वरूथ्य यथा (३अ० २५क०) उत त्राता शिवो भवा वरूथ्यः, वाजस्य यथा (१२अ० ११२क०) भवा वाजस्य सङ्गथे, पायुः यथा (१३अ० ११क०) भवा पायुर्विशोऽअस्याऽअदब्धः ॥

अपृक्तः सौ ॥ १११ ॥

अपृक्तग्रहणेनेह उकारो गृह्यते नाकारो दीर्घविधानात्, अपृक्त उकारो दीर्घमापद्यते सुप्रत्यये, यथा (११अ० ४२क०) उ सु नः ऊर्ध्वऽऊषुणः, (२०अ० ८१क०) गोमदूषुणो सख्या ॥

रथि तकारनकारयोः ॥ ११२ ॥

रथीत्येतत्पदं तकारनकारयोः प्रत्यययोर्दीर्घमापद्यते, यथा (१२अ० ५६क०) रथी तमः रथी नाम् ॥

अथोदारिथ शोच पनय सादयर्जु वृष शत्रु सलक्ष्माघाघारात्यृतभवत यकारे ॥ ११३ ॥

अथ उदारिथ शोच पनय सादय ऋजु वृष शत्रु सलक्ष्म घ अघ अराति ऋत भवत एते ह्रस्वा यकारे प्रत्यये दीर्घमापद्यन्ते, अथ यथा (१२अ० १२क०) अवाधमँ विमध्यमꣳ अथाय, उदारिथ यथा (१७अ० ७५क०) अस्माद्योनेरुदारिथा यजं, शोच यथा (३अ० ३क०) बृहच्छोचा यविष्ठ्य, पनय यथा (१९अ० ६४क०) देवत्रा पनया युजम्, सादय यथा (११अ० ३५क०) सादया यज्ञꣳ सुकृतस्य योनौ, ऋजु यथा (२५अ० १५क०) देवानां भद्रा सुमतिर्ऋजूयताम्, वृष यथा (२०अ० ४६क०) वृषायमाणो वृषभस्तुराषाट्, शत्रु यथा (१२अ० ५क०) शत्रूयतो हन्ता, सलक्ष्म यथा (६अ० २०क०) सलक्ष्मा यद्विषुरूपं भवाति, घ यथा (७अ० ३२क०) आघा येऽग्निम्, अघ यथा (३अ० २७क०) अघायतःऽसमस्मात्, अराति यथा (१२अ० ५क०) अरातीयतो हन्ता, ऋत यथा (१३अ० २७क०) मधु वाताऽऋता यते, भवत यथा (३३अ० ५१क०) अर्वाञ्चो-ऽअद्या भवता यजत्राः ॥

व वृधवृजोः ॥ ११४ ॥

व इत्ययं ह्रस्वो वृधवृजोः प्रत्ययोर्दीर्घमापद्यते, वृध यथा (७अ० ३९क०) अस्मद्र्यग्वावृधे, वृज यथा (३३अ० ४४क०) प्र वावृजे ॥

अद्य तर्थ० हकारचकारभवत वृणीमहे देवेषु ॥ ११५ ॥

अद्य इत्ययं ह्रस्वस्तकार हकार चकार भवत वृणीमहे देव

इत्येतेषु प्रत्ययेषु दीर्घमापद्यते, तम् यथा (३३अ० ९७क०) अद्या तमस्य महिमानम्, हकार यथा (८अ० ४५क०) अद्या हुवेम, चकार यथा (२१अ० १क०) हवमद्या च मृडय, भवत यथा (३३अ० ५१क०) अद्या भवता यजत्रा(:, वृणीमहे यथा (३३अ० १७क०) तद्देवानामवोऽद्या वृणीमहे, देव यथा (३३अ० ४२क०) अद्या देवा(: ॥

न होतरि ॥ ११६ ॥

होतृशब्दे प्रत्यये अद्येत्ययं ह्रस्वो न दीर्घमापद्यते, अधस्तनसूत्रेण प्राप्तस्य प्रतिषेध:, यथा (२९अ० ३४क०) तमद्य होतरिषितऽ (२१अ० ५९क०) अग्निमद्य होतारमवृणीतायम् ॥

शृणुत त्विषि भ्रजि भवत पिबेत स्म तिष्ठ रत्त्वा मकारे ॥ ११७ ॥

शृणुत त्विषि भ्रजि भवत पिव इत स्म तिष्ठ रत्त्व एते ह्रस्वा मकारे प्रत्यये दीर्घमापद्यन्ते, शृणुत यथा (७अ० ३४क०) शृणुता मऽइमꣳ हवम्, त्विषि यथा (१६अ० १७क०) शुष्मिञ्छरायत्विषीमते। भ्रजि यथा (२९अ० २२क०) चित्तँ वातऽइव भ्रजीमान्, भवत यथा (८अ० ४क०) आदित्यासो भवता मृडयन्त:, पिब यथा (३३अ० १०क०) पिबा मित्रस्य धामभि(:, इत यथा (३३अ० ४७क०) इता मरुतो अश्विना, स्म यथा (३३अ० ९४क०) टे यासो हिषा मन्वे समन्यव(:। तिष्ठ यथा (३३अ० १३क०) शतवयतामभि तिष्ठा महाꣳसि, तिष्ठाद्युदात्तमित्याद्युदात्तस्य दीर्घभाव उक्त:, अनुदात्तार्थ आरभ्य:, रत्त्व यथा (२९अ० ४७क०) रत्त्वा माकिर्नोऽअघशꣳस ऽईशत ॥

विश्वदेव्यसोमौ वत्याम् ॥ ११८ ॥

विश्वदेव्यसोमावेतौ ह्रस्वौ वति प्रत्यये दीर्घमापद्येते, विश्वदेव्य यथा (११अ० ६१क०) अदितिष्ट्वा देवी विश्वदेव्यावती, सोम यथा (१२अ० ८१क०) अश्वावतीꣳ सोमावतीम्, वत्यामिति किम् (२४अ० १८क०) पितृणाꣳ सोमवताम् ॥

उष महोभिर्नक्तमीकारैकारौकारनकारेभ्यः ॥ ११९ ॥

उष इत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त ईम् ईकार-एकारौकारनकारेभ्यः परश्चेद्भवति, महोभिः यथा (२०अ० ४०। ४१क०) प्रथमानामहोभिः। उषासा नक्ता बृहती, नक्त यथा (१२अ० २क०) नक्तोषासा समनसा, ईम् यथा (१५अ० २४क०) प्रति धेनुमिवायतीमुषासम्, ईकारात् यथा (२८अ० १४क०) देवीऽउषासा नक्ता, एकारात् यथा (२९अ० ३१क०) यजतेऽउपाकेऽउषासा नक्ता, औकारात् यथा (२७अ० १७क०) दिव्येन योनाऽउषासा नक्ता, नकारात् यथा (३४अ० ४०क०) अश्वावतीर्गोमतीर्नऽउषासः, एतेभ्यः पर इति किम् (२०अ० ३६क०) समिद्धऽइन्द्रऽउषसाम् ॥

पूरुषोऽवसाने ॥ १२० ॥

पूरुष इति दीर्घो निपात्यते अवसाने चेद्भवति, यथा (१२अ० ९१क०) न सरिष्यति पूरुषः, अवसान इति किम् (३१अ० २क०) पुरुषऽएव ॥

पूष्णो जहीमस्तेष्वत्र ॥ १२१ ॥

अत्र इत्ययं ह्रस्वो दीर्घमापद्यते पूष्णः जहीमः ते इत्येतेषु प्रत्ययेषु, पूष्णः यथा (२५अ० २७क०) अत्रा पूष्णः, जहीमः

यथा (३५अ० १०क०) अत्रा जहीमोऽग्निवा ये, ते यथा (२८अ० १८क०) अत्रा ते रूपमुत्तमम् ॥

नरस्सप्तऽऋषीन्नस्ताऽआहुर्नियुद्भिषु यत्र ॥ १२२ ॥

नरः सप्तऽऋषीन् नः तऽआहुः नियुद्भि एतेषु प्रत्ययेषु यत्रेत्ययं ह्रस्वो दीर्घमापद्यते, नरः यथा (२८अ० ४८क०) यत्रा नरः(ः सच्च विचृद्रवन्ति, सप्तऽऋषीन्यथा (१७अ० २६क०) यत्रा सप्तऽऋषीन् परऽ, नः यथा (२५अ० २२क०) यत्रा नस्त्रका जरसं तनूनाम्, तऽआहुः यथा (२८अ० १५क०) यत्रा तऽआहुः परमं जनित्रम्, नियुद्भिः यथा (१३अ० १५क०) यत्रा नियुद्भिः सचसे शिवाभिः ॥

अभिमाति पृतनासु सपत्न धूर्विश्व समत्सु पृतना व्रातेभ्यः सहेः ॥ १२३ ॥

अभिमाति पृतनासु सपत्न धूः विश्व समत्सु, पृतना व्रात इत्येतेभ्य उत्तरस्य सहेर्ह्रस्वो दीर्घमापद्यते, अभिमाति यथा (१२अ० ११३क०) मँहिष्ठान्यभिमातिषाहः, पृतनासु यथा (११अ० ७६क०) जेतारमग्निम्पृतनासु सासहिम्, सपत्न यथा (५अ० १०क०) सिषक्षासि सपत्नसाही, धूः यथा (४अ० ३३क०) उग्रावेतं धूर्षाही, विश्वे यथा (७अ० ३६क०) विश्वासाहमवसे नूतनाय, समत्सु यथा (१५अ० ४०क०) येना समत्सु सासहः, पृतना यथा (१८अ० ६८क०) पृतनाषाह्याय च, व्रात यथा (२८अ० ४६क०) सतो वीराऽउरवो वातसाहाः ॥

उक्थाच्च शसिः ॥ १२४ ॥

उक्थशब्दात्परस्य शसेर्धातोर्ह्रस्वो दीर्घमापद्यते, यथा (१७अ० ३१क०) उक्थशसः उ॒क्थ॒शास॑स्वरन्ति ॥

एवाच्छ चक्रमाथ ॥ १२५ ॥

एव अच्छ चक्रम अथ एते ह्रस्वा व्यञ्जनमात्रे दीर्घमापद्यन्ते, एव यथा (१३अ० २०क०) ए॒वा नो॑ दू॒र्वे प्र॑तनु, अच्छ यथा (१६अ० ४क०) गिरि॒॑याच्छा॑ वदामसि, चक्रम यथा (३अ० ४५क०) य॒ट॑नश्चक्रमा ब॒यम्, अथ यथा (२६अ० २५क०) अथा॑ मन्दस्वजुजुषा॒णः ऽ ॥

विश्मा सौत्रामण्याम् ॥ १२६ ॥

विश्म इत्ययं ह्रस्वो दीर्घमापद्यते सौत्रामणीमन्त्रं मुक्त्वा, यथा (१२अ० १८क०) वि॒श्मा त॑॑ऽग्ने, असौत्रामण्यामिति किम् (१८अ० ६८क०) यँ॑श्वं विश्म॒ या२ँ॑॥ऽउ॑ च॒ न प्र॑॑वि॒श्म ॥

अधा यत्सम्नावायुषु ॥ १२७ ॥

अध इत्ययं ह्रस्वो व्यञ्जनमात्रे दीर्घमापद्यते, यथा (१७अ० ६४क०) अधा॒ स॒पत्ना॑निन्द्राग्नी मे॑, यत् स्म ग्ना वायुः इत्येतेषु प्रत्ययेष न दीर्घमापद्यते, यत् यथा (२७अ० ८क०) अ॒मुत्र॑ भू॒याद॒ध॒ य॒द्य॒मस्य॑, स्म यथा (१५अ० ६२क०) अध॑ स्म ते॒ व्रज॑नम्, ग्ना यथा (३३अ० ४८क०) रु॒द्रोऽअ॑॑ध॒ग्नाः, वायुम् यथा (२७अ० २४क०) अध॑ वा॒युं नि॒युत॑॑ः, अयत्सम्नावायुष्विति किम् (१८अ० ६८क०) अधा॒ यथा॑ नः॑ पि॒तर॑॑ः ॥

पूर्वो द्वन्द्वेष्ववायुषु ॥ १२८ ॥

द्वन्द्वेषु समासेषु वायुरहितेषु पूर्वः पदान्तो दीर्घमापद्यते, यथा (२अ० १५क०) अ॒ग्नीषोमौ॑, (२अ० ३क०) मि॒त्रा व॒रु॑णौ, (२५अ० ६क०) इन्द्रा॒॑ब्रह्म॒स्पती॑, द्वन्द्वेष्विति किम्

(४अ० ३३क०) अवी'रहणो ब्रह्मचोद'नो, अवायुष्विति किम् (७अ० ८क०) इन्द्रवा'युभ्यान्त्वा ॥

हरि शयेत्येके ॥ १२९ ॥

हरि इत्यस्य एके आचार्या दीर्घमिच्छन्ति शयप्रत्यये, यथा (५अ० ८क०) हरि शया हरी शया, इक इति किम् या तें'ऽग्ने हरि शया ॥

पिबा सोमं पिबा सुतस्य स्था मयो भुवो नूरणे शमीष्व मामहानो मामहन्तामशीतम रीरिषो रीरिषत यामयन्ति हि ष्मा ते वर्ह्या रयिꣳ शुधी हवञ्चरा सोम सूयवसिनी श्रोता ग्रावाणो धर्षा मानुषः पाथा दिवो युच्चा हि गमयातमः सिञ्चता सुतम्परीवापऽउक्था शस्त्राण्यत्ता हवीꣳष्याच्या जानु चामा रेरिहत् चामा भिन्दन्तो रुहेमा स्वस्तये जनयथा च धारयाम पितरा मृधो बोधा मे विचृता बन्धमवता हवेषु शृणुधी गिरो रचा तोकञ्चर्षणीसहाञ्चर्षणीधृतो येना समत्सु वनेमा तऽऋध्यामा ते शिचा सखिभ्यस्तचारथन्दीया रथेनेता जयत वर्ह्या त्वं प्रवावामा घृतस्याजगन्था परस्या ररिमा हि पुरी तता ग्रीहाकर्णशुष्हाकर्णौ प्रकृतिदीर्घावित्येके नौ काशाऽअनू काशेन

चक्राजरसम्मिथूकस्तरता सखायः सासह्वानपा-
मार्गोभयादतऽऋतीषहमभीषु सुष्टरीमा जुषा-
णा यजा देवान् येना पावकाप्रवायन्तो यदी सर-
मा स्वदया सुजिह्व निषद्या दधिष्व सदतना
रणिष्ट न भरा चिकित्वाँश् चिकित्सा गविष्टा-
ववाद्रुद्रा चायुनक्सृजा रराणः साद्न्यमिति
च ॥ १३० ॥

पिबा सोमम्, पिबा सुतस्य, स्या मयो भुवः, नूरणे, शमीष्व, मामहानः, मामहन्ताम्, अशौतम, रीरिषः, रीरिषत, यामयन्ति, हिषा ते, वर्धया रयिम्, शुधी हवम्, चरा सोम, स्रूयवसिनी, श्रोता शावाणः, धर्षा मानुषः, पाथा दिवः, युक्ष्वा हि, गमयातमः, सिञ्चता सुतम्, परीवापः, उक्था शस्त्राणि, अत्ता हवींषि, आद्या जानु, चामा रेरिहत्, चामा भिन्दन्तः, रुहेमा स्वस्तये, जनयथा च, धारयाम, पितरा मृधः, बोधा मे, विचृता बन्धम्, अवता हवेषु, शृणुधी गिरः, रक्षा तोकम्, चर्षणीसहाम्, चर्षणीधृतः, येना समत्सु, वनेमा ते, ऋध्यामा ते, शिक्षा सखिभ्यः, तवारथम्, दीया रथेन, इता जहत, वर्धया त्वम्, प्रब्रवामा घृतस्य, आजगन्या परस्याः, ररिमा हि, पुरो तता, शूरोहाकर्णः, शुरुधाकर्णः, नी काशाः, अनु काशेन, चक्राजरसम्, मिथूकः, तरता सखायः, सासह्वान्, अपामार्गः, उभयादतः, ऋतीषहम्, अभीषु, सुष्टरीमा जुषाणा, यजा देवान्, येना पावक, अप्रवायन्तः, यदी सरमा, स्वदया सुजिह्व, निषद्या दधिष्व, सदतना रणि-

ष्टन, भरा चिकित्वान्, चिकित्सागविष्टौ, अवाददत, रक्षा च, आयुनक्तृजा रराणः, सादन्यम्, एते ह्रस्वा दीर्घमाप-द्यन्ते । पिब सोमम् यथा (२३अ० ४क०) पिबा सोमꣳ शत-क्रतो, (७अ० ३६क०) पिबा सोम मनुष्वधं मदाय, पिब सुतस्य यथा (३३अ० ७०क०) पिबा सुतस्यान्धसो मदाय, स्य मयो भुवः यथा (११अ० ५०क०) आपो हि ष्ठा मयो भुव÷, नु रणं यथा (१७अ० १०क०) तूर्वन्नयामन्नेतशस्य नू रणं, शमीष्व यथा (१अ० १५क० हविःऽ शमीष्व, ममहानः यथा (१७अ० ५५क०) समिद्धेऽअग्नावधि मामहानः, ममहन्ताम् यथा (३३अ० ४२क०) तन्नो मित्रो वरुणो मामहन्ताम्, अग्निं तम यथा (२अ० २०क०) अग्ने दक्षायोऽशोतम, रीरिषः यथा (१६अ० १६क०) मानोऽअग्नेषु रीरिषः, रीरिषत यथा (२५अ० २२क०) मा नो मघा रीरिषतायुः, यमयन्ति यथा (२५अ० ३८क०) प्रिया देवेष्वायामयन्ति, हि स्म ते यथा (३अ० ४६क०) अस्ति हिष्मा ते, हीति किम् (१५अ० ६२क०) अधं स्म ते व्रजनम्, वर्द्धय रयिम् यथा (३अ० १४क०) अथा नो वर्द्धया रयिम्, शृधि हवम् यथा (२१अ० १क०) इमं मे वरुण शृधी हवम्, चर सोम यथा (४अ० ३७क०) प्रचरा सोम दिव्यान्, श्रोत ग्रावाणः यथा (६अ० २६क०) श्रोता ग्रावाणो विदुषो न यज्ञम्, धर्ष मानुषः यथा (६अ० ८क०) मृक्षामि धर्षा मानुषः, पाथ दिवः यथा (८अ० ३१क०) पाथा दिवो विमहसः, युक्ष हि यथा (८अ० ३४क०) युक्षा हि केशिना हरी, गमय तमः यथा (८अ० ४४क०) अधरं गमया तमः÷, सिञ्चत यथा (१९अ० २क०) परीतो षिञ्चता सुतम्, परि वापः यथा (१९अ० २१क०) परी वापः÷ पयो दधि, उक्थ शस्त्राणि यथा (१९अ० १८क०) छन्दोभिरुक्था शस्त्राणि, अत्त हवीꣳषि यथा (१९अ०

६८क०) अत्ता हवीँषि प्रयतानि बर्हिषि, आच्च जानु यथा (१८अ० ६२क०) आच्चा जानु दक्षिणतः। चाम रेरिहत् यथा (१२अ० ६क०) चामा रेरिहद्धरुधः, चाम भिन्दन्तः यथा (१८अ० ६८क०) चामा भिन्दन्तोऽअरुणीः। रुहेम स्वस्तये यथा (२१अ० ६क०) अस्रवन्तीमा रुहेमा स्वस्तये, जनयथ च नः यथा (११अ० ५२क०) आपो जनयथा च नः, धारय मयि यथा (११अ० ५८क०) धारया मयि प्रजाम्, तरुत्रधः यथा (११अ० ७२क०) अग्ने त्वन्तरा मृधः, बोध मे यथा (१२अ० ४२क०) बोधा मे अस्य, विचृत बन्धम् यथा (११अ० ६३क०) विचृता बन्धमेतम्, अवत हवेषु यथा (१७अ० ४३क०) देवा अवता हवेषु, शृणुधि गिरः यथा (१३अ० ५२क०) पाहि शृणुधी गिरः, रक्ष तोकम् यथा (१३अ० ५२क०) रक्षा तोकमुतक्मना, चर्षणिसहाम् यथा (२८अ० १क०) चर्षणीसहाँ वेत्वाज्यस्य, चर्षणिधृतः यथा (७अ० ३३क०) ओमासश्चर्षणीधृतः, येन समत्सु यथा (१५अ० ४०क०) येना समत्सु सासहः, वनेम ते यथा (१५अ० ४०क०) वनेमा तेऽअभिष्टिभिः, ऋध्याम ते यथा (१५अ० ४४क०) ऋध्यामा तऽओहैः, शिक्ष सखिभ्यः यथा (१७अ० २१क०) शिक्षा सखिभ्यो हविषि, तत्र रथम् यथा (२८अ० ४१क०) तत्रा रथमुप शग्मठं सदेम, दीय रथेन यथा (१७अ० ३६क०) बृहस्पते परि दीया रथेन, इत जयत यथा (१७अ० ४६क०) प्रेता जयता नरः, वर्धय त्वम् यथा (१७अ० ५२क०) तमग्ने वर्धया त्वम्, प्रब्रवाम घृतस्य यथा (१७अ० ६०क०) वयन्नाम प्रब्रवामा घृतस्य, जगन्थ परस्याः यथा (१८अ० ७१क०) परावतऽआजगन्था परस्याः, रुरिम हि कामम् यथा (१७अ० ७५क०) वयन्तेऽअश्व रुरिमा हि काममं, पुरि तता यथा (१८अ० ८क०) अन्तरिक्षं पुरो

तर्ता, अस्य पदस्यापवादोऽभिप्रेतः तथा हि, (३९अ० ९क०) मृगुपर्तेः पुरोतदित्येतदपि भवति, प्लीहाकर्णः शुण्ठाकर्णः एतौ शब्दौ प्रकृतिदीर्घावित्येके आचार्या मन्यन्ते, यथा (२४अ० ४क०) प्लीहाकर्णा ÷ शुण्ठाकर्णाः, नि काशाः यथा (२४अ० १८क०) बभ्रुनी काशाः पितॄणाम्, अनु काशेन यथा (२५अ० २क०) अन्तरमन् काशेन, चक्रजरसम् यथा (२५अ० २२क०) यत्रा नश्च क्रा जरमन्तनूनाम्, मिथु कः यथा (२५अ० ४३क०) गात्राण्यसिना मिथू कः, सरत सखायः यथा (३५अ० १०क०) प्रतरता सखायः, ममच्छान् यथा (३९अ० ७क०) मासच्छाँश्चाभियुग्वा च, अपमार्ग यथा (३५अ० ११क०) अपा मार्ग त्वमस्मत्, उभय दतः यथा (३१अ० ८क०) ये के चोभयादतः, ऋति षहम् यथा (२६अ० ११क०) तँवो दस्म-मृतीषहम्, अभि सु यथा (३६अ० ६क०) अभी षुणः सखीनाम्, सुष्टरीम जुषाणा यथा (२९अ० ४क०) बर्हिः सुष्टरीमा जुषाणा, यज देवान् यथा (३३अ० ३क०) यजा देवाँ२ऽऋतम्बृहत्, येन पावक यथा (३३अ० ३२क०) येना पावक चक्षसा, अखयन्तः यथा (२७अ० ३६क०) अखायन्तो मघवन्. यदि मरमा यथा (३३अ० ५९क०) विद्यदी मरमा, स्वदय सुजिह्व यथा (२९अ० २६क०) ममज्झन् स्वदया सुजिह्व, निषद्य दधिष्व यथा (२६अ० २३क०) बर्हिष्या निषद्या दधिष्व। मदतन रणिष्टन यथा (२६अ० २४क०) मदतना रणिष्टन, भर चिकित्वान् यथा (३४अ० १४क०) उत्तानायामवभरा चिकित्वान्, चिकित्सगविष्टौ यथा (३४अ० २३क०) प्रचिकित्सागविष्टौ, अवदद्त यथा (३४अ० ३६क०) भगेमां धियमुदवा ददन्नः, रत्त च यथा (३४अ० २७क०) रत्ता च नोऽधि च ब्रूहि देव, अयुनक् यथा (२९अ० १३क०) यमेन दत्तं त्रित-

ऽए॑नमायुनक्, सृज॑ रराणः यथा (२७अ० २१क०) वन॑स्पते-ऽवसृजा॑ रराणः, सदन्यम् यथा (३४अ० २१क०) मा॒ट॒न्य॒ विट॒त्यु॒ग्रम् ॥

अनुनासिकमुपधा प्रागन्तस्थायाः ॥१३१॥

ह्रस्वो दीर्घः प्लुतः सानुनासिको निरनुनासिक उदात्तोऽनुदात्तः स्वरित इति स्वरधर्माः तत्र पदे दृष्टस्यान्यथाभावो विकार उच्यते स चात्र स्वरे एवाधिक्रतो न व्यञ्जने यतो दीर्घमित्यारभ्यते अत इहापि स्वरस्यैवानुनासिकं विकार उच्यते इयांस्तु विशेषः यत्र नकारमकारावेव परभूतौ तयोश्च विकारे सति स्वरस्य विकारः। यत्र तु तयोः प्रक्रतिभावो वा लोपो वा तत्र स्वरस्यापि विकारो न भवति, यथा (१२अ० ७०क०) अ॒स्मान् सो॑तेति इत्येवमादि, (४अ० ८सू०) यत्रागन्तस्थासंयुक्तनात्, यमित ऊर्ध्वमनुक्रमिष्यामस्तत्रोपधाभूतः स्वरोऽनुनासिकं स्वरं विकारमापद्यते इत्येतदधिक्रतं वेदितव्यम् वक्ष्यति (अ० ३। सू० १३४। १३५) "नुः" "चक्ष्योः शम्" यथा (२४ २९। २४। २८) प्लु॒षीन् चक्षुषे॒ वाचे॑ प्लु॒षीँश्चक्षु॑षे, गवयान् त्वष्ट्रे॒ गृह॒स्पत॑ये गव॒याꣳस्त्वष्ट्रꣳऽउ॒ष्ट्रान् ॥

स्वर औपशविः ॥ १३२ ॥

औपशविराचार्यः स्वरएव प्रत्यय उपधानुनासिक्यमिच्छति, नुरिति वक्ष्यति अतस्तस्यैव परभूतो यः स्वर उक्तः उपधा च तस्यैव ग्राह्या, यथा (२६अ० १०क०) महान् इन्द्रः म॒हाँ २॥ऽइन्द्रो वज्र॑हस्तः, (११अ० ८२क०) स्वान् अहम् उन्न॑यामि॒ स्वाँ २॥ऽअ॒हम्, (७अ० ३७क०) शत्रू॒न् अप॑ जहि॒ शत॑रूँ ॥ रप॒ मृधो॑ नुदस्व, स्वर इति किम् (२४अ० २८क०) गवयान् त्वष्ट्रे॒ गव॒याँस्त्वष्ट्र॑ ॥

अनुस्वारेण व्यञ्जने ॥ १३३ ॥

नकारात् परे व्यञ्जनेऽनुस्वारेण व्यवधानमिच्छत्यागमि-
औपश्यविराचार्य्यः, अयञ्च उपधानकारयोरितरो भवति
नकारस्य यकारः सकारो वा विहितस्तत्रापि भवति,
१सू०) "अनुस्वार ठं० रोषिस्यति" वचनात्, यथा
। चक्षुषे प्रुषीऽश्चक्षुषे, गवयान्त्वष्ट्रे गवयाऽस्त्वष्ट्रे ॥

नुः ॥ १३४ ॥

ाकारोऽधिक्रतो वेदितव्यः ॥

चक्छयोः शम् ॥ १३५ ॥

चकारच्छकारयोः प्रत्यययोर्नकारः शकारमापद्यते
ासिकं चोपधा, यथा (१६अ० ५क०) अह्नीन् च
प्रु सर्वान्, प्रुषीँश्चक्षुषे, छकारोदाहरणं मृग्यम्, रूपो-
णन्तु विद्यते यथा विद्वान् छकारः विद्वाँश्छकारः ॥

तथयोः सम् ॥ १३६ ॥

कारथकारयोः प्रत्यययोर्नकारः सकारमापद्यते अनुना-
ोपधा, यथा (२४अ० २८क०) गवयान् त्वष्ट्रे गवयाँ-
(१७अ ११क०) अन्यान् ते अन्याँस्ते, थकारस्य रूपो-
ाम् यथा विद्वान् थकारः विद्वाँस्थकारः ॥

दधन्वान् खवान्यकारे लोपम् ॥ १३७ ॥

धन्वान् खवान् एतौ नकारौ यकारे प्रत्यये लोपमा-
अत्र च लोपविधानादुपधानुनासिक्यमपि न भवति,
ोक्तम् स्वराणामानुनासिक्यं प्रतिजानन्ति सर्वदा, वर्ज-

यित्वा तमाकारं यत्र लोपो विधीयते, यथा (१८अ० २क०) दधन्वान् यः दधन्वा यो नर्य्योऽअप्सुन्तरा, स्वान् यथा (३४अ० २६क०) स्वर्वाया॑त्स्वर्वाड्॥

रयिवृधे च॥ १३८॥

रयिवृध इत्येतस्मिँश्च प्रत्यये पूर्वो नकारो लोपमापद्यते, यथा (२७अ० २३क०) अन्नान् रयिवृधः पीवोऽअन्ना रयि-वृधं॑, उक्तहेतुत्वादत्राप्युपधानुनासिक्यन्न भवति॥

नपुंठ०सकादिकारस्य॥ १३९॥

नपुंसकादुत्तरो यो नकारस्तस्य सम्बन्धिन इकारस्य लोपो भवति, यथा (३७अ० ५३क०) एमं॑न् सादयामि, भस्मं॑न् साद-यामि, एमनि भस्मनीति प्राप्ते इकारलोपश्छान्दसः, नपुंस-कादुत्तरस्येकारस्य लोप उक्तोऽनपुंसकादपि भवति। यथा (१७अ० १क०) अश्मन्नू॑र्जं॑म् अश्मनीनि प्राप्ते॥

न सप्तम्यामन्वितयोः॥ १४०॥

सप्तम्यामन्वितयोर्विभक्त्योः सम्बन्धिन इकारस्य न लोपो भवति, यथा (१३अ० ५३क०) (अपान्वा सधिषि, अपान्वा पार्थसि, एतं सप्तम्या उदाहरणे (१अ० २५क०) हे पृथिवि आमन्वितविभक्तेरुदाहरणम् अनकारार्थ आरम्भः॥

नॄन्पकारे विसर्जनीयम्॥ १४१॥

नॄनित्ययं नकारः पकारे प्रत्यये विसर्जनीयमापद्यते अनु-नासिकं चोपधा, यथा (१३अ० ५२क०) नॄन् पाहि नॄँः पाहि शृणुधी गिरं॑:॥

शत्वन् परिधीन् क्रतून् वनस्पतीन् स्वरे रेफम्॥ १४२॥

यत्नून् परिधीन् क्रतून् वनस्पतीन् एते नकाराः स्वरे प्रत्यये यत्नून् रेफमापद्यन्ते अनुनासिकं चोपधा, यत्नून् यथा (७अ० ३७क०) अप जहि यत्नूँ१॥रꣳमृधः÷। परिधीन् यथा (१८अ० ५३क०) वन्वन्न वातः परिधीँ१॥ रꣳ÷, क्रतून् यथा (१८अ० ४०क०) अग्ने क्रत्वा क्रतूँ१॥ रꣳ, वनस्पतीन् यथा (१३अ० ७क०) ये वा वनस्पतीँ१॥रꣳ॥

आकारोपधो यकारम् ॥ १४३ ॥

आकारोपधो नकारो यकारमापद्यते स्वर इत्यनुवर्त्तते अनुनासिकं चोपधा, यथा (७अ० ४०क०) महान् इन्द्रः महान् य इन्द्र इत्येवं संहिता प्राप्नोति ततो (४अ० १२५सू०) "यवयोः पदान्तयोः स्वरमध्ये लोपः" इति यकारलोपे कृते "न परकालः पूर्वकाले पुनरिति" सन्धिर्न भवति ततो महाँ २॥ऽ इन्द्र इत्येतद्रूपं सम्भवति, ननु यथा (प्रा० ३अ० १३७सू०) "दधंन्वान् स्ववान् यकारे लोपः" इति नकारलोपे कृते सत्युपधानुनासिक्यन्न प्रवर्त्तते एवमिहापि नकारस्य यकारीभूतस्यास्यवर्णादुपधानुनासिक्यन्न प्रवर्त्तते तत्कथमुपधानुनासिक्यमिति लुप्तस्यापि स्वकार्य्यकारणादित्यदोषः, यदि हि यकारो व्यञ्जनकार्य्यं न कुर्य्यात् कथमिह स्वरयोः सन्धिर्न स्यात् अतः स्वकार्य्यकारणादुपधानुनासिक्यमपि भवति यथा (७अ० ४०क०) वृष्टिमान् इव पर्जन्यो वृष्टिमा २ँ॥ऽ इव ॥

न तमे ॥ १४४ ॥

यत्नकारस्य तकारे प्रत्यये विहितस्तमप्रत्यये न भवति, यथा (८अ० ४८क०) मदिन् तमानाम् मदिन्तमानाम्वा, मधुन् तमानाम् मधुन्तमानाम्वा, तथयोः समित्यस्यापवादः।

निर्जगन्वान् तमसि ॥ १४५ ॥

निर्जगन्वानित्ययं नकारस्तमसि प्रत्यये न विकारमापद्यते, यथा (१२अ० १३क०) निर्जगन्वान् तमसः निर्जगन्वान्तमसो ज्योतिषागात्॥

धामञ्छवूँश्चिकित्वाँस्त्वं पूषन्नर्वन्निति च॥१४६॥

धामन् शवून् चिकित्वान् त्वम् पूषन् अर्वन् एते नकारा न विकारमापद्यन्ते। धामन् यथा (१७अ० ६६क०) धामन्ते विश्वं भुवनम्। शवून् यथा (१८अ० ७१क०) शवून्त्साढि विसृधो नुदस्व। चिकित्वान् त्वम् यथा (२६अ० २५क०) आ च वह मित्र महश्चिकित्वान्त्वम्। त्वमिति किम् (७अ० १५क०) स प्रथमो ब्रह्मस्तश्चिकित्वाँस्त्सः। पूषन् यथा (३४अ० ४१क०) पूषन्तवे व्रते वयम्। अर्वन् यथा (२६अ० २२क०) तव शरीरं पतयिष्ण्वर्वन्तव चित्तम्। इति चेत्यस्यावयस्यार्थः। इति शब्दः प्रकारदर्शनार्थः। यथा अधस्तनसूत्रयोस्तकारे नकारस्य प्रकृतिभावः एवमिहापि नकारस्य प्रकृतिभाव एव तथा च व्याख्यातम्। चकारस्तकारापवादावधिद्योतनार्थः॥

अघ्वादौ चाध्याये॥१४७॥

स्वर इति वर्त्तते अघ्वस्तूपर इत्येतस्मिन्नध्याये नकार आकारोपधः स्वरे प्रत्यये प्रकृत्या भवति। "आकारोपधो यकारम्" इत्यस्यापवादः। यथा (२४अ० १६क०) शिशुमारान् त्सालभते सुमुद्राय शिशुमारानालभते। मण्डूकान् भक्षः मण्डूकान्भक्षः)। स्वरानुवृत्तिरिति किम् गवयँस्त्वष्टृ, प्लुषोस्त्वषे॥

मनुष्याँस्ताँल्लोकानभिवानुदि॥१४८॥

मनुष्यान् तान् लोकान् अमित्रान् एते नकाराः प्रकृत्या भवन्ति उदि उपसर्गे प्रत्यये। मनुष्यान् यथा (८अ० ३१क०) मनुष्यान् उत् मनुष्यानुदजयताम्। तान् यथा तान् छत् तानुजेषम्। लोकान् यथा त्रीँल्लोकानुदजयताम्। अमित्रान् यथा (११अ० ८२क०) क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वान्॥

आप्नोतीत्योश्च ॥ २४९ ॥

आप्नोतौ, प्रत्यये इतौ च नकारो न विकारमापद्यते। आप्नोति, यथा (१९अ० २९क०) भक्षान् आप्नोति इडाभिर्भक्षानाप्नोति। इति यथा (११अ० ५९क०) स्रुपयान् इति अदितिः स्रुपयानिति॥

सङ्क्रमे च वैष्णवान् ॥ १५० ॥

वैष्णवानित्ययं नकारो न विकारमापद्यते स्वरे प्रत्यये। सङ्क्रमश्च क्रमे भवति अतः क्रमसंहितायामित्यर्थः यथा (५अ० २६क०) वैष्णवान् अव वैष्णवानव॥

गृह्णामि गृह्णानुपह्वयामहे वर्चस्वानहम्मनुष्यानन्तरिक्षमग्निष्वात्तान्ऋतुमतः पयस्वानग्ने तानश्विना पतङ्गानसन्दितः स्वर्गानपां पतिः सपत्नानिन्द्रसपत्नानिन्द्राग्नी नभस्वानार्द्रदानुर्विद्वानग्नेर्देवानस्रेधतानड्वानाशुरश्वैतानष्टौ विरूपानालभत एतावानस्यायुष्मानग्ने वायव्यानारण्याः प्रविद्वानग्निनानड्वानधोरामौ शत्रूननुयँव्यतुधानस्यादस्मानरिष्टेभिरिति॥ १५१॥

एतेषां द्विपदानां पूर्वं पदान्तीया नकाराः प्रकृत्या भवन्ति। (३अ० ४१क०) गृहानैमि मनसा मोदमानः। (३अ० ४२क०) गृहानुपप्रयायमहे। (८अ० ३८क०) वर्चस्वानहं मनुष्येषु। (८अ० ६०क०) मनुष्यानन्तरिक्षमगन्। (१८अ० ६१क०) अग्निष्वात्तान्ऋतुमतो हवामहे। (२०अ० २२क०) पयस्वानग्नऽआगमन्तम्। (२१अ० ४२क०) तान्यज्ञिया सरस्वती। (१३अ० १०क०) तपूंष्यग्नेजुह्वा पतङ्गानसन्दितः। (१३अ० ३१क०) स्वर्गानपां पतिर्वृषभः। (१७अ० ६४क०) अधा सपत्नानिन्द्राग्नो मे। (१८अ० ४५क०) समुद्रोऽसि नभस्वानार्द्रदानुः। (१७अ० ६६क०) प्राचीमनुप्रदिशं प्रेहि विद्वानग्नेः। (१८अ० ७५क०) देवानस्येधता मन्मना। (२२अ० २२क०) अनड्वानाशुः सप्तिः पुरन्धिः। (३०अ० २२क०) अथैतानष्टौ विरूपानालभते। (३१अ० ३क०) एतावानस्य महिमा। (३५अ० १७क०) आयुष्मानग्ने हविषा वृधानः। (३१अ० ६क०) वायव्या नारण्या ग्राम्याश्च ये। प्रविद्वानग्निना। (२८अ० ५८क०) अनड्वानधो रामौ। (३३अ० ८०क०) शचननु यँविष्ठे मदन्त्यूमाः। नकारस्य रेफापवादः। इतरत्र तु सर्वत्र यकारापवादः। (३४अ० २६क०) अपसेधन्नक्षसो यातुधानानस्थात्। (३४अ० ३०क०) द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिः॥

दृब्धं दृब्धिः॥ १५२॥

इत्युक्तार्थम्॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे तृतीयोऽध्यायः॥

आनन्दपुरवास्तव्यवज्झटसूनुना उवटेन कृते माहमोदाख्ये प्रातिशाख्यनिर्मलभाष्ये तृतीयोऽध्यायः समाप्तः॥

चतुर्थोऽध्यायः ।

अनुस्वारठ० रोष्मसु मकारः ॥ १ ॥

अनितावध्याय इत्यनेन सूत्रेण योऽवधित्वेन वर्णितः । अतोऽवधिपरिज्ञापनार्थमध्यायसमाप्तिः कृता कात्यायनाचार्येण । आह च । अनितावध्याय इति कृतं सूत्रं यतः पुरा । अतस्तदवधिज्ञप्तिः क्रियतेऽध्यायसङ्ख्यया । अत्रावधिससाधीतं पदमन्तर्विकारिमत् । आचार्येणोच्यते तस्य प्रागुत्त्यादिप्रयोजनम् । मकारोऽनुस्वारमापद्यते रोष्मसु प्रत्ययेषु । रेफे यथा (१च० ३क०) अपाम् रसेन । अपाꣳ रसेन वरुणः । ऊष्मसु यथा (१७अ० ७६क०)त्वाम् शपन्तः त्वाꣳ शपन्तऽउपयन्ति वाजाः । (४च० २५क०) देवठ० सवितारमोण्यो+ । (१३च० १० क०) तपूꣳषि । (८अ० २३क०) उरुठ० हि राजा ॥

नुश्चान्तःपदेऽरेफे ॥ २ ॥

नकारोऽनुस्वारमापद्यते । चशब्दान्मकारश्च । पदस्य मध्ये अरेफे रेफशब्दस्य पर्य्युदासात् । ऊष्मस्वेवानुस्वारापत्तिर्भवति । यथा (८अ० १९क०) जघ्निवान् सः । जघ्निवाꣳ स+ । (८अ० १९क०) पपिवान् सः । पपिवाꣳ स+ । (१३अ० १०क०) तपूम् षि तपूꣳष्यग्ने । (१७अ० ७५क०) हवीन् षि । हवीꣳषि । एते नकारप्रकृतयोऽनुस्वाराः ॥

वठ०श् ॥ ३ ॥

वनतेर्धातोर्वमतेरुणादेर्यो वप्रत्ययः । वनतेर्वमतेर्धातो रौणादिकप्रत्यये नकारप्रकृतिर्मकारप्रकृतिर्वाऽनुस्वारः । सन्देहात्सत्वकारेण कण्ठरवेण सूत्रं कृत्वा पठितः । अतो नकारप्रकृतिर्वा मकारप्रकृतिर्वाऽनुस्वारः । (१६अ० ४३क०)

किम् शिलाय कि॒ठ्॰ शि॒लाय॑ (२अ॰ २५क॰) अ॒क्रा॑ऽस्त॒। (२५अ॰ ४५क॰) पु॒ठ्॰ सः)। एते मकारप्रकृतयोऽनुस्वारा भवन्ति। एवमन्येऽप्यन्वेषितव्याः। अरेफ इति किम्। व॒म्रः)। (११अ॰ ७४क॰) य॒ह्व॒म्रोऽअ॑ति॒सर्प॑ति॥

अनुनासिका चोपधा॥ ४॥

अतोऽधिकारादयमन्यं विकारं वक्ष्यामो मकारनकारयोस्तत्रानुनासिका चोपधा भविष्यतीत्यधिकृतं वेदितव्यम्। ननु "अनुनासिकमुपधा प्रागन्तस्थायाः" इति उपधाऽनुनासिकं विहितमेव किमनेन सूत्रेण क्रियते। एवन्तर्हि व्यवस्थार्थं वचनम्। यस्मिन् पक्षे अनुस्वारो न भविष्यति। तस्मिन् पक्षे उपधाया आनुनासिकं भविष्यति। अधिकारार्थोऽयमारम्भः॥

लोपं काश्यपशाकटायनौ॥ ५॥

काश्यपशाकटायनावाचार्यौ मकारनकारयोर्लोपं मन्यते। अस्मिन् पक्षे वाक्यद्वयम्। अनुनासिका चोपधा भवति। यथा अ॒पाँ र॑से॒न। पक्षे अपाऽ॑ रसे॒न। त्वाँ॑ ग्रन्थ॒न्तः। त्वाऽ॑ ग्रन्थ॒न्तः)। तँ॑ा सवितुः)। ताऽ॑ स॑वितुः)। त्वाँ॑ हि। त्वाऽ॑ हि। तपूँ॑षि। तपू॑ंऽष्यग्ने। अक्रा॑स्तँ। अक्रा॑ऽस्त॑। किँ॑ शिलाय॑। कि॒ठ्॰ शि॒लाय॑। (२०अ॰ १२क॰) यजूँ॑षि। यजू॑ंऽषि॒ सामा॑भिः॥

प्रकृत्या सम्राट्साम्राजि॥ ६॥

सम्राट्शब्दे समः सम्बन्धी मकारो रेफे परभूते प्रकृत्या भवति, तथा साम्राज्यशब्दे समो मकारो रेफे परे सति प्रकृत्या भवति। यथा (२०अ॰ ५क॰) स॒म्राडिति॑ स॒म्। राट्।

सम्राट्चषु+। (४अ० २४क०) साम्राज्यमिति साम्। राज्यम्। साम्राज्यङ्क्षेति मे। (१८अ० ३७क०) साम्राज्येनाभिषिञ्चामि॥

शं चे पकारादुकारोदयात्॥ ७॥

पकारादुकारोदयात्परो मकारः शकारमापद्यते, चकारे परभूते अनुनासिका चोपधा भवति। यथा (३०अ० २२क०) पुम् चली। पुँश्चली कितवः। च इति किम्। (२५अ० ४५क०) पुठ् सः। पकारादुकारोदयादिति किम्। (१६अ० ८क०) प्रमुञ्च। (२अ० २३क०) विमुञ्चति॥

समन्तःपदे कखपफेष्वनूष्मपरेषु॥ ८॥

सकारमापद्यते मकारः पदमध्ये कखपफेष् प्रत्ययेषु किं विशिष्टेषु अनूष्मपरेषु यदूष्माणः परभूता न भवन्ति अनुनासिका चोपधा। यथा (७अ० १४क०) सम् कृतिः। संस्कृतिः। पुम् खाताः। पुँस्खाताः। पुम् पुत्राः। पुँस्पुत्राः। पुम् फलाः। पुँस्फलाः। अनूष्मपरेष्विति किम्। सम् हरे। सङ्हरेऽमुतऽइति॥

नुश्चाम्रेडिते॥ ९॥

नकारः चशब्दान्मकारः सकारमापद्यते अनुनासिका चोपधा आम्रेडिते पदे कखपफेष्वनूष्मपरेषु। पदमध्ये यथा कान् करवाणि। काँस्करवाणि। कान् कानामन्त्रयति। काँस्कानामन्त्रयति आम्रेडिते किम्। कान् करवाणि। इह यान्युदाहरणानि संहितायां नोपलभ्यन्ते तेषामपि लक्षणं प्रसङ्गात् क्रियमाणं न विरुध्यत एव यथा जलाहरणस्य मत्स्याहरणं पुष्पाहारस्य फलाहरणं च न विरुध्यते॥

अन्तस्थासन्तस्थाखनुनासिकां परसवर्णानाम्

॥ १० ॥

अन्तस्थामापद्यते मकारः अन्तस्थासु परभूतासु परस्या अन्तस्थायाः समानस्थानां यदि नासानुनासिकां समानाम्। यथा (१अ०२२क०) सम् योमि। सँय्यो॑मि। (११अ० १३क०) रासभम् युवम्। युञ्जाथा॒ए॒ रासभँय्युवम्। (१अ० २१क०) सम् वपामि। सँव॑पामि। (२०अ० २५क०) तम् लोकम्। तँल्लो॑कं पुण्यं॑म्। रेफेऽनुस्वारो विहितः।

हि ॥ ११ ॥

"अन्तराः कालाः" इत्युक्तम्। अतस्तत्का॒ल॒ वधिद्योतनार्थं हिशब्दः॥

स्पर्शे परपञ्चमम् ॥ १२ ॥

मकारः स्पर्शे प्रत्यये परस्य प्रत्ययभूतस्य पञ्चममापद्यते। परः स्पर्शो यस्मिन् वर्गे तस्य वर्गस्य पञ्चममित्यर्थः। यथा (४अ० ११क०) व्रतम् क्रणुत। व्र॒त॒क्रु॑णुत। (१अ० ५क०) व्रतम् चरिष्यामि। व्र॒त॒श्च॑रिष्यामि। (२अ० १२क०) एतम् ते देव। ए॒त॒न्ते॑ देव सवितः। (१८अ० ६८क०) इदम् पितृभ्य+। इ॒द॒म्पि॒तृ॒भ्यो नम॑+। (१२अ० ४६क०) सम् ज्ञानमसि। स॒ञ्ज्ञा॒न॒मसि॥

तकारो लें लम् ॥ १३ ॥

तकारो लकारे प्रत्यये लकारमापद्यते। यथा (१४अ० २१क०) आसीत् लोकम्। आ॒सी॒ल्लो॒कम्। (१२अ० ४५क०) परिचित् लोकम्। प॒रि॒चि॒ल्लो॒कम्। क्रमसंहितोदाहरणम्॥

नुश्चाऽनुनासिकम् ॥ १४ ॥

नकारो लकारप्रत्यये लकारमापद्यते। यदि समानाऽनुनासिकम्। यथा (१अ० २१क०) अस्मिन् लोके। अस्मिँल्लोकेऽस्मिन् क्षये। (८अ० ३१क०) त्रीन् लोकान्। त्रीँल्लोकानुदजयत्॥

ङौ ताभ्याङ् सकारे ॥ १५ ॥

ङकारनकारौ यथासङ्ख्यं ककारतकाराभ्यां व्यवधीयेते सकारे प्रत्यये। यथा (१८अ० ३क०) प्राङ् सोमः। प्राङ्क्सोमोऽतिद्रुतः। प्रत्यङ् सोमः। प्रत्यङ्क्सोमोऽतिद्रुतः। (१३अ० ३१क०) त्रीन् समुद्रान्। त्रीन्त्समुद्रान्त्समसृजत्। (१२अ० ७०क०) अस्मान् सीते। अस्मान्त्सीते पयसा॥

न दाल्भ्यस्य ॥ १६ ॥

दाल्भ्यस्याचार्यस्य मते नैतावागमौ भवतः। प्राङ्सोम-। प्रत्यङ्सोम-। त्रीन् समुद्रान्। अस्मान्सीते॥

रलाट्टवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र ॥१७॥

रेफलकारौ ऋटवर्णाभ्यां ऋटसदृग्श्रुतिभ्यां यथासंख्यं व्यवधीयेते ऊष्मणि परभूते स्वरपरे सर्वत्र संहितायां पदे च। अन्तःपदे नानापदे च यौ तौ विधायकावुक्तौ तौ स्वरावुत व्यञ्जनाविति। शृणु। ऋटस्वरसदृशौ व्यञ्जनावर्द्धमात्रकाविति ब्रूमः। तौ स्वरभक्तिरित्यन्येषु पदेषु प्रसिद्धौ। न चैतौ वर्णौ रेफलकारयोरूष्मणां च मध्यवर्त्तिनावपि सन्तौ संयोगस्य विघातं कुरुतः। स्वरसदृशत्वात्। तथा चाह शौनकः। "न संयोगं स्वरभक्तिर्विहन्ति" यथा (३अ० ३८क०) गार्हपत्यः। अत्र हकाररेफयोरन्तरावपि स्वरभक्तिः सती रेफहकारयोः संयोगं न विहन्ति। एवमन्यत्रापि द्रष्टव्यम्। (१२अ० ६९क०) अग्न ऽऽउपचितामसि। (५अ० ४३क०) घृतवल्लयः।

(२३अ० ५१क०) उ॑पवल्हामसि त्वा। पदमध्योदाहरणम् (२अ० ८क०) वेर्हो॑त्रम्। (२२अ० ११क०) सवि॒तुर्हवामहे। स्वरोदय इति किम्। (२१अ० ४३क०) प्रा॒ख्तः॑। (२८अ० १क०) द्विवो॑ वर्ष्मन्। (२५अ० १क०) मृदुँवस्वः॑। (२५अ० ८क०) अस्रु॑भिर्द्रादुनी॑भिः॥

प्रगृह्यं चर्चायामितिना पदेषु ॥ १८ ॥

प्रगृह्यसंज्ञकं यत्पदं तच्चर्चायां परभूतायामितिना आगमिकेन व्यवधीयते। चर्चाशब्देन इतिकरणात्परतो या तस्यैव पदस्य द्विरुक्तिः सोच्यते। पदेष्वित्यधिकारार्थं वचनम्। इतः प्रभृति पदाधिकारो वर्त्तते। यथा (१७अ० ८४क०) हेऽइति हे। शौर्षेऽइति शौर्षे। (४अ० २२क०) अस्मेऽइत्यस्मे। त्वेऽइति त्वे॥

रिफितं च संहितायामनिरुक्तम् ॥ १९ ॥

रिफितं चशब्दादितिना आगमिकेन व्यवधीयते चर्चायां परभूतायां संहितायामनिरुक्तंरेफं यत्। यथा (४अ० १५क०) पुन॒रिति॒ पुन॑ः ÷। (३अ० ३६क०) स्व॒रिति॒ स्व॒ः ÷। संहितायामनिरुक्तमिति किम्। (४अ० १५क०) पुन॑ः ÷। मन॑ः ÷॥

पदावृत्तौ चान्तरेण ॥ २० ॥

पदस्यावृत्तिर्द्विरुक्तिः तस्यां पदावृत्तौ सत्यां अन्तरेण इति भवति सा च नोक्ता अतस्तत्प्रतिपादनार्थमाह॥

क्रमोक्तावृत्तिः पदेषु ॥ २१ ॥

क्रमशास्त्रे या पदावृत्तिरुक्ता सा पदेष्वपि भवति। क्रमशास्त्रातिदेशोऽयम्। तत्र चैतदुक्तमग्रे। "स्थितोपस्थितमवसानस्थान्तःपददीर्घीभावे" "विनामे" "प्रगृह्ये" "रिफिते

निरुक्ते"। अवग्रहे यथा (१अ० १क०) प्र_जावतीरिति प्र_जा। वतीः। अन्तःपदे दीर्घाभावे यथा (१७अ० ५१क०) मामग्रहानः। ममग्रहानऽइति ममग्रहानः। विनामे च भवति। यथा (१८अ० २क०) सुषाव। सुसावेति सु। साव। प्रग्रहे यथा (३अ० १३क०) इन्द्राग्नोऽइतीन्द्राग्नी। रिफिते निरुक्ते भवति यथा (४अ० १५क०) पुन_रिति पुन÷। प्राणः॥

सुपदावसानवर्जम् ॥ २२ ॥

क्रमोक्तावृत्तिः पदेष्वित्युक्तम्। तस्यायमपवादः। सुपदावसाने वर्जयित्वाऽन्यत्र क्रमोक्तावृत्तिर्भवति। तत्र "सुपदे शाकटायनः" इति शाकटायनमतेनावृत्तिः। सा च कतमाना भवति। अवसाने तु सर्वशाखिनामावृत्तिर्भवति। तदुभयं निषिध्यते॥

अनितावन्तर्विकारागमं प्रागुक्ता ॥ २३ ॥

"अनितावध्यायः" इत्यत आरभ्य यावदध्यायपरिसमाप्तिरस्मिन्नन्तराले यस्य पदस्य अन्तरा विकार आगमो वा विहितस्तदन्तर्विकारागमं पदं पूर्वमुक्ता पश्चात्पदावृत्तिः कर्त्तव्या। स्थितोपस्थितं कर्त्तव्यमित्यर्थः। तत्र चोपचरितषत्वणादि विकारजातमुक्ता। यथा (१०अ० २६क०) श्रेयस्कर। श्रेय÷ करेति श्रेय÷। कर। (१९अ० २क०) सुषाव। सुसावेति सु। साव। (८अ० ४८क०) परमेष्ठी। परमेष्ठीति परमे। ष्ठी। (७अ० ३८क०) वृष्टिमाँ २॥ऽ इव। वृष्टिमानिवेति वृष्टिमान्। इव। अनितावन्तर्विकारागममिति किम्। अस्यावधेरधस्तादुपरिष्टाच्च प्राग्वचनं मा भूत्। यथाऽवधेरधस्ताद्भवति। "विसर्जनीयः"। "चश्छयोः शम्"। दुश्चवनऽइति दुः। श्चवनः। "तपरयोः तम्"। तवस्तरमिति तव÷। तरम्। एवमादि।

अथोपरिष्टादवधेर्दर्शयिष्यामः। "अनुस्वारꣳ रेफसꣳ मकारः"। सꣳ मꣳमिति सम्। सꣳम्। "नुश्चान्तः पदेऽरेफे"। प्रपिवाꣳमऽइति पपि। वाꣳस+। संस्कृतिः(:)। अस्यावधेर्बहिर्यथा संहितायां पदे भवतीत्यर्थः॥

विश्पतीवेति च॥ २४॥

विश्पतीवेत्येतच्च पदं प्रागुक्ता पश्चात्पदावृत्तिः कर्त्तव्या। वेष्टक इत्यर्थः। यथा (३३अ० ४०क०) आ विश्पतीव। विश्पतीऽइवेति विश्पतीव। इव। एतत्पदमस्यावधेर्बहिरन्तः प्रागुक्तिरुच्यते॥

स्वरश्छकारे चकारेण सर्वत्र॥ २५॥

स्वरो व्यवधीयते छकारे प्रत्यये परभूते चकारेणागामिकेन सर्वत्र संहितायां पदे च। यथा (१६अ० ४क०) अच्छा वदामसि। (३५अ० १७क०) यच्छा नः शर्म सप्रथाः(:)। पदेषूदाहरणं यथा (१५अ० ५क०) आच्छच्छन्द+। प्रच्छच्छन्द+। (१७अ० ४६क०) वर्मणाच्छादयामि। संहितोदाहरणम् (१५अ० ४क०) कुकुप्छन्द+। पदाधिकारात्पदेष्वेव चकारेण व्यवधानं माभूदिति सर्वत्र ग्रहणात्संहितापदक्रमेष्वपि भवति॥

यस्यातिहायसहेति न॥ २६॥

यस्य अतिहाय सह इत्येतैः पदैरुपहितः स्वरः छकारे प्रत्यये न चकारेण व्यवधीयते। यस्य यथा (२५अ० ११क०) यस्य छाया। अतिहाय यथा (२५अ० ११क०) अतिहाय छिद्रा गात्राणि। सह यथा (३४अ० ४८क०) सह स्तोमाः सह छन्दसः॥

विश्वाऽऊर्ध्वान्तं परिद्विषस्त्वं त्वां यदयो

विराजत्यनिराऽअवीवृधन् परिष्ठाः सुक्षितयऽआ-
शाऽओषधीराभाह्यमीवा हि मायास्तेऽसीतेषु
॥ २७ ॥

विश्वा इत्येतत्पदं ऊष्मान्तं भवति परिद्विषादिषु प्रत्ययेषु । परिद्विषशब्दे यथा (४अ० २८क०) यं न विश्वाः परिद्विषः । त्वं यथा (६अ० २४क०) विश्वास्त्वम्म जाऽउ पावरोहि । त्वां यथा (६अ० २४क०) विश्वास्त्वाम्म जाऽउ पावरोहन्तु । यदजयो यथा (१८अ० ६८क०) विश्वा यदजय स्पृधः । विराजति यथा (२०अ० ७७क०) धियो विश्वा विराजति । अनिरा यथा (११अ० ४४क०) व्यस्यन्विश्वाऽअनिराः । अवीवृधन्यथा (१२अ० ४८क०) इन्द्रँ विश्वाऽअवीवृधन् । परिष्ठा यथा (१२अ० ७५क०) अति विश्वाः परिष्ठाः । सुक्षितयो यथा (१२अ० १०७क०) विश्वाः सुक्षितयः पृथक् । आशा यथा (२७अ० ७क०) विश्वाऽआशाः प्रमुञ्चन् । ओषधीर्यथा (१८अ० ६६क०) पृष्टो विश्वाऽओषधीरा विवेश । आभाहि यथा (२७अ० १क०) विश्वाऽआभाहि प्रदिशश्चतस्रः । अमीवा यथा विश्वाऽअमीवाः । हि माया यथा विश्वा हि मायाः । ते यथा (३३अ० ६१क०) विश्वास्ते स्पृधः अथयन्त । अभि यथा (३३अ० ६०क०) अभि विश्वाऽअभि स्पृधः । ननु "स्वरसंस्कारयोश्छन्दसि नियमः" इति स्वरसंस्कारावधिकृतौ वेदितव्यौ न चायं स्वरो न संस्कारः । अत्र हि इदमूष्मान्तं पदमिदं स्वरान्तं पदमित्येतदुच्यते । अप्रस्तुताभिधानमेतत् । उच्यते पदानां सन्दिह्यमानानां निश्चयो नैव दोषायेति तावत्पश्यामः । अतः साधुपदनिश्चय-लक्षणमिति । अनभिज्ञस्य बोधनार्थम् ॥

पृथिव्या स्वरान्तर्० सम्भवः शुक्रो मन्थी पृथिवीं परो देवेभिरित्येतेषु ॥ २८ ॥

पृथिव्या इत्येत्पदं स्वरान्तं भवति सम्भवादिषु पदेषु परेषु। सम्भव यथा (४अ० १३क०) पृथिवी मा विशत पृथिव्या सम्भव। शुक्रो यथा (७अ० १२क०) मज्मन्मानो दिवा पृथिव्या शुक्रः। मन्थी यथा (मज्मन्मानो दिवा पृथिव्या मन्थी। पृथिवीं यथा (१५अ० ६क०) पृथिव्या पृथिवीम्। परो देवेभिर्यथा (१७अ० २६क०) पृथिव्या परो देवेभिः। स्वरान्तमिति किम्। (११अ० ७१क०) नाभा पृथिव्याः समिधाने ॥

च विश्वा वो ब्रह्म विश्वा हरी युक्तास्ते शफानां जजान नु कमित्येतेष्विमा ॥ २९ ॥

च विश्वादिषु प्रत्ययेषु परेषु इमा इत्येतत्पदं स्वरान्तं भवति। च विश्वा यथा (८क० २३क०) इमा च विश्वा भुवनानि। वो यथा (१८अ० ५३क०) इमा वो हव्या चकृमा जुषध्वम्। ब्रह्म यथा (१४अ० २क०) इमा ब्रह्म पीपिहि सौभगाय। विश्वा यथा (१७अ० १६क०) य इमा विश्वा भुवनानि जुह्वत्। हरी यथा (३३अ० ६८क०) व इमा हरी वहतस्तानोऽअच्छ। युक्ता यथा (३४अ० १८क०) सवना कृतेमा युक्ता ग्रावाणः। ते यथा (२८अ० १६क०) इमा ते वाजिन्नव मार्जनानि। शफा यथा (२८अ० १६क०) इमा शफानाँ सनितुः। जजान यथा (१७अ० २८क०) न तँ विदाथ य इमा जजान। नु कं यथा (२५अ० ४४क०) इमा नु कं भुवना सीषधाम ॥

हवेमोतेमा च ॥ ३० ॥

हवेमा उतेमा एते च द्वे पदे यथागृहीतमेव स्वरान्ते भवतः। हवेमा यथा (२१अ० ८क०) श्रुतम्मे मित्रावरुणा हवेमा। उतेमा यथा (१७अ० २०क०) विश्वकर्मन्नुतेमा॥

विष्णो ते बभूव नासत्या भिषजा नऽआवोढं या देवा हविषो नो मृडातो नोऽअच्छ विमुञ्चेत्येतेषु ता॥ ३१॥

विष्णो इत्यादिषु प्रत्ययेषु परेषु ता इत्येतत्पदं स्वरान्तं भवति। विष्णो यथा (२अ० ६क०) ता विष्णो पाहि। ते यथा (२५अ० ४०क०) सर्वा ता ते ब्रह्मणा सूदयामि। बभूव यथा (१०अ० २०क०) परि ता बभूव। नासत्या यथा (२०अ० ७४क०) ता नासत्या मुपेशसा। भिषजा यथा (२०अ० ७५क०) ता भिषजा मुकर्मणा। नऽआवोढं यथा (२०अ० ८३क०) ता नऽआवोढमश्विना। या देवा यथा (२१अ० ५७क०) इति ता या देवा देवदानानि। हविषो यथा (२५अ० ३८क०) स्रुचेव ता हविषोऽअहरेषु। नो मृडातो यथा (३३अ० ५५क०) ता नो मृडा तऽईट्टे। अच्छ यथा (३३अ० ६८क०) इमा हरी वहतस्ता नोऽअच्छ। विमुञ्च यथा (१७अ० २२क०) नियुद्भिर्वायविह ता विमुञ्च॥

ता ता च॥ ३२॥

एतौ च ता ता शब्दौ पदावयवभूतौ स्वरान्तौ भवतः। यथा (२५अ० ४२क०) ता ता पिण्डानां प्रजुहोम्यग्नौ॥

धिष्णिया वरिवो विदं धिष्णिया युवमिति च॥ ३३॥

एतौ च यथागृहीतौ धिष्णियाशब्दौ स्वरान्तौ भवतः।

यथा (२०अ० ७३क०) धिष्ण्या वरिवो विदम्। यथा (२५अ० १५क०) तदश्विना शृणुतं धिष्ण्या युवम्। इतिशब्दः पदाधिकारप्रकरणसमाप्तिज्ञापनार्थः॥

भाव्युपधश्चरिद्विसर्जनीयः॥ ३४॥

भावी उपधाभूतो यस्य स भाव्युपधः कोऽसौ विसर्जनीयः। रिद्विसर्जनीयश्च "विसर्जनीयो रिफित" इत्यत आरभ्य यः परिभाषितः एतौ विसर्जनीयावधिकृतौ वेदितव्यौ। अधिकारसूत्रमेतत्॥

रेफे लुप्यते दीर्घश्चोपधा॥ ३५॥

रेफे प्रत्यये लुप्यते विसर्जनीय उभयरूपोऽपि भाव्युपधो रिद्विसर्जनीयश्च उपधाभूतश्च स्वरो दीर्घमापद्यते। भाव्युपधो भवति यथा (२४ अ० ३८क०) रुरुः रौद्रः। रुरू रौद्र. क्रीयं÷। (७अ० १६क०) मतिभिः रिहन्ति। मतिभी रिहन्ति। रिद्विसर्जनीयो भवति। यथा प्रातः रात्रिः। प्रातारात्रिः। पुनः रक्तम्। पुनारक्तम्। रूपोदाहरणमेतत्। उपरितनसूत्रे प्रयोजनं भविष्यति। भावीत्यादि किम्। (१६अ० ५०क०) परि नो रुद्रस्य॥

रेफश्च स्वरधौ॥ ३६॥

रेफमापद्यते उभयरूपो विसर्जनीयः स्वरेषु परभूतेषु धिसंज्ञकेषु च परभूतेषु। स्वरे भवति यथा (८अ० ३१क०) अग्निः एकाक्षरेण। अग्निरेकाक्षरेण। (३४अ० ३४क०) प्रातः अग्निम्। प्रातरग्निम्। प्रातः इन्द्रम्। प्रातरिन्द्रम्। धिसंज्ञकेषु भवति यथा (३अ० १५क०) विरुरुचुः वनेषु। विरुरुचुर्वनेषु। (८अ० ६क०) सवितः वामम्। वाममद्य सवितर्वामम। भावीत्यादि किम्। द्विवो मूर्धा॥

कण्ठ्यपूर्वो यकारमरिफितः ॥ ३७ ॥

अवर्णः कण्ठ्यः अवर्णपूर्वो विसर्जनीयो अरिफितो यकारमापद्यते। स्वरेषु यथा (२४अ० ३९क०) श्वित्रः आदित्यानाम्। श्वित्रयादित्यानामित्येवं स्थिते यवयोः पदान्तयोरित्यादिना यकारलोपः। ततः श्वित्रऽआदित्यानामिति रूपं सिध्यति। (१७अ० ९२क०) इन्द्रः एकम्। इन्द्रऽएकठ्ँ० स्तूय्ँम्। (१२अ० ७५क०) याः ओषधीः। याऽओषधीः पूर्वा+। (१२अ० ८९क०) याः अफलाः। याऽअफलाऽअपुष्पाः) ॥

लोपन्धौ ॥ ३८ ॥

अरिफितः कण्ठ्यपूर्वो विसर्जनीयो लोपमापद्यते धिसंज्ञकेषु प्रत्ययेषु। यथा (१अ० १क०) अयक्ष्माः मा। अयक्ष्मा मा वं+। १अ० २४क०) अततेजाः वायुः। अततेजा वायुरसि। अरिफित इति किम्। (१अ० २क०) मा हार्मा तेऽयज्ञपतिः ॥

भूमेश्चाकारेऽपृक्ते ॥ ३८ ॥

भूमिशब्दसम्बन्धी विसर्जनीयो लुप्यते। आकारेऽपृक्तसंज्ञके परे। यथा (२९अ० १९क०) भूमिः आदत्ते। द्वित्वसङ्ख्यादत्ते। आकारेऽपृक्ते इति किम्। (२३अ० १०क०) भूमिरा वपनम्मम हत् ॥

यकाराकारयोर्जास्पत्ये पदे ॥ ४० ॥

जास्पत्ये पदे यकारस्य च लोपो भवति। जायास्पत्यमिति प्राप्ते यकाराकारयोर्लोपे कृते जास्पत्यमिति रूपं

भवति। यथा (३३अ० १२क०) सꣳस्रा॑स्त्यर्ठ० मुय॒मा ह॑णुष्व॥

अलोपो माँस्पचन्याः ॥ ४१ ॥

अकारलोपो माँस्पचनीशब्दे द्रष्टव्यः। माँसपचनी इति प्राप्ते यथा (२५अ० २६क०) यन्मौ॑ꣳसं म॒ाँस्प॑च॒न्याः॥

सर्वो अकार ओकारम् ॥ ४२ ॥

सर्वः अकारः ओकारमापद्यते। सर्वग्रहणात्लोपधो विसर्जनीयो धिसंज्ञकेषु प्रत्ययेषु। यथा (१अ० १क०) अघश्च॑र्ठ०स॒ः ध्रुवाः। (१अ० २क०) मातरिश्वनः घर्मः। मा॒त॒रिश्व॑नो घ॒र्मः। अरिफित इति किम्। (४अ० १५क०) पुन॒र्मन॑ ÷ ॥

अकारे च ॥ ४३ ॥

अकारे च प्रत्यये सर्वो अकार ओकारमापद्यते। यथा (२अ० २१क०) वे॒दः॑ अ॒ग्नि। वे॒दो॑ऽसि। (१अ० १२क०) अ॒ग्ने गु॒वो॑ऽअ॒ग्ने पु॒वः॑। अरिफित इति किम्। (१२अ० ८क०) पुन॑रग्ने। (४अ० १५क०) पुन॒रायु॑ ÷ ॥

एषो ह च ॥ ४४ ॥

एष इत्ययं विसर्जनीय ओकारमापद्यते ह इत्येतस्मिन् पदे प्रत्यये। अवश्यमत्र "एष च" इत्यनेन एषशब्दस्य व्यञ्जनमात्रे विसर्जनीयलोपो विहितः तेनात्र ओकारो निपात्यते। यथा (३२अ० ३क०) एषो ह॑ दे॒वः॑॥

स्वो रुहावहश्च रात्र्याम् ॥ ४५ ॥

स्वरित्ययं विसर्जनीयो रुहौ प्रत्यये ओकारमापद्यते। अवहरित्ययं च रात्रिप्रत्यये। यथा। (११अ० २२क०) स्वः रुहाणाः। स्वो रु॑हा॒णाऽअधि॒ नाक॑म् स्वः रोहाव। जाय-

ऽएहि स्वो रोहाव (३अ० २२क०) अहः रात्रे । श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे । (१८अ० २३क०) अहो रात्रेऽऊर्वष्ठीवे । (२७अ० ४५क०) अहो रात्रास्ते कल्पन्ताम् ॥

स्वरे भाव्यन्तस्थाम् ॥ ४६ ॥

स्वरेऽसवर्णे प्रत्यये भावी अन्तस्थामापद्यते । यथा (३अ० ५९क०) त्रि अम्बकम् । त्र्यम्बकँ यजामहे । (११अ० ४४क०) वाजी अर्वन् । आशुर्भऽव वाज्यर्वन् । (११अ० ७०क०) द्रु अन्नः । द्र्वन्नः सर्पिरासुतिः । (११अ० ४४क०) वीडु अङ्गः । स्थिरो भव वीडुऽङ्गः ॥

सन्ध्यक्षरमयवायावम् ॥ ४७ ॥

ए ओ ऐ औ एतानि च यथाक्रमं स्वरे प्रत्यये अय् अव् आय् आव् इवर्णमापद्यते । यथा (३अ० २७क०) इडे आ इहि । इडऽएहि । (४अ० २७क०) क्षयाने एते । क्षयानयेते । (२५अ० १क०) सरस्वत्यै अग्रजिह्वम् । सरस्वत्याऽग्रजिह्वम् । (१०अ० १६क०) हिरण्यरूपौ उषसः । हिरण्यरूपाऽउषसः । अत्र च "यवयोः पदान्तयोः" इत्यादिना यकारवकारलोपः । "न वकारस्यासस्थानऽएकेषामिति" न वकारस्य लोपः ।

उदात्तस्यान्तस्थीभावे स्वरितं परमनुदात्तम् ॥ ४८ ॥

उदात्तस्य स्वरस्यान्तस्थापत्तौ सत्यां परं यदनुदात्तमक्षरं तत् स्वरितं भवति । (३अ० ५९क०) त्रि अम्बकम् । त्र्यम्बकम् । (३३अ० ८८क०) देवी एतु । द्व्येतु सूनृता । (११अ० ७०क०) द्रु अन्नः । द्र्वन्नः । (३अ० ५२क०) नु इन्द्र । योजान्विन्द्र ।

ननु "युवर्णौ यवौ स्वैप्र" इत्यत्र स्वरितो विहितः पुनः किमर्थमिदमुच्यते "स्वरितं पदं परमनुदात्तमिति" द्वयोः स्वरयोः सन्धावयं स्वरितो निगद्यते तत्र न ज्ञायते किं पूर्वस्य स्वरस्य स्थाने स्वरित उत उत्तरस्य तत्र यत्परमक्षरं अनुदात्तं तत् स्वरितं भवतीति सूत्रारम्भार्थः ॥

कण्ठ ऋकारे ह्रस्वम् ॥ ४९ ॥

कण्ठः स्वरः ऋकारे प्रत्यये ह्रस्वस्वरमापद्यते । यथा (१३अ० ५८क०) विश्वकर्मा ऋषिः । विश्वकर्मऽऋषिः । (२१अ० ४०क०) स्वाहा ऋषभम् । स्वाहाऽऋषभमिन्द्राय । (१५अ० ४९क०) ये न ऋषयः । ये नऽऋषयस्तपसा । (१८अ० ५२क०) यत्र ऋषयः । यत्रऽऋषयो जग्मुः । ह्रस्वस्य स्थाने ह्रस्वो विधीयमानोऽन्यस्याः संहितायाः निवृत्तिं करोति विवृत्तिसंहितैवात्र भवति न स्वरसंहिता ॥

अथैकमुत्तरञ्च ॥ ५० ॥

अथानन्तरमुत्तरो वर्णः चशब्दात् पूर्वश्च एकं वर्णं विकारभूतमापद्यते, इत्येतदधिकृतं वेदितव्यम् ॥

सिठ० सवर्णे दीर्घम् ॥ ५१ ॥

"सिमादितोऽष्टौ स्वराणाम्" इत्युक्तम् । सिम्संज्ञकः स्वरः सवर्णे स्वरे प्रत्यये परे पूर्व उत्तरश्च एकं वर्णं दीर्घमापद्यते । यथा (१अ० १क०) प्र अर्षयतु । प्रार्षयतु । (२६अ० २३क०) तव अयम् । तवायम् । (२०अ० ८१क०) नासत्या अश्वावत् । नासत्याश्वावत् । (२०अ० ७८क०) स्रुचि इव । स्रुचीव घृतम् । (१२अ० ६क०) हि इम् । वि होमि इत्ते । (२अ० १५क०) अनु उत् । अनूत्पेम ॥

अनुनासिकवत्यनुनासिकम् ॥ ५२ ॥

अनुनासिकवत्येकीभावे पूर्वश्च परश्च एकमनुनासिकमापद्यते । यथा (१५अ० १८क०) उप अर्ठ० शुः । उपाऽंशुः । (१७अ० ८६क०) उप अर्ठ० शुना । उपाऽंशुना सम्मृत्वम् । "अनुनासिका चोपधा" इत्यादिना एकस्मिन् पक्षे उपधाऽनुनासिक्यं एकस्मिन् पक्षे अनुस्वारो विहितः । तत्र यस्मिन् पक्षे उपधाऽनुनासिक्यं तमधिकृत्योच्यते । एतदनुनासिकवत्यनुनासिकमिति ॥

कण्ठ्यादिवर्ण एकारम् ॥ ५३ ॥

कण्ठ्यात्पर इवर्णः पूर्वस्वरश्च परश्च कण्ठ्य एकमेकारं वर्णमापद्यते । यथा (१८अ० ४६क०) वरुण इह । वरुणेह वा । (४अ० १क०) आ इदम् । एदमगन्म ॥

उवर्ण ओकारम् ॥ ५४ ॥

कण्ठ्यादुत्तरे उवर्णे कण्ठ्य उवर्णश्चैकमोकारमापद्यते । यथा (१अ० १क०) त्वा ऊर्जे । त्वोर्जे । (२अ० ३क०) त्वा उत्तरत । मित्रावरुणौ त्वोत्तरतः ॥

समुद्रस्येमँस्त्वे मँस्त्वोश्मन्निति च ॥५५॥

"सन्ध्यक्षर ऐकारौकारौ" इति वक्ष्यति तस्य पुरस्तादपवादभूत उत्तरसन्ध्यक्षरस्वरूप एकादेशो निपात्यते । यथा (१३अ० १७क०) समुद्रस्य एमन् । समुद्रस्येमन् । (१३अ० ५३क०) त्वा एमन् । अपान्त्वेमन् (१३अ० ५३क०) त्वा ओश्मन् । अपान्त्वोश्मन् ॥

एजत्योजोरेकेषाम् ॥ ५६ ॥

अवर्णात् पूर्वस्मादेजत्योजोः प्रत्यययोरेकेषामाचार्याणाम-

तेन उत्तरसवर्ण आदेशो भवति। यथा (४०अ० ६क०) न एजति। नैजति। ओजः यथा (३६अ० १क०) सह ओजः। वागोज॑+ मुहोज॑+। एकेषामिति किम्। तदेजति तन्नैजति। वागोज॑+ मुहोज॑+॥

सन्ध्यक्षर ऐकारौकारौ॥ ५७॥

अवर्णः सन्ध्यक्षरे प्रत्यये पूर्व उत्तरश्च एकमक्षरमापद्यते। ऐकारम्। औकारञ्च। अत्र चत्वारि सन्ध्यक्षराणि द्वावेतौ विकारौ ऐकारौकारौ तत्र यथासम्भवात् "विकारौ यथासन्नम्" इति एकारे ऐकारे च प्रत्यये ऐकारो भवति। ओकारे औकारे च प्रत्यये औकारो भवति। एकारे भवति यथा (२२अ० ३४क०) स्वाहा एकतालय। स्वाहैकतालय। ऐकारे भवति यथा (१८अ० १८क०) इन्द्राय ऐन्द्रम्। इन्द्रायैन्द्रम्। औकारे भवति यथा (८अ० ३८क०) इन्द्र ओजिष्ठ। इन्द्रौजिष्ठ। औकारे भवति यथा (३१अ० ८क०) प्र औक्षन्। प्रौक्षन्॥

वाहौ च स्वरभूते॥ ५८॥

वाहौ च प्रत्यये स्वरभूते पूर्वः कण्ठ्य उत्तरस्य वाहेः सम्बन्धी उवर्ण एकमोकारमापद्यते। यथा (१८अ० २६क०) तुर्य ऊहौ। तुर्योहौ। (१८अ० २७क०) पष्ठ ऊहौ। पष्ठोहौ। स्वरभूत इति किम्। (१८अ० २७क०) पष्ठवाट्च मे। "उवर्ण ओकारम्" इत्यस्यायमपवादः॥

आरमृकारोऽपृक्तात्॥ ५९॥

अपृक्तात्परात्र ऋकार आरमापद्यते सहापृक्तेन। यथा (३०अ० ८क०) आ ऋत्यै। आर्त्यै परिवित्तम्। अत्र स्वरो रेफसहकारमारोहति॥

ऌकारस्याल्कारम् ॥ ९० ॥

इदं सूत्रं केचिन्न पठन्ति व्यर्थत्वात् । ऌकारस्याल्कारमापद्यते । आ ऌकारः । आल्कारः ॥

एदोश्च्रां पूर्वमकारः ॥ ९१ ॥

एकारौकाराभ्यां पर अकारः पूर्वरूपमापद्यते । यथा (१८अ० ५७क०) ते अवन्तु । तेऽवन्त्वस्मान् । (२४अ० ३७क०) ते अप्सरसाम् । तेऽप्सरसाम् । (२अ० २१क०) वेदः असि । वेदोऽसि । (२अ० २क०) स्तुपः असि । स्तुपोऽसि । "सर्वो अकार ओकारम्" । "अकारे च" इत्यनेन च ओकारः ॥

तौ चेदुदात्तावनुदात्ते स्वरितौ ॥ ९२ ॥

तौ यदि एकारौकारौ उदात्तौ भवतः तदाऽनुदात्ते अकारे परे स्वरितौ भवतः । यथा वेदो असि । वेदोऽसि । स्तुपो असि । स्तुपोऽसि । ते अप्सरसाम् । तेऽप्सरसाम् । "एदोश्च्रामकारो लुगभिनिहितः" इति स्वरितत्वं विहितमेव । इह त्वपवादार्थं तदुच्यते ॥

न देशे भवति ॥ ९३ ॥

देशे इत्ययमेकारः अभवदित्येतस्मिन् प्रत्यये न स्वरितो भवति । यथा (३४अ० ११क०) देशे अभवत् । सो देशेऽभवत्सरित् ॥

गाहमानः शिवो भरन्तो द्वेषोभ्यो जम्भयन्तो वाजे वाजजितो मदन्तः शोचेऽवसे सुषुवे ज्योते सुपर्णो वीरुधः सुवीरो धातवे सूनवे द्रूणानऽआशवो वहतः सङ्क्रन्दनो बाहवोऽयुध्योऽद्रुहः ॥९४॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते। अभिनिधानं च पूर्वरूपता। गाहमानो यथा (१७अ० ३८क०) गाहमानोऽदयः)। शिवो यथा (३अ० ६१क०) अहिर्ठ० सवः शिवोऽतीहि। भरन्तो यथा (११अ० ७५क०) भरन्तोऽखायेव तिष्ठते। द्वेषोभ्यो यथा (५अ० ३५क०) द्वेषोभ्योऽन्यकृतेभ्यः। जभयन्तो यथा (८अ० १६क०) जभयन्तोऽहिम्। वाजे यथा (८अ० १८क०) वाजेवाजेऽवत। वाजजितो यथा (८अ० १३क०) वाजजितोऽध्वनः। मदन्तो यथा (११अ० ७५क०) मदन्तोऽग्ने मा ते। शोचे यथा (१२अ० २६क०) भद्रशोचेऽपूपम्। अवसे यथा (८अ० २६क०) अवसेऽग्निमन्वारभामहे। सुषुवे यथा (८अ० २३क०) सुषुवेऽग्रेसोमम्। ज्योते यथा (८अ० ४३क०) ज्योतेऽदितिं सरस्वति। सुपर्णो यथा (१२अ० ४क०) सुपर्णोऽसि गरुत्मान्। वीरुधो यथा (१२अ० ८४क०) वीरुधोऽस्यैसन्दत्त। सुवीरो यथा (४अ० ३७क०) सुवीरोऽवीरहा। धातवे यथा (३८अ० ५क०) सरस्वतिं तमिह धातवेऽकः। सूनवे यथा (३अ० २५क०) सूनवेऽग्ने सूपायनो भव। दूणानो यथा (१३अ० ८क०) दूणानोऽस्तासि। आशवो यथा (१५अ० ४१क०) आशवोऽस्तम्। वहतो यथा (८अ० ३५क०) वहतोऽप्रतिधृष्टशवसम्। सङ्क्रन्दनो यथा (१७अ० ३३क०) सङ्क्रन्दनोऽनिमिषः)। बाहवो यथा (१७अ० ४६क०) बाहवोऽनाधृष्या यथाऽसथ। अयुध्यो यथा (१७अ० ३८क०) अयुध्योऽस्याकूर्ठ० सेनाः। अद्रुहो यथा (१२अ० ५०क०) अद्रुहोऽनमीवाऽइषो महीः)। ननु "एदोद्भ्यां पूर्वसवर्णः" इत्यनेनैवाभिनिहितः सिद्धः किमर्थं गाहमानादिभ्य उत्तरस्याकारस्याभिधानमुच्यते। नैवाभिनिहितः सिद्धः "प्रकृतिभाव ऋतु" इति प्रकृतिभावमृतु वक्ष्यति तस्यायं पुरस्तादपवादः॥

वोऽहर्ठ० सोऽहर्ठ० सोऽस्माकं तेऽभिगरो वोऽर्वाची ॥ ९५ ॥

एते द्विपदा यथाग्रहीतमेवाभिनिधीयन्ते । वोऽहँ यथा (८म० ४क०) तेषाँ विश्विप्रियाणां वोऽहम् । सोऽहं यथा (१८म० ३५क०) सोऽहँवाजम् । सोऽस्माकं यथा (१२म० १०१क०) उर्वन्तरिक्षꣳ सोऽस्माकम् । तेऽभिगरो यथा (८म० ४७क०) अनुष्टुप्तेऽभिगरः ऽ । अर्वाची यथा (८म० ४क०) आवोऽर्वाची सुमतिः ऽ ॥

ये ऽन्नाचयोः ॥ ९६ ॥

ये इत्येतस्मात् परयोः अन्नात्तसम्बन्धी अकारोऽभिनिधीयते । अन्न यथा (१६म० ९२क०) ये ऽन्नेषु । अत्त यथा (१२म० ४५क०) येऽत्त स्थ पुराणा ये च नूतनाः ॥

अविद्याऽसम्भूत्योश्च ॥ ९७ ॥

अविद्या असम्भूतिसम्बन्धी अकारोऽभिनिधीयते । चकाराद् ये इत्येतस्मात् परः । अविद्या यथा (४०म० १२क०) ये ऽविद्यामुपासते । असम्भूतिं यथा (४०म० ९क०) ये ऽसम्भूतिमुपासते । इत्येतयोरिति किम् (१६म० ८क०) अधो ये ऽअस्य सत्वानः ॥

उपस्थे ऽन्तस्तेभ्योऽकरम् ॥ ९८ ॥

एतौ च द्विपदौ यथाग्रहीतमेवाऽभिनिधीयेते । उपस्थे ऽन्तो यथा (१२म० ३९क०) अग्ने मातुर्योपस्थे ऽन्तरश्याम् । तेभ्योऽकरं यथा (१६म० ८क०) अहन्तेभ्योऽकरम् ÷ ॥

नमोऽस्त्वसौवामण्याम् ॥ ९९ ॥

नमोऽस्तु एतच्च द्विपदं यथाग्रहीतमेवाभिनिधीयते ।

सौत्रामण्यां चेन्न भवति। यथा (१३अ० ६क०) नमोऽस्तु सर्पेभ्यः÷। असौत्रामण्यां किम्। (१९अ० ६८क०) नमोऽस्त्वश्मन्वते ये॥

विष्णोऽग्ने विशो रायोऽनग्नौ॥ ७०॥

विष्णो इत्यादिभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयतेऽग्नौ चेन्न भवति युञ्जानःऽ प्रथमामित्यत आरभ्य स्वाहोर्ध्वमिति यावदग्निरुच्यते। विष्णो यथा (८अ० १९क०) विष्णोऽस्युरुक्रमम्। अग्ने यथा (९अ० ७क०) तेऽग्नेऽक्षमयुञ्जन्। विशो यथा (७अ० २५क०) अथा नऽइन्द्रऽइद्विशोऽसपत्नाःऽ। रायो यथा (८अ० १५क०) त्वष्टा सुदत्रो विदधातु रायोऽनुः। अनग्नाविति किम्। (१८अ० ३१क०) विष्णोऽअद्य मरुतः÷। (१३अ० १क०) मर्यो गृह्णाम्यग्रेऽग्निम्। (१३अ० ११क०) भवा पायुर्विशोऽस्याः)। (१२अ० १०९क) अस्मे रायोऽअमर्त्य॥

सूर्य्योऽग्नेऽभौ॥ ७१॥

सूर्य्यो अग्ने इत्येताभ्यां परः अभिशब्दस्याकारोऽभिनिधीयते। सूर्य्यो यथा (१३अ० ३०क०) सूर्य्योऽभितापसीत्। अग्ने यथा (१२अ० ७क०) अग्नेऽभ्यावर्त्तिन्। अभाविति किम्। (३१अ० १२क०) चक्षोः सूर्य्योऽअजायत। (९अ० २९क०) अग्नेऽअच्छा वदेह नः÷॥

रिषो यवसे पुरुप्रियोऽन्नपतेऽर्णवे॥ ७२॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते। रिषो यथा (११अ० ६८क०) मा सुरिषोऽमुं। यवसे यथा (१५अ० ६२क०) प्रोथदश्वो न यवसेऽविष्यन्। पुरुप्रियो यथा (११अ० ७२क०) पुरुप्रियोऽग्ने। अन्नपते यथा (११अ० ८३क०) अन्न-

एतेऽन्नस्य । अर्णवे यथा (१६अ० ५५क०) अर्णवेऽन्तरिक्षे भवाः ॥

व्यपरे च ॥ ७३ ॥

एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । स चेदकारो वकारपरो यकारपरो वा भवति । यथा (१६अ० ५४क०) सहस्रयोजनेऽवधन्वानि । (१२अ० ६३क०) तिग्मते जोऽयस्मयम् ॥

गवे मे मनसो वाजयन्तः सोम्यासः पाशिनो विदानोऽनृते मूजवतो वृषणोऽपाको दौदिवस्त्रयस्त्रिꣳशे ब्रह्मणे यको रथो विभ्वतः पादो वसन्तः ॥ ७४ ॥

एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते । गवे यथा (३अ० ५६क०) गवेऽश्वाय । मे यथा (२०अ० ८क०) विष्णो मेऽङ्गानि । मनसो यथा (२०अ० ३४क०) मनसोऽसि विलायकः । वाजयन्तो यथा (१८अ० ७४क०) वाजयन्तोऽश्वाम । सोम्यासो यथा (१८अ० ५८क०) सोम्यासोऽग्निष्वात्ताः । पाशिनो यथा (२०अ० ५३क०) पाशिनोऽति धन्वेव । विदानो यथा (१८अ० ५४क०) संविदानोऽनु द्यावापृथिवी । अनृते यथा (१८अ० ७७क०) अश्वहामनृतेऽदधात् । मूजवतो यथा (३अ० ६१क०) मूजवतोऽतीहि । वृषणे यथा (२०अ० ४४क०) त्वष्टाऽदधच्चक्षुषमिन्द्राय वृषणेऽपाकः । अपाको यथा (२०अ० ४४क०) अपाकोऽचिष्टुर्यशसे । दौदिवो यथा (१७अ० ८क०) स नः + पावक दौदिवोऽग्ने । त्रयस्त्रिꣳशे यथा (२१अ० २८क०) त्रयस्त्रिꣳशेऽमृताः । ब्रह्मणे यथा (७अ० २१क०) शुक्रे ब्रह्मणेऽस्मै क्षत्राय । यको यथा (२३अ० २३क०) यको-

ऽस्तकौ शंकुस्तकः। रथो यथा (३अ० ३६क०) दूडभो रथोऽस्मान्। विश्वतो यथा (२५अ० १४क०) विश्वतोऽदब्धासः। पादो यथा (३१अ० ३क०) पादोऽस्य विश्वा भूतानि। वसन्तो यथा (३१अ० १४क०) वसन्तोऽस्यासीत्॥

अवोस्त्वग्ने गृहपतेऽभि सत्त्वानोऽहं नोऽजस्रया विमानोऽजस्रः सुतेऽश्विना नमोऽग्नये तेऽग्रं तेऽग्रे वृक्षस्य प्रथमोऽन्तस्तेऽन्येन॥ ७५॥

एतेषां च द्विपदानां उत्तरपदादिर्यथागृहीतमेवाकारोऽभिनिधीयते। अवोऽस्तु यथा (३अ० ३१क०) मह्यं त्रीणामवोऽस्तु। अग्ने गृहपते यथा (३अ० ३८क०) अग्ने गृहपतेऽभि द्युम्नम्। सत्त्वानो यथा (१६अ० ८क०) अस्य सत्त्वानोऽहम्। नोऽजस्रया यथा (१७अ० ७४क०) पुरो नोऽजस्रया सूर्म्या यविष्ठ्य। विमानोऽजस्रो यथा (१८अ० ६८क०) विमानोऽजस्रो घर्मो हविः। सुतेऽश्विना यथा (२०अ० ५६क०) तनूपा भिषजा सुतेऽश्विनोभा। नमोऽग्नये यथा (२३अ० १३क०) ब्रह्मा क्षणश्च नोऽवतु। तेऽग्रं यथा (२३अ० २४क०) माता च ते पिता च तेऽग्रम्। तेऽग्रे वृक्षस्य यथा (२३अ० २५क०) तेऽग्रे वृक्षस्य क्रीडतः। वृक्षस्येति किम्। (८अ० ७क०) तेऽग्रेऽश्वमयुञ्जन्। प्रथमोऽन्तो यथा (२३अ० ६३क०) स्वभूः स्वयंभूः प्रथमोऽन्तः। तेऽन्ये यथा (२३अ० १५क०) महिमा तेऽन्येन॥

पणयो जह्नीमोऽम्बिके॥ ७६॥

पणयः जह्नीमः अम्बिके एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयते। पणयो यथा (३५अ० १क०) अप्रेतो यन्तु

प्रणद्दोऽसु॑न्वाः। जह्नीमो यथा (३५अ० १०क०) अथा॑ जह्नी-मोऽधि॑वा ये। अम्बिके यथा (२३अ० १८क०) अम्बेऽअम्बि॑के-ऽम्बा॑लिके॥

नो॑ नुमोऽदुग्धाऽइव प्रचेतसोऽख्खान्नरो-ऽस्माकँ॑ वृषपाणयोऽख्वाः प्रदिशोऽनू॑दितेऽनागा-ऽअन्धसोऽर्चा॑ पनस्य॑ तेऽद्वा य॒ज्ञियेभ्योऽमृतत्वँ॑-विपश्चितोऽभिर्जनोऽनमीवऽआयुवोऽनु॑ नोऽद्य॑ देशेऽभवद्वयुनेऽजनिष्ट॑ विश्वनाऽपसोऽजायन्त॑ पूर्व्यासोऽरेणवो नोऽश्मा नोऽदितिर्नोऽहिः॥७७॥

एते च द्विपदा यथागृहीतमेवाभिनिधीयन्ते। नो नुमो-ऽदुग्धा इव यथा (२७अ० ३५क०) अ॒भि त्वा॑ शूर नो नुमो-ऽदु॑ग्धाऽइव। प्रचेतसोऽख्खान् यथा (२८अ० ५०क०) अख्खा॑जा॒न् प्रचे॑तसोऽख्खान्। नरोऽस्माकं यथा (२८अ० ५७क०) नो॑ नरो-ऽस्माक॑मिन्द्र। वृषपाणयोऽख्खा यथा (२८अ० ४४क०) वृष॑पाण॒-योऽख्खा॒ रथे॑भिः। प्रदिशोऽनु यथा (३२अ० ४क०) प्र॒दिशोऽनु॒ सर्वा॑ः। उदितेऽनागा यथा (३३अ० २०क०) य॒द्व॒ सूर॒ऽउ-दि॒तेऽना॑गाः। अन्धसोऽर्चा यथा (३३अ० २१क०) अन्ध॒सो-ऽर्चा॑ वि॒ख्वाना॑राय। पनस्य तेऽद्वा यथा (३३अ० ३८क०) पन॑स्य॒ ते॒ऽद्वा दे॑व॒म॒हाँ २॥ऽ अ॑सि। य॒ज्ञियेभ्योऽमृतत्वम् यथा (३३अ० ५४क०) य॒ज्ञिये॑भ्योऽमृत॒त्व॒ठ॰ सु॒वसि॑ भा॒गमु॑त्त॒मम्। विपश्चि-तोऽभिर्यथा (३३अ० ८१क०) पा॒व॒कव॑र्णाः शु॒चयो॑ वि॒प॒श्चि॒तो-ऽभिस्तोमै॑ः। जनोऽनमीवो यथा (३३अ० ८६क०) 'सव॑ऽइज्ज-नो॑ऽनमी॒वः)। आयवोऽनु यथा (३३अ० ९७क०) आ॒यवोऽनु॒-ष्टुवन्ति। नोऽद्य यथा (३४अ० ९क०) अनु॑ नो॒ऽद्यानु॑मतिः।

देशेऽभवद्यथा (३४अ० ११क०) सो देशेऽभवत्सरित्। वयुनेऽज-निष्ट यथा (३४अ० १४क०) इडायास्पुत्रो वयुनेऽजनिष्ट। विश्वनाऽपसोऽजायन्त यथा (३४अ० १२क०) विश्वनाऽपसोऽजायन्त मरुतः। पूर्व्यासोऽरेणवो यथा (३४अ० २७क०) पूर्व्यासोऽरेणवः सुकृताः। नोऽश्मा यथा (२९अ० ४९क०) नोऽश्मा भवतु नस्तनूः। नोऽदितिर्यथा (२९अ० ४९क०) अर्धं ब्रवीतु नोऽदितिः। नोऽहिर्यथा (३४अ० ५३क०) उत-नोऽहिर्बुध्न्यः॥

ब्राह्मणः॥ ७८॥

ब्राह्मण इत्येतस्मादोकारात्परोऽकारोऽभिनिधीयते। यथा (३१अ० ११क०) ब्राह्मणोऽस्य मुखम्॥

यजुष्षु च॥ ७९॥

"गाहमानः" इत्यादिभिः सूत्रैरर्कसम्बन्ध्यभिनिधानमुक्तम्। इदानीं यजुष्ष्वाह। यजुष्षु च विशेषेण एकारादोकाराच्च परोऽकारोऽभिनिधीयते। यथा (३१अ० ११क०) वेदः असि। वेदोऽसि। यथा (३१क० ११क०) कः असि। कोऽसि। यथा (३१अ० ११क०) ते अप्सरसाम्। तेऽप्सरसाम्॥

सङ्क्रमे च सर्वत्र॥ ८०॥

गलत्पदमतिक्रम्यागलता सह सन्धानं सङ्क्रमः। "विप-दाद्यावर्त्तमाने सङ्क्रम" इति वक्ष्यति तत्र सङ्क्रमे एकारो-काराभ्यां परोऽकारोऽभिनिधीयते। चशब्दात् सर्वत्र यजुष्षु ऋक्षु च। यजुष्षु भवति यथा (२०अ० १४क०) शूद्रे यदर्य्ये। अत्र पदेषु सङ्क्रमो भवति। यथा (२०अ० १४क०) शूद्रेऽर्य्ये। (२५अ० १९क०) तार्क्ष्यः अरिष्टनेमिः। अत्र क्रमसंहिता-

यामभिनिहितो भवति। यथा (२५अ० १८क०) शुद्रेऽर्य्ये। तार्क्ष्योऽरिष्टनेमिः। ऋत्तु भवति यथा (१७अ० ८०क०) यज्ञः अभि। यज्ञोऽभि। सङ्क्रम इति किम् (२५अ० १८क०) स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः॥

प्रकृतिभाव ऋत्तु ॥ ८१ ॥

"गाहमानादिभिः" स्तूवैर्ऋत्त्वभिनिहितोऽभिहितः। ततोऽन्यत्र ऋत्तु प्रकृतिभावो भवति। यथा (३अ० ११क०) उपप्रयन्तोऽअध्वरम्। आरेऽअस्मे च शृण्वते॥

जुषाणश्चानध्वनि ॥ ८२ ॥

"यजुषषुः च" इत्यनेन स्तूत्रेण यजुष्वभिनिधानमुक्तम्। तदपवादभूतमिदमारभ्यते। जुषाणशब्दसम्बन्धी ओकारः अनध्वनि प्रत्यये प्रकृत्या भवति। यथा (५अ० ३४क०) जुषाणोऽअग्नुराज्यस्य वेत्तु स्वाहा। अनध्वनीति किम्। जुषाणोऽध्वान्यस्य वेत्तु स्वाहा। इदमुदाहरणं शाखान्तरीयम्॥

ते चानुदात्तमनुदात्ते ॥ ८३ ॥

ते इत्येतच्च पदं अनुदात्तं चेत् प्रकृत्या भवति अनुदात्ते च प्रत्यये। यथा (५अ० ७क०) या तेऽग्नेयः सूया। अनुदात्तमिति किम्। (२४अ० ३७क०) तेऽग्न्रसाम्॥

हेडऽआपो गुवोऽपाग्ने धीरासो देवासऽउरो रक्षाणो मो वैश्वानरो वृषभो वचः प्राणऽउदानोऽक्रऽइमा मे वृष्णो दशमास्योऽभ्रऽआविक्तोऽरिष्टोऽअर्जुनः प्रत्याश्रावः स्विष्टो घासे प्रणीतस्तेभ्यो नमोऽअस्तु दूरे नोऽअद्य यज्ञे सधस्थे

सोऽध्वरायेन्द्रे हिरण्यपर्णो द्वारो देवोऽब्दो रथिभ्यो महद्भ्यः सर्ठ०सदः ॥ ८४ ॥

एते च एकारौकारा ऋक्षु यजुष्षु च प्रकृत्या भवन्ति अकारे प्रत्यये। अत्र च यत्र द्वयोः पदयोः पाठः सूत्रे तत्र नियमार्थः स तेनैव पदेन परभूतेनाधस्तनपदस्य प्रकृतिभावः। एकपदे समाम्नाये त्वकारावे प्रकृतिभावः। हेड्ये यथा (२१अ० ३क०) देवस्य हेडोऽवं यासिसीष्ठाः ऋक्त्वयं प्रकृतिभावः। "व्यपरे च" इत्यनेनाभिनिहिते प्राप्ते (६अ० २७क०) देवीरापोऽपान्नपात्। द्वितीयमुदाहरणं आपो। यथा (४अ० २क०) आपोऽअस्मान्। गुवो यथा (१अ० १२क०) देवीरापोऽअग्रे गुवोऽअग्रे पुवः। अपाग्ने यथा (१अ० १७क०) अपाग्नेऽअग्निम्। धीरासो यथा (१अ० २८क०) तामुधीरासोऽअनु दिश्य। देवासो यथा (४अ० १क०) यत्र देवासोऽअजुषन्त। उरो यथा (४अ० ७क०) द्यावापृथिवीऽउरोऽअन्तरिक्ष। रक्षाणो यथा (४अ० १४क०) रक्षाणोऽअप्रयुच्छन्। मो यथा (४अ० २२क०) मोऽअहन्तवं वीरम्। वैश्वानरो यथा (४अ० १४क०) वैश्वानरोऽअदब्धः। वृषभो यथा (४अ० ३०क०) अस्तभ्नाद्द्यांवृषभोऽअन्तरिक्षम्। वचो यथा (५अ० ८क०) उग्रंवचोऽअपावधीत्। प्राणो यथा (६अ० २०क०) प्राणोऽअङ्गेऽअङ्गे। उदानो यथा (६अ० २०क०) उदानोऽअङ्गेऽअङ्गे निधीतः। इमा मे यथा (१७अ० २क०) इमा मेऽअग्नऽइष्टकाः। वृषणो यथा (७अ० २क०) वृषणोऽअर्ठ०शुभ्याम्। दशमास्यो यथा (८अ० २८क०) दशमास्योऽअसत्। अन्धो यथा (८अ० ५४क०) अन्धोऽअच्छेतः। आवित्तो यथा (१०अ० ८क०) आवित्तोऽअग्निः। (१०अ० २१क०) अरिष्टोऽअर्जुनः। द्विपदमेतत्।

प्रत्याम्रावो यथा (१८अ० २४क०) प्रत्याम्रावोऽनुरूपः । स्विष्टो यथा (२१अ० ५८क०) स्विष्टोऽग्निरग्निना । घासे यथा (२१अ० ४४क०) घासेऽग्रञ्जाणाम् । प्रणीतो यथा (१८अ० १७क०) प्रणीतोऽग्निरग्निना । तेभ्यो नमोऽस्तु यथा (१५अ० १५क०) तेभ्यो नमोस्तु ते नोऽवन्तु । तेभ्यो नमो इति किम् । (१६अ० ८क०) नमोस्तु नीलग्रीवाय । दूरे यथा (१७अ० ८३क०) दूरेऽमित्वञ्च गुणः । नो यथा (१७अ० ८४क०) सम्मितासो नोऽअद्य । यन्ने यथा (१७अ० ८४क०) यन्नेऽअस्मिन् । सधस्थे यथा (११अ० ६१क०) पृथिव्याः सधस्थेऽअङ्गिरस्वत् । सो यथा (३३अ० ७५क०) सोऽअध्वराय परिणीयते । इन्द्रे यथा (२१अ० ४८क०) सुदेवमिन्द्रेऽअस्मिना । हिरण्यपर्णो यथा (२१अ० ५६क०) हिरण्यपर्णोऽअस्मिभ्याम् । द्वारो यथा (२१अ० ४८क०) देवीर्द्वारोऽअस्मिना । देवो यथा (२१अ० ५८क०) देवोऽअग्निः स्विष्टकृत् । अब्दो यथा (१२अ० ७४क०) सजूरब्दोऽअयवोभिः । रथिभ्यो यथा (१६अ० २६क०) नमो रथिभ्योऽअरथेभ्यः । महद्भ्यो यथा (१६अ० २६क०) महद्भ्योऽअभ्रकेभ्यः । सठंसदो यथा (२६अ० १क०) सठंसदोऽअष्टमी ॥

छन्दोऽअङ्कुपमङ्काङ्कमस्रीवयः ॥ ८५ ॥

छन्द इत्ययमोकारः अङ्कुपं अङ्काङ्कं अस्रीवय इत्येतेषु प्रकृत्या भवति । अङ्कुपं यथा (१५अ० ४क०) काव्यं छन्दोऽअङ्कुपम् । अङ्काङ्कं यथा (१५अ० ५क०) तन्द्रं छन्दोऽअङ्काङ्कम् । अस्रीवयो यथा (१४अ० १८क०) प्रतिमाच्छन्दोऽस्रीवयश्छन्दः । एतस्मिति किम् (१५अ० ५क०) सप्तस्तुप्छन्दोऽनुष्टुप्छन्दः ॥

का ध्रुवोती सदना होतारा ज्या स्वधा पृथिवी प्रतिमेमसदन्नश्यामाकर्मोर्ङ्मियमवस्ता-दुतास्तिषु ॥ ८६ ॥

का ध्रुवा ऊती सदना होतारा ज्या स्वधा पृथिवी प्रतिमा एतानि पदानि प्रकृत्या भवन्ति। ईम् असदन् अश्याम अकर्म ऊर्ङ्मम् इयम् अवस्तात् उत अस्ति इत्येतेषु प्रत्ययेषु यथासङ्ख्यम्। का यथा (२३अ० ५५क०) काऽईमरे। ध्रुवा यथा (२अ० ६क०) ध्रुवाऽअसदन्। ऊती यथा (१८अ० ७४क०) ऊतीऽअश्याम रयिम्। सदना यथा (८अ० १८क०) सुगावो देवाः सदनाऽअकर्म। होतारा यथा (२७अ० १८क०) दैव्या होताराऽऊर्ङ्मम्। ज्या यथा (२९अ० ४०क०) ज्याऽइयम्। स्वधा यथा (३३अ० ७४क०) स्वधाऽअवस्तात्। पृथिवी यथा (३३अ० ४२क०) पृथिवीऽउत द्यौः। प्रतिमा यथा (३२अ० २क०) न तस्य प्रतिमाऽअस्ति।

प्रगृह्यठ० स्वरे ॥ ८७ ॥

प्रगृह्यं पदं स्वरे प्रत्यये प्रकृत्या भवति। यथा (७अ० ३१क०) इन्द्राग्नीऽआगतम्। (३३अ० ५क०) स्वर्थेऽअन्यान्या। स्वरसन्धेरपवादः॥

न रोदसीमे ॥ ८८ ॥

रोदसी इत्येतत्पदं प्रगृह्यं इमे इत्येतस्मिन् पदे न प्रकृत्या भवति। यथा (२७अ० २४क०) राये नु यज्ञ शतरोदसीमे। इमे इति किम्। (१७अ० ५९क०) आ पप्रिवान्रोदसीऽअन्तरिक्षम्॥

विश्पतीवोपस्थिते ॥ ८९ ॥

विश्पती इत्येतत् पदं इवे परभूते उपस्थिते इतिकरणे प्रकृत्या भवति। यथा (३३अ० ४०क०) विश्पतीऽइवेति विश्पतीऽइव। उपस्थित इति किम्। (३३अ० ४४क०) आ विश्पतीव बीरिटे ॥

उकारोऽपृक्तोऽस्पर्शात् ॥ ९० ॥

उकारोऽपृक्त एकवर्णः अस्पर्शात् परः प्रकृत्या भवति स्वरे प्रत्यये। यथा (२३अ० १६क०) न वाऽउऽएतत्। (१७अ० ९७क०) एतवाऽउऽअ ह्वो। अपृक्त इति किम्। (३अ० ५१क०) योजान्विन्द्र। अस्पर्शादिति किम्। (२३अ० ९क०) किम्वा वर्पनं महत् ॥

प्लुतमितौ ॥ ९१ ॥

प्लुतान्तं पदं प्रकृत्या भवति इतौ प्रत्यये। यथा (२३अ० ४९क०) विवेशा ३ इति। तेषु विष्वभुवनमाविवेशा ३ ॥

ओकारश्च ॥ ९२ ॥

ओकारः पदान्तीयः प्रकृत्या भवति इतौ प्रत्यये। यथा (२०अ० ७८क०) चित्रभानो इति। (४अ० २७क०) कृशानो इति। इतावित्यनुवृत्तिः कस्मात् स्वरमात्रे मा भूत् इतावित्येव (४अ० २७क०) कृशानवेते वः ॥

उकारोऽपृक्तो दीर्घमनुनासिकम् ॥ ९३ ॥

उकारोऽपृक्त एकवर्णो दीर्घमनुनासिकं चापद्यते। यथा (८अ० ४०क०) ऊँ इति। इतावित्येव। यथा (२५अ० ४४क०) न वाऽउ एतत्। नात्र दीर्घमनुनासिकं च। इतावविद्यमानत्वात् ॥

एतेश्च परं पदं चर्चायाम् ॥ ९४ ॥

इतिकरणाच्च परं उ इत्येतत् पदमपृक्तं दीर्घमनुनासिकमापद्यते पदचर्चायाम्। चर्चापदस्वरूपमुक्तम् एतदुक्तं भवति वेष्टने यदितिकरणात् परं पदं चर्चा तदेवमुच्यते। तत्पदस्वरूपज्ञापनार्थम्। यत्र तु तथाभूतं पदस्वरूपं न भवति तत्र उ इत्येतत्स्वरूपं हि तत् पदं भवति। अयं चार्थोऽनेन सूत्रावयवेन ज्ञाप्यते। इतिकरणात् परतो यत्पदवचनं तत्स्वरूपज्ञापनार्थमिति। (८अ० ४०क०) उत्। ऊँ इत्यूम्। त्यम् जातवेदसमिति जात। वेदसम्। पदचर्चायामिति किम्। उद्यति॥

तकारवर्गश्चकारवर्गे चकारवर्गम्॥ ९५॥

तकारवर्गः पदान्तीयः चकारवर्गे प्रत्यये परे चकारवर्गमापद्यते। यथा (३६अ० २४क०) तत् चक्षुः। तच्चक्षुः÷। (२०अ० ५२क०) आरात् चित्। आराच्चिद्वेषः÷। (१५अ० ५क०) आच्छत् छन्दः। आच्छच्छन्दः÷। (१५अ० २४क०) उत् जिहानाः। प्रवर्यामुज्जिहानाः। झकारादि जकारादि च पदानामुदाहरणं संहितायां न विद्यते। नकारस्य चकारछकारप्रत्ययोः सन्धिरुक्तः। "नुः"। "चक्षुषोः शम्"। जकारे उदाहरणम्। यथा (५अ० ३६क०) वाजान् जयतु। वाजाञ्जयतु॥

शकारे च॥ ९६॥

शकारे च प्रत्यये परे तकारवर्गश्चकारवर्गमापद्यते। यथा (१अ० ५क०) तत् शकेयम्। तच्छकेयं तन्मे। (१७अ० ४५क०) उत् शिषः। माऽमीषां कश्चनोच्छिषः। (३३अ० ५क०) स्वधावान् शुक्रः। स्वधावाञ्छुक्रः)। (२४अ० ११क०) पिशङ्गान्

शिशिराय। पिशङ्गाञ्छिशिराय। (२५अ० १क०) आदित्यान् श्मश्रुभिः। आदित्याञ्श्मश्रुभिः॥

परश्चास्पर्शपरस्कृम् ॥ ९७ ॥

परश्च शकारः अस्पर्शपरस्कृकारमापद्यते। यथा तच्छ्केयम्। माऽमीषां कश्चनोच्छिषः। स्वधावाञ्छुक्रः। पिशङ्गाञ्छिशिराय। अस्पर्शपर इति किम्। आदित्याञ्श्मश्रुभिः॥

उदस्तभाने लोपम् ॥ ९८ ॥

उत् उपसर्गात्परस्तभाने प्रत्यये सकारो लोपमापद्यते। यथा (१७अ० ७२क०) उत् स्तभान। ज्योतिषा दिवमुत्तभान। (४अ० ३६क०) उत् स्तभ्नम्। उत्तभ्नम्॥

अश्वात् स्थे तकारठं० संज्ञायाम् ॥ ९९ ॥

अश्वशब्दादुत्तरः सकारः तकारमापद्यते संज्ञायां स्थे प्रत्यये। अश्वः अशनव्यापारोऽग्निरस्मिँस्तिष्ठतीत्यश्वत्थो वृक्षः। यथा (१२अ० ८९क०) अश्वत्थे वो निषदनम्। संज्ञायां किम्। अश्वस्थः पुरुषः॥

स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र ॥१००॥

इत उत्तरं द्विर्भावप्रकरणं वर्त्तिष्यते। स्वरात्परः संयोगादिभूतो वर्णो द्विरुच्यते सर्वत्र। अधस्तनविधानं पदान्तपदाद्योः। इदं तु सर्वत्र पदान्तपदाद्योर्मध्ये च पदान्तपदाद्योर्भवति। यथा (१३अ० ३८क०) सम्यक् स्रवन्ति। सम्यक्स्रवन्ति। द्वौ ककारौ सकारो रेफश्च संयोगः। तत्र पूर्वककारो द्विरुक्तिजः। (१३अ० ५७क०) अनुष्टुप्प्रारदौ। द्वौ पकारौ शकारश्च संयोगः। तत्र प्रथमः पकारो द्विरुक्तिजः। पदमध्ये भवति यथा (२४अ० १क०) अश्व+। द्वौ शकारौ वकारश्च

संयोगः। तत्र प्रथमः शकारो द्विरुक्तिजः। स्वरादिति किम्। (३३अ० १५क०) शुधिश्शुल्कर्ण। अत्र शकाररेफौ संयोगः॥

परं तु रेफहकाराभ्याम्॥ १०१॥

रेफहकाराभ्यां परं व्यञ्जनं द्विरुच्यते न तु रेफहकारौ। यथा (१अ० १क०) ऊर्ज्जे। रेफो द्वौ जकारौ संयोगः। तत्र प्रथमो जकारः क्रमजः। (३१अ० १२क०) सूर्य्यः। रेफो द्वौ यकारौ संयोगः। तत्र पूर्वो यकारः क्रमजः। (१४अ० १क०) बाह्व्योः। हकारो द्वौ वकारौ संयोगः। तत्र प्रथमो वकारः क्रमजः॥

ऊष्मान्तस्थाभ्यश्च स्पर्शः॥ १०२॥

ऊष्माणः शषसहाः। अन्तस्था यरलवाः। एतेभ्यः परः स्पर्शो द्विरुच्यते। यथा (२४अ० ४क०) पृश्न्निः। एकः शकारो द्वौ नकारौ संयोगः। तत्र प्रथमो नकारः क्रमजः। (१८अ० १३क०) अश्म्मा। शकारो द्वौ मकारौ संयोगः। तत्र प्रथमो मकारः क्रमजः। (२५अ० ४०क०) पार्ष्ण्या। रेफः षकारो द्वौ णकारौ यकारश्च संयोगः। तत्र प्रथमो णकारः क्रमजः। (१अ० ८क०) सस्न्नितमम्। सकारो द्वौ नकारौ संयोगः। तत्र प्रथमो नकारः क्रमजः। (१०अ० २क०) राष्ट्रदा राष्ट्रम्। षकारो द्वौ टकारौ रेफश्च संयोगः। तत्र प्रथमष्टकारः क्रमजः। (११अ० ११क०) हस्त्ते। सकारो द्वौ तकारौ संयोगः। तत्र प्रथमस्तकारः क्रमजः। हकारस्य द्विर्भावो निषिद्धः। यकारस्य परभूतैः स्पर्शैः संयोगो न विद्यते। रेफस्य द्विर्भावो निषिद्धः। (२३अ० १३क०) शुल्म्मलिः। लकारो द्वौ मकारौ संयोगः। तत्र प्रथमो मकारः क्रमजः। (१०अ० ८क०) उल्ब्बम्। लकारो द्वौ बकारौ संयोगः। तत्र प्रथमो बकारः

क्रमजः। (२३म० ३२क०) दृध्रि काष्ण्ण + । वकारो द्वौ णकारौ संयोगः। तत्र प्रथमो णकारः क्रमजः ॥

जिह्वामूलीयोपध्मानीयाभ्यां च ॥ १०३ ॥

जिह्वामूलीयादुपध्मानीयाच्च परः स्पर्शो द्विर्भवति। जिह्वामूलीयाङ्गवति यथा (३अ० २७क०) मर्यं व(+ क्राम्धरणम्। जिह्वामूलीयो द्वौ ककारौ संयोगः। तत्र प्रथमः ककारः क्रमजः। (११अ० २२क०) तत् + क्खनेम। जिह्वामूलीयः ककारखकारौ संयोगः। तत्र प्रथमः ककारः क्रमजः। उपध्मानीयाङ्गवति यथा (१२म० ७५क०) याऽओषधी(+ प्पूर्वा जाताः)। उपध्मानीयो द्वौ पकारौ संयोगः। तत्र प्रथमः पकारः क्रमजः। (१२अ० ८६क०) याऽ) प्फलिनी(:। उपध्मानीयः पकारफकारौ संयोगः। तत्र प्रथमः पकारः क्रमजः। एतौ च जिह्वामूलीयोपध्मानीयौ काण्वादिविषयौ तथाहि वक्ष्यति "तस्मिँल्लल्हजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम्"। इति ॥

यैस्तु परं तैर्न पूर्वम् ॥ १०४ ॥

यैस्तु संयुक्तं परं व्यञ्जनं द्विरुच्यते यैः संयोगे सति परस्य द्विर्भाव उक्तः तैः संयुक्तं न पूर्वव्यञ्जनं द्विर्भवति। ऊष्मणामन्तस्थानां च परस्य स्पर्शस्य द्विर्भाव उक्तः। तत्र यदुभयतः संयुक्ता ऊष्माणोऽन्तस्था वा स्पर्शैर्भवन्ति। तत्र प्रथमस्य स्पर्शस्य द्विर्भावः प्राप्नोति स्वराव्यवधानात्स निषिध्यत इति सूत्रार्थः। (१८म० ८६क०) पक्ष्माणि। (१म० २७क०) सुष्मा। (४म० १२क०) अयष्मा:)। तत्र ककारषकारमकाराः संयोगः। तत्र ककारस्य द्विर्भावः प्राप्नोति स निषिध्यते। उक्तं च। यत्र चोभयतः स्पर्शैः संयुक्ताः ष्मषसाः सह। न तत्राद्यः क्रमो ज्ञेयो न परो बोधितो बुधैः ॥

नास्वरपूर्वा ऊष्मान्तस्थाः ॥ १०५ ॥

ऊष्मणामन्तस्थानां च परस्य स्पर्शस्य द्विर्भाव उक्तः। तदपवादोऽयं योगः। अस्वरपूर्वा ऊष्माणोऽन्तस्थाश्च परान् स्पर्शान्न द्विर्भावयन्ति। (१८अ० २७क०) स्थालीभि÷ स्थालीः)। अत्र सकारथकारौ संयोगः। (१अ० १८क०) द्विवः) स्कम्भनीः)। अत्र सकारककारौ संयोगः। अस्वरपूर्वा इति किम्। (२अ० ८क०) विष्खोः स्थानम्। (५अ० २१क०) विष्खोः। (१अ० १२क०) प्रवित्रे स्थः। (१०अ० २क०) राष्ट्रम्। अत्र द्विर्भावो भवति॥ विसर्जनीयात्परः स्पर्शो व्यञ्जनपरः सन् द्विरुच्यते। यथा (१२अ० ५क०) विष्णोः) क्रमः÷। (२४अ० ३०क०) नीलङ्गोः क्रिमिः÷। विसर्जनीयो द्वौ ककारौ रेफश्च संयोगः। यथा (८अ० १क०) देवः सवितुः प्रसुव। (११अ० १क०) युञ्जानः) प्रथमम्। विसर्जनीयो द्वौ पकारौ रेफश्च संयोगः। व्यञ्जनपर इति किम्। (२४अ० ३२क०) न्यङ्कुः÷ कक्कटः)। गौर मृगः) पिङ्गः)। (१अ० २क०) वसोः पवित्रम्। (१२अ० ८८क०) याः) फलिनीः)। अत्र द्विर्भावो न भवति॥

ङ्नौ चेद्ध्रस्वपूर्वौ स्वरे पदान्तौ ॥ १०६ ॥

ङकारनकारौ पदान्तौयौ द्विर्भवतो ह्रस्वस्वरपूर्वौ स्वरे प्रत्यये। यथा (१०अ० २४क०) युङ्ङसि। (११अ० ३२क०) तमुत्त्वाद्दधङ्ङृषिः÷। द्वौ ङकारौ। (१७अ० १क०) अश्मन्नूर्जम्। (३अ० ५१क०) अत्तन्नमीमदन्त। द्वौ नकारौ। ह्रस्वपूर्वाविति किम् (२५अ० २३क०) सुप्राङ्जो मेम्यत्। (८अ० ३१क०) तानुज्जेषम्॥

संयोगपूर्वव्यञ्जनान्ताऽवसानगताः स्वरा द्विमात्राः ॥ १०७ ॥

संयोगात्पूर्वः संयोगपूर्वः । यथा (२३अ० १६क०) अग्ग्निः । (१०अ० ३०क०) विष्णुना । व्यञ्जनमन्ते यस्य स व्यञ्जनान्तः । यथा (११अ० ३०क०) दृद्धाङ् । अवसानं प्राप्तोऽवसानगतः । यथा (१अ० १क०) प्राहि । (१अ० ४क०) रक्ष । एते स्वरा द्विमात्रा काला भवन्ति न तु दीर्घा गुरव एते भवन्ति । अत्रोच्यते । गुरवो द्विगुणकालाः । व्यञ्जनद्विरुक्तिप्रसङ्गेन स्वराणामपि गौरवमुक्तं तत्र हि द्विगुणः कालो भवति ॥

प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः ॥ १०८ ॥

संयोगस्यादिभूतस्य वर्णस्य द्विर्भावो ह्युक्तः सोऽन्यथाऽपि क्वचिद्भवतीत्याह । प्रथमैः स्ववर्गीयैः सह द्वितीया द्विरुच्यन्ते । तृतीयैश्च स्ववर्गीयैः सह चतुर्था द्विरुच्यन्ते । यथा (११अ० २०क०) विख्याय । विक्ख्यायं । ककारखकारौ यकारश्च संयोगः । (२३अ० ३९क०) आच्छ्यति । चकारछकारौ यकारश्च संयोगः । (२९अ० ४१क०) विष्प्फुरन्ति । षकारः पकारफकारौ संयोगः । यथा (१अ० २५क०) गोष्ठानम् । (२अ० १क०) आखरेष्टुः । षकारटकारठकाराः संयोगः । (११अ० ३४क०) प्रात्यः । (२३अ० १३क०) रात्यः । तकारथकारौ यकारश्च संयोगः । चतुर्था यथा (८अ० ४२क०) आजिग्घ्र । गकारघकारौ रेफश्च संयोगः । डकारस्यापि सम्भवः । (१६अ० ५०क०) मोड्ढ्वं ÷ । डकारढकारौ वकारश्च संयोगः । (४अ० १९क०) अड्ढ्नस्यातु । दकारधकारौ वकारश्च संयोगः । (३३अ० ३०क०) विब्भ्राट् । बकारभकारौ रेफश्च संयोगः ॥

नानुस्वारः ॥ १०९ ॥

संयोगपूर्व इत्यनुवर्त्तते । संयोगपूर्वोऽनुस्वारो न द्विरु-

स्यते। यथा (१७अ० ८७क०) द्रुमण्स्तनम्। (३अ० २८क०) सोमान्ण्स्वरणम्। असंयोगपूर्वस्य अनुस्वारस्योपरिष्टाद्-वक्ष्यति। "अनुस्वारो ऽस्वपूर्वोऽर्धमात्रा पूर्वा चार्धमात्रा" इति। यथा (१०अ० २४क०) हुठँंसः॥

सवर्णे ॥ ११० ॥

सवर्णे प्रत्यये न द्विरुक्तिर्भवति। अन्तस्थासंयोगोऽत्रोदाहरणम्। "स्ववर्गीये चानुत्तमः" इति स्पर्शानां वक्ष्यति। यथा (१अ० २२क०) सम् यौमि। सँय्यौमि। द्वौ यकारौ संयोगः। (१अ० २१क०) सम् वपामि। सँव्वपामि। द्वौ वकारौ संयोगः॥

ऋवर्णे ॥ १११ ॥

ऋवर्णे प्रत्यये न द्विरुक्तिर्भवति। यथा (२७अ० ४क०) अनिष्टृतः। षकारटकारौ संयोगः। "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इति प्राप्तस्य प्रतिषेधः॥

ऌवर्णे ॥ ११२ ॥

ऌवर्णे प्रत्यये न द्विरुक्तिर्भवति। यथा (१८अ० १२क०) ऋद्धिऌप्तम्। (१८अ० ११क०) क्लृप्तम्। "विसर्जनीयाद्यञ्जनपरः" इति प्राप्तिः। ऌकारस्य मध्ये लकारस्यार्धमात्रां पश्यताऽऽचार्येण निषेधः कृतः। वक्ष्यति च "ऋऌवर्णा रेफलकारौ सङ्श्लिष्टावस्तितरावेकवर्णौ"॥

यमे ॥ ११३ ॥

यमे प्रत्यये न द्विरुक्तिर्भवति। यथा (२३अ० २९क०) सक्थ्रा दृदिश्यते नारी। ककारः थकारयमौ नकारश्च संयोगः। तत्र "स्वरात्संयोगादिः" इति द्विरुक्तिः प्राप्ता सा यमे प्रत्यये निषिध्यते। यथा (१९अ० ४६क०) सज्ग्नानमसि।

जकारजकारयमौ जकारस्य संयोगः । अत्रापि "स्वरात्संयोगादिः" इति जकारस्य द्विरुक्तिः प्राप्ता सा यमे प्रत्यये इति नास्ति विरोधः । रुक्मपाप्मप्रभृतीन्युदाहरणानि ददन्ति तेषां "संयोगादिः पूर्वस्य" "यमश्च" इत्यनेन सह विरोधः प्राप्नोति ॥

विसर्जनीयः ॥ ११४ ॥

विसर्जनीयो न द्विरुच्यते । व्यञ्जनत्वाद्विसर्जनीयस्य द्विरुक्तौ प्राप्तायां प्रतिषेधोऽयम् । यथा (३अ० १२क०) द्यौः॑ कुत्पर्ति॑ ÷ पृथिव्याः॑ । (१२अ० ७८क०) याः॑ फलिनी॑ः ॥

स्ववर्गीये चानुत्तमे ॥ ११५ ॥

स्ववर्गीये च प्रत्ययेऽनुत्तमं पूर्वो वर्णो न द्विरुच्यते । यथा (३३अ० १७क०) तत् देवानाम् । तद्देवानामवो॑ अद्य । द्वौ टकारौ संयोगो द्विरुक्तेर्निषिद्धत्वात् । (२५अ० ८क०) अन्तरिक्षम्पुरी॑ततो । मकारपकारौ संयोगः । अनुत्तम इति किम् । (३३अ० ४२क०) तन्नो॑ मित्रो॑ वरु॑णः । अत्र द्विरुक्तिर्भवत्येव ॥

अवसितं च ॥ ११६ ॥

निरर्थकं व्यञ्जनमवसानगतमवसितशब्देनोच्यते । अवसितं व्यञ्जनं न द्विरुच्यते । यथा (१८अ० ९क०) ऊर्क् । रेफककारौ संयोगः । अवसितमिति किम् । (१८अ० ९क०) ऊर्क्॑ च मे । "परन्तु रेफहकाराभ्याम्" इति प्राप्तिः । रेफस्यात्र द्विरुक्तिर्न भवति ॥

नान्तःपदे स्वरपञ्चमान्तस्थासु ॥ ११७ ॥

स्वरे प्रत्यये पञ्चमे च परे अन्तस्थासु च प्रत्ययभूतासु यद्भवति तदन्तःपदे न भवति पदान्तीयस्य स विकार इत्यर्थः ।

यथा (१४अ० ४१क०) पूषन्। पकारस्य प्रथमस्य स्वरे तृतीयभाव उक्तः सोऽन्तःपदे न भवति। पञ्चमे यथा (२०अ० ४५क०) मन्थां समञ्जन्। (२९अ० ४१क०) अक्ष्णोऽङ्गमे विष्यन्दन्तोऽभिमातान्। अत्र "पञ्चमे पञ्चमम्" इति पञ्चमभाव उक्तः सोऽन्तःपदे न भवति। अन्तस्थासु यथा (१अ० १क०) इषे त्वा (१२अ० १११क०) आ प्यायस्व। प्रथमस्य तृतीयभाव उक्तः सोऽन्तःपदे न भवति। वक्ष्यमाणप्रकरणस्यास्यापवादभूतोऽयं योगः। अधिकारसूत्रमेतत्॥

स्पर्शोऽपञ्चमः स्वरधौ तृतीयम्॥ ११८॥

अपञ्चमः स्पर्शः स्वरे प्रत्यये धिसंज्ञके च तृतीयमापद्यते। स्वरे परे भवति यथा (१७अ० ४९क०) उत् एनम्। उदेनमुत्तरान्नय। (१७अ० ८९क०) समुद्रात् ऊर्मिः। समुद्रादूर्मिः)। धौ परे यथा (३अ० ४५क०) यत् ग्रामे। यद्ग्रामे। (२९अ० ३८क०) यत् वर्मी। यद्वर्मी॥

जिति प्रथमम्॥ ११९॥

जित्संज्ञके प्रत्यये स्पर्शोऽपञ्चमः प्रथममापद्यते। यथा (८अ० ४७क०) अनुष्टुभेऽभिगरः)। (१८अ० ९क०) ऊर्क् च मे। (३अ० ३५क०) तत्सवितुः)। (१३अ० ५७क०) अनुष्टुप्शारदी॥

असस्थाने मुदि द्वितीयठ० शौनकस्य॥१२०॥

असमानस्थाने मुत्संज्ञके प्रत्यये स्पर्शोऽपञ्चमो द्वितीयमापद्यते शौनकस्याचार्यस्य मतेन। यथा (१३अ० ३८क०) सम्यक् सवन्ति। सम्यक्सवन्ति। (१३अ० ५७क०) अनुष्टुप् शारदी। अनुष्टुफ् शारदी। असस्थान इति किम्। (३अ० ३५क०) तत्सवितुः)। केचिदत्र तृतीयम् "अवसाने च" इत्येतत्सूत्रं पठन्ति

सोऽपपाठः। यतः "प्रथमोत्तमाः पदान्तीयाः" इत्यधस्तादुक्तम्॥

पञ्चमे पञ्चमम्॥ १२१॥

पञ्चमे स्पर्शे प्रत्यये अपञ्चमः स्पर्शः पञ्चममापद्यते। यथा (१३अ० ५८क०) वाक् मात्या। वाङ् मात्या। (३३अ० ३८क०) वट् महान्। वण्महान्। (३३अ० ३८क०) तत् मित्रस्य। तन्मित्रस्य॥

हश्च तस्मात् पूर्वचतुर्थम्॥ १२२॥

हश्च तस्मादपञ्चमात् स्पर्शात्तृतीयभूतादुत्तरः सन्नधस्तनस्य स्पर्शस्य चतुर्थमापद्यते। यथा (१७अ० ४२क०) उत् हर्षय। उद्धर्षय। (१८अ० ६६क०) अवाट् हव्यानि। अवाड्ढव्यानि॥

नकारपरो जातूकर्ण्यस्य॥ १२३॥

ऋकारपरो हकारः अपञ्चमस्पर्शादुत्तरो न चतुर्थमापद्यते। न च पूर्वस्तृतीयं जातूकर्ण्यस्याचार्यस्य मतेन। यथा। (१८अ० ५८क०) सममुस्रोत् ह्रदः। सममुस्रोड्ढ्रदः। जातूकर्ण्यस्येति किम् (१८अ० ५८क०) सममुस्रोड्ढ्रदो वा॥

हि॥ १२४॥

"ह्यन्तराः कालाः" इत्यधस्तादुक्तं कालशब्दश्चेहाऽवधिवचनः। अतोऽवधिपरिज्ञापनार्थमिदं सूत्रम्। अवधेः प्रयोजनं "न परकालः पूर्वकाले पुनः" इत्यधस्तादेवोक्तम्॥

यवयोः पदान्तयोः स्वरमध्ये लोपः॥ १२५॥

यकारवकारयोः पदान्तभूतयोः स्वरमध्ये वर्त्तमानयोर्लोपो भवति। अश्रवणमनुच्चारणं भवतीत्यर्थः। अधस्तात् सूत्रकारेण यौ यकारवकारौ विहितौ तयोरनेन लोपः क्रियते। पदान्तौ·

ययोर्यकारवकारयोरसम्भवात्। यथा (३अ० १३३क०) "आकारोपधो यकारम्"। यथा। (७अ० ३९क०) महाँयिन्द्रः। महाँ२॥ऽइन्द्र÷। (११अ० ८२क०) खाँय् अहम्। खाँ२॥ऽअहम्। तथा "कण्ठ्यपूर्वो यकारमरिफितः"। (२४अ० ३९क०) ख्वित्वय् आदित्यानाम्। ख्वित्वऽआदित्यानाम्। (१२अ० ५५क०) ता य् अस्य। ताऽअस्य स्तूदंदोहसः। "सन्ध्यक्षरमयवायावम्"। (३अ० २७क०) इड य् एहि। इडऽएहि। (३अ० २७क०) अदित य् एहि। अदितऽएहि। (२४अ० २६क०) भूम्या य् आखून्। भूम्याऽआखून् (८अ० १क०) विष्ण व् उरुगाय। विष्णोऽउरुगाय। (२३अ० २०क०) ता व् उभौ। ताऽउभौ चतुर÷। लुप्तयोश्च यकारवकारयोर्यः स्वरसन्धिः प्राप्नोति सः "न परकालः" इत्यादिना निषिध्यते॥

न वकारस्यासस्थान एकेषाम्॥ १२६॥

वकारस्य पदान्तस्य असस्थाने स्वरे प्रत्यये लोपो न भवत्येकेषामाचार्याणां मतेन। यथा (५अ० १६क०) ष्विष्णवेत्ते ट्टाधर्त्या। (४अ० २७क०) कुशानवेते वे÷। असस्थान इति किम्। (८अ० १क०) विष्णोऽउरुगाय। (१०अ० १६क०) हिरण्यरूपाऽउषसः÷॥

असौ च शाकटायनः॥ १२७॥

असावित्येतस्य पदस्य असस्थाने प्रत्यये वकारो न लुप्यते। शाकटायनस्य मतेन। (३८अ० २क०) असौ एहि। असावेहि। एके एतत्सूत्रं पठन्ति सोऽपपाठः पूर्वेणैव सिद्धत्वात्॥

प्रऽउगमिति यकारलोपः॥ १२८॥

प्रयुगमित्येतस्मिन् पदे यकारलोपः प्रत्येतव्यः कर्त्तव्यो

वा । प्रयुज्यत इति प्रयुगम् । तत्र युजेर्यकारो लुप्यते । यथा (१५अ० ९क०) प्रऽउ॑गमुक्रामव्यथायै । "न परकालः" इत्यनेन स्वरसन्धिर्न भवति ॥

अनादेशेऽविकारः ॥ १२९ ॥

इत उत्तरं स्वराणामुदात्तानुदात्तस्वरितप्रचितानामेकीभावगतं विकारं विवक्षुः परिभाषां चकाराऽऽचार्योऽनादेशेऽविकार इति । यत्रोदात्तादीनां स्वराणां सम्भवादेशो न क्रियते तत्राविकारः प्रत्येतव्यः । यथा (३अ० १२क०) अग्निर्मूर्द्धा दिवः॑ ककुत् । तथा (१३अ० ५८क०) इयमुपरि॑ ॥

प्रागुवर्णादुत्तराणामेकीभावः ॥ १३० ॥

उवर्णोपलक्षितात् सूत्रात् "उदात्ताश्चानुदात्तश्च स्वरितम्" इत्येतस्मात्प्राग्यदित ऊर्ध्वमनुक्रमिष्यामस्तत्राच्चराणामेकीभावोऽधिक्रतो वेदितव्यः । "स्वरोऽचरम्" इत्यधस्तादुक्तमित्यतः स्वराणामेकीभावोऽधिक्रतो वेदितव्यः । अधिकारसूत्रमेतत् ॥

स्वरितवान् स्वरितः ॥ १३१ ॥

स्वरितवानेकीभावः स्वरितो भवति । यथा (११अ० ४क०) पथ्या इव । प्र॒थ्ये॑व म्रे॒ः । (२०अ० ७०क०) चम्वी इव । च॒म्वी॑व सोम॑ । जात्योदाहरणे यथा (१४अ० २२क०) ब्रह्म असृज्यत ब्रह्मा॑ऽसृज्यत । (२४अ० ३७क०) मृत्यवे असितः । मृत्यवे॑ऽसि॒तः । तैरोव्यञ्जनोदाहरणे ॥

उदात्तवानुदात्तः ॥ १३२ ॥

उदात्तोऽस्मिन्नस्तीति उदात्तवान् । उदात्तवानेकीभाव उदात्तो भवति । स चोदात्तः पुरस्तात्पश्चाद्वा भवति । इत-

रत्रोदात्तानुदात्तस्वरितप्रचिताः। यथा (१६अ० ६१क०) उभयत्रोदात्तो भवति। ये अग्नेषु। येऽग्नेषु। (१३अ० ८क०) दूणानः अस्ता। दूणानोऽस्ताऽसि। उदात्तपूर्वोऽनुदात्तपरो भवति यथा (१अ० १क०) प्र अर्पयतु। प्रार्पयतु। (४अ० १क०) आ इदम्। एदम्। उदात्तपरोऽनुदात्तपूर्वो यथा (१अ० १८क०) त्वा आशाभ्यः। त्वाशाभ्यः। (२०अ० ७क०) मे अङ्गानि। मेऽङ्गानि मर्वत÷। उदात्तपूर्वः स्वरितपरो यथा (१६अ० ४५क०) सु ऊर्व्याय। नमऽऊर्व्याय च सूर्व्याय च। अवग्रह एतदुदाहरणम्। स्वरितपूर्व उदात्तपरो यथा (३४अ० २८क०) अद्यूत्ये अवसे। अद्यूत्येऽवसे। (१अ० ३क०) सुप्वा इति। सुप्वेति पदसंहितायामुदाहरणम्। अत्रोदात्तस्वरितसन्धौ "विप्रतिषेधेऽउत्तरं बलवदलोपः" इति परिभाषासूत्रेणोदात्त एव भवति। उदात्तग्राह्यस्य परत्वात्। न तु स्वरितः। स्वरितग्राह्यस्य पूर्वत्वात्। उदात्तपरः प्रचितपूर्वो यथा (८अ० ३८क०) ओजिष्ठ ओजिष्ठः। इन्द्रौजिष्ठौजः। (८अ० १३क०) वाजजितः अध्वनः। वार्जिनो वाजजितोऽध्वनः। अधस्तनयोगापवादः॥

इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तपरꣳ स्वरितम् ॥ १३३ ॥

इकारो वर्णो यस्याक्षरस्येति इवर्णमक्षरम्। बहुव्रीहिरयमक्षरप्रधानः। इवर्णमक्षरं स्वरितं भवति। कथंभूत उभयतो ह्रस्वम्। उभयत इवर्णो ह्रस्वस्याक्षरस्येत्युभयतो ह्रस्वस्तम्। उदात्तपूर्वो यस्याक्षरस्येत्युदात्तपूर्वमक्षरम्। अनुदात्तपरो यस्येत्यनुदात्तपरमक्षरम्। यथा (२०अ० ७०क०) स्रुचि इव। स्रुचीव घृतम। (११अ० ६१क०) अभि इन्वताम। अभी-

न्वताम्र,खे। उभयतो ह्रस्वमिति किम्। (१२अ० ६क०) हि ईम्। विहीमिद्रः)। उदात्तवमिति किम्। (२८अ० ३४क०) इमेऽइतीमे। (१६अ० ३८क०) वीध्रायेति वि। ईध्राय अधस्तनयोगापवादः ॥

वीच्चितायेति च ॥ १३४ ॥

वीच्चितायेत्ययं च एकीभावः स्वरितो भवति। यथा (२२अ० ८क०) वी॑च्चि॒ता॒येति॒ वि। ईच्चिताय। उदात्तपूर्वोऽनुदात्तपर एकीभावो भवति। उभयतो ह्रस्वस्तु न भवति। अतो निपात्यते ॥

उदात्ताच्चानुदात्तꣳ स्वरितम् ॥ १३५ ॥

अच्चराणामेकीभावस्य पूर्वो विधिः। इदानीमच्चराणां व्यञ्जनव्यवहितानां यः स्वरसंहितायां भवति स उच्यते उदात्ताच्चाच्चरात्परं व्यञ्जनव्यवहितमनुदात्तमच्चरं स्वरित भवति। यथा (४अ० ५क०) स्वाहा। (१८अ० १क०) वाज॑÷। (१८अ० ३५क०) पय॑÷। (१६अ० १क०) नम॑÷। (३अ० ४५क०) मो सु नः। मो षू॑ण॑÷। (३अ० ४५क०) हि ष्म। हि ष्मा॑ते ॥

निहितमुदात्तस्वरितपरम् ॥ १३६ ॥

निहन्यते स्वरितमुदात्तपरं स्वरितपरं च। (१०अ० ५क०) स्वाहा॑ सोमा॑य। (१६अ० १७क०) नम÷ हिरण्यबाहवे। नमो॑ हिरण्यबाहवे। (२अ० २७क०) अ॒स्थू॑रि॒ णौ॑ गार्ह॑प॒त्यानि सन्तु। (१३अ० ३८क०) भासे त्वा॑ ज्योति॑षे त्वा। (१८अ० ५०क०) स्व॑र्ण॑ घ॒र्मः)। (११अ० २क०) स्व॑र्ग्यायेति॑ स्व॑ः। ग्याय। (१अ० १०क०) प्र॒स॒वे॑ऽश्विनो॑ः। (१७अ० ३८क०)

अगुद्गोऽस्माकम्। (८अ० ५४क०) परमेष्ठ्यभिधीतः। (२०अ० ७०क०) सुचीवेति सुचि। इव घृतम्। (६अ० ४क०) द्विवीवेति द्विवि इव चक्षुः। एवमेतत्त्रैरोव्यञ्जनजात्याभिनिहितत्रैप्रश्लिष्टाः स्वरिता उदात्तेऽनुदात्तीभूताः प्रदर्शिताः। अथेदानीं स्वरिते यथासम्भवं प्रदर्श्यन्ते। (३अ० ५क०) भूर्भुवः स्वः द्यौरिव। (१८अ० ५०) स्वर्ण घर्मः स्वाहा स्वर्षाकः॥

अनवग्रहे ॥ १३७ ॥

यदेतत् "निहितमुदात्तस्वरितपरम्" इत्यधस्तादुक्तम्। एतदेके आचार्या अनवग्रहे मन्यन्ते। अवग्रहे तु स्वरित एव भवति। यथा (२१अ० १०क०) तनूनपादिति तनूः। नपात्। (५अ० ५क०) तननप्त्रऽ इति तनूः। नप्त्रे। एतच्च परमतम्। यत औज्जिहायनकैरिदमुक्तम्। अवग्रहो यदा नीचउच्चयोर्मध्यतः क्वचित्। तथाभाव्यो भवेत् कम्पस्तनूनप्त्रे निदर्शनमिति॥

स्वरितस्य चोत्तरो देशः प्रणिहन्यते ॥१३८॥

स्वरितस्य य उत्तरो भागः स निहन्यते। उदात्ते स्वरिते वा परभूते एकेषामाचार्याणां मतेन। अत्र च जात्याभिनिहितत्रैप्रश्लिष्टा एवोदाहरणम्। तथाभूतं तेषां शाखिनां हि स्मरणम्। यथा (१८अ० ४६क०) स्वर्णघर्मः। (१अ० ११क०) प्रसवेऽश्विनोः। (८अ० ५४क०) परमेष्ठ्यभिधीतः। (२०अ० ७०क०) सुचीवेति सुचि। इव। वाजसनेयिनान्तु अनुदात्त एव भवति। "निहितमुदात्तस्वरितपरम्" इत्यनेन सूत्रेणानुदात्त एवेति ज्ञेयम्॥

स्वरितात्परमनुदात्तमुदात्तमयम् ॥ १३९ ॥

स्वरितादक्षरात्परं व्यवहितं यदनुदात्तमक्षरं तदुदात्तमयं

भवति । उदात्तमयं प्रचितमेकश्रुतीति पर्य्यायाः (१अ० १क०) वायव॑स्थ । व्यञ्जनव्यवहितं प्रायो निदर्शनं दृश्यते । यथा १२अ० ८क०) अग्न॑ अङ्गिरः ॥

अनेकमपि ॥ १४० ॥

स्वरितादक्षरात्परं व्यञ्जनव्यवहितं यदनुदात्तमक्षरमेकमनेकं वा तत्सर्वमनुदात्तमयं भवति । प्रचितं भवतीत्यर्थः । यथा (९अ० १८क०) वाजे॑ वाजे॑ऽवत वाजिनः । (२१अ० ६१क०) त्वाम॒द्याऽऋ॑षऽआर्षेयऽऋषीणाम् ॥

नोदात्तस्वरितोदयम् ॥ १४१ ॥

स्वरितादक्षरात्परस्यानुदात्तस्योदात्तमयत्वं विधायाधुना तदपवदति । उदात्तोदयं स्वरितोदयं च नोदात्तमयं भवति किन्त्वनुदात्तमेव भवति । उदात्तोदयं भवति यथा (३८अ० ५क०) सर॑स्वति॒ तमि॒ह धात॑वेऽकः । (९अ० १८क०) वाजे॑ वाजे॑ऽवत वाजिनो नो॑ धने॑षु । स्वरितपरं यथा (१५अ० १५क०) रथौजा॑श्च सेनानीग्राम॒ण्यौ । (७अ० ३०क०) उप॒या॒मगृ॑हीतोऽसि सह॒स्याय त्वा ॥

द्विवर्णमेकवर्णवद्धारणात् स्वरमध्ये समानपदे ॥ १४२ ॥

"स्वरात्संयोगादिः" इत्यादिना प्रकरणेन यस्य द्विर्भाव उक्तः तस्यैतदुच्यते । वर्णे द्विवर्णसंयोग एकवर्णवत्कर्त्तव्यः । मुखसन्धारणाविशेषात् स्वरयोर्मध्ये वर्त्तमानमेकस्मिन् पदे भवति । एतच्चाभिधानमुच्यते इत उत्तरं द्वयोर्वर्णयोरेकीभावः प्रायशो निरूप्यते । यथा (३१अ० २२क०) व्याक्त॑म् । (१अ० १६क०) कुक्कु॑टः । द्विवर्णस्वरमध्य इति किम् (२अ० ८क०) आज्य॑म् ।

(१८अ० ४२क०) भुञ्ज्युः। अत्र जकारस्य द्विर्भवति न तु स्वरयोर्मध्ये यकारेण व्यवधानात्। समानपदग्रहणेन च संहिता लक्ष्यते। पदविच्छेदे न भवति। यथा (२१अ० १क०) इमम्। मे। इमम्मे वरुण॥

ऐकारौकारौ च॥ १४३॥

ऐकार औकारश्च द्विवर्णौ सन्तौ एकवर्णवदुच्चारणादेकवर्णौ भवतः। एकप्रयत्ननिर्वर्त्यौ भवतः। यथा (१अ० ६क०) कस्मै। (१अ० ६क०) तस्मै। (२०अ० ८क०) आनन्दनन्दौ आण्डौ॥

डढौ लल्हावेकेषाम्॥ १४४॥

डकारढकारौ एकेषामाचार्याणां मतेन यथासंख्यं लकार-ल्हकारावापद्येते। स्वरमध्ये समानपद इत्यनुवर्त्तते। यथा (८अ० ४३क०) इले। (१३अ० २६क०) अर्षाल्हा। स्वरमध्ये समानपद इति किम्। यथा (१६अ० ५०क०) वनस्पते वीड्वङ्गः। मीढ्वस्तोकाय। एतच्च परमतम्। तथाहि वक्ष्यति। तस्मिँल्लल्हजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानामिति॥

द्विसकारठ० शास्स्वरास्स्वेति॥ १४५॥

द्वौ सकारौ अस्मिन् पदद्वय इति द्विसकारं पदद्वयम्। कतमत्तदित्यत आह। शास्स्व। रास्स्व। यथा (२१अ० ६१क०) आ च शास्स्वा च। (४अ० १६क०) रास्स्वेयत्सोम। शासे रासेश्चैकः प्रकृतिसकारः प्रथमः स्वेति प्रत्ययस्य द्वितीयः तृतीयः क्रमजः प्राप्नोति सोऽन्यत्र निषिध्यतेऽनेन सूत्रारम्भ-सामर्थ्येनेति॥

ऋल्वर्णे रेफलकारौ सꣳश्लिष्टावश्रुतिधरावेकवर्णौ ॥ १४६ ॥

ऋकारे ऌकारे च यथासङ्ख्यं रेफलकारौ कण्ठाग्रमात्रयोर्मध्येऽर्द्धमात्रिकौ संश्लिष्टौ एकीभूतौ अविद्यमानपृथक्श्रुतिधरौ एकश्रुतिभूतौ भवतः । तथाहि वैयाकरणाः "उरण्परः" इति रेफमधिकं विदधति । यथा (३अ० १क०) कृत्तिवासाः । (१८अ० ११क०) ऋर्द्धि÷ । (१८अ० ११क०) ऌर्द्धि÷ ॥

माचाग्रमात्रा वर्णापत्तीनाम् ॥ १४७ ॥

"ऋल्वर्णे रेफलकारौ" इत्यनेन सूत्रेण ऋल्वर्णयोरेफलकारौ विद्येते । इत्येतत्प्रतिपादितमिदमिदानीं चिन्त्यते कियती मात्रा कण्ठस्य कियती मात्रा रेफलकारयोस्तत्प्रसङ्गेनान्याऽपि वर्णापत्तिश्चिन्त्यते । वर्णापत्तीनां त्रयः कालाः भवन्ति मात्रार्द्धमात्राग्रमात्रोपलक्षिताः एतच्च "विकारो यथासन्नम्" इत्यनेन व्यवस्थाप्यते ॥

अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्द्धमात्रेति ॥ १४८ ॥

"नानुस्वारः" इत्यनेन सूत्रेण संयोगपरस्यानुस्वारस्यार्द्धमात्राकाल इत्यवधारितत्वादयमसंयोगपरार्थ आरम्भः । अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्राकालो भवति । पूर्वश्च ह्रस्वोऽर्द्धमात्राकालो भवति । यथा (१अ० १क०) माऽघशꣳठ०सोऽदृंध्रुवाः । (२७अ० ४०क०) मठ०हिष्ठाः मत्सदन्धसः ॥

दीर्घादर्द्धमात्रा पूर्वा चाध्यर्द्धा ॥ १४९ ॥

दीर्घात् स्वरात् परोऽनुस्वारोऽर्द्धमात्राकालो भवति । यथा (२०अ० १३क०) माꣳसम् । (३३अ० १३क०) त्वाꣳ हि ॥

द्वियकारम् ॥ १५० ॥

द्वौ यकारौ समाहृतौ द्वियकारम्। इत ऊत्तरं द्वियकारमधिकृतं वेदितव्यम् ॥

आप्याय्यमानो यमो रय्यै धाय्या रूपर्ठ० श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्या सहस्रय्या निचाय्य सान्नाय्य सन्ताय्येति च ॥ १५१ ॥

एते द्वियकाराः संयोगा भवन्ति। क्रमजस्तृतीयः प्राप्नोति न निषिध्यते। यथा (८अ० ५७क०) आप्याय्यमानो यमः। (१४अ० २२क०) रय्यै त्वा पोषाय त्वा। (१८अ० २४क०) जेतिं धाय्या रूपम्। (१८अ० ६४क०) तन्नो गोभिः श्रवायम्। (२०अ० ८१क०) वर्त्तो रुद्रा नृपाय्यम्। (२१अ० ४३क०) पौरुषेय्या गृभः। (१६अ० ४४क०) नमो हृदय्याय च। (१२अ० १०क०) सहस्रय्या निवर्त्तस्व। (११अ० १क०) अग्नेर्ज्योतिर्निचाय्य। सान्नाय्यभाजनावा अमावास्या। (३८अ० क०) मैत्रः शरसि सन्ताय्यमाने ॥

एकः ॥ १५२ ॥

इत ऊत्तरमेकयकाराः संयोगा भवन्तीत्यधिकृतं वेदितव्यम्। अधिकारसूत्रमेतत् ॥

ज्योतिश्चवनः श्येनः श्यामञ् श्यामाकाः श्येतो ज्येष्ठो ज्योग्ज्याच्छ्यति ॥ १५३ ॥

एते संयोगा एकयकारा भवन्ति। अस्वरपूर्वार्थ आरम्भः। स्वरपूर्वास्तु "स्वरपूर्वाश्च यचजाः" इत्यनेनैव सेत्स्यन्ति। कस्वाच्छ्यतीत्येतदधिकमुदाहरणं विहितम्। प्रचुराण्येवोदाहरणानि। (११अ० ३क०) बृहज्योतिः करिष्यतः। (१७अ०

३८क०) दक्षयज्ञनः। पृतनाषाट्। (१८अ० ५१क०) इन्दुर्दक्षः ÷ श्येनऽकृता वा। (१८अ० १३क०) श्यामं च मे लोहितं च मे। (१८अ० १२क०) श्यामाकाश्च मे। श्येतो मलहविः। सारस्वतः। यो ह वै ज्यैष्ठ्यं च श्रैष्ठ्यं च। (३६अ० १८क०) ज्योक्च सूनृतिं जीव्यासम्। (२८अ० ४०क०) ज्याऽइयर्ठ० समने। (२३अ० ३८क०) कस्याऽऽच्छयति। इति विहितान्युदाहरणानि ॥

जुषस्व यविष्ठ्य शोचा यविष्ठेति च ॥१५४॥

एतौ द्वौ यविष्ठ्यशब्दसंयोगावेकयकारौ भवतः। (११अ० ७३क०) तज्जुषस्व यविष्ठ्य। (३अ० ३क०) बृहच्छोचा यविष्ठ्य। एताविति किम्। (१७अ० ७६क०) सम्यूर्या यविष्ठ ॥

श्येति श्यत्वं च ॥ १५५ ॥

श्य इत्ययं पदावयवो श्यत्वं च पदावयवभूतं गृह्यते। एतौ च संयोगावेकयकारौ भवतः। (२३अ० ४७क०) कस्यं। (७अ० २८क०) यस्यं। (३४अ० ५२क०) हिरण्यम्। (४अ० २५क०) श्रोणौ ÷ कविक्रतुम् ॥

स्वरपूर्वास्त्रि शचजाः समानपदे द्विरुक्ताः ॥१५६॥

स्वरपूर्वाः शकारचकारजकारा एकस्मिन् पदे वर्त्तमाना द्विरुक्ताः सन्त एकयकारा भवन्ति। यथा (१८अ० ७४क०) अश्श्याम तज्जामम्। (३६अ० २४क०) पश्श्येम शरदः शतम्। (२२अ० २४क०) प्राचैर्द्विषे। (१८अ० ६२क०) आच्छा जानुं। (१८अ० ४२क०) भुज्ज्युः सुपर्णः। स्वरपूर्वाः समानपद इति किम्। (३६अ० ३४क०) तच्छकुनिः। (११अ० ७३क०) तज्जुषस्व ॥

व्यञ्जनपराश्च न ॥ १५७ ॥

व्यञ्जनपराश्च यचजाः चशब्दाद्व्यञ्जनपूर्वा वा हिरुक्ताः सन्तो यकारा न भवन्ति। (८अ० ४०क०) अद्रिं॑ग्रभस्य क्रतवं॑+। (११अ० ३७क०) प्रशस्त॒ दर्श॒तम्। अर्वीं॑एषि। कूर्चः। (१०अ० २१क०) वज्रि॑:+। वर्जयन्ति ॥

कश्यपस्यानार्षेये जातूकर्ण्यस्य ॥ १५८ ॥

कश्यपशब्दस्यार्षेयवर्जं जातूकर्ण्यस्याचार्यस्य मतेन यकारो न भवति एतदुक्तं भवति कश्यपे वाच्ये हिरुक्तौ सत्यां यकारो न भवति। यथा (२५अ० ३७क०) अ॒पामु॒द्रो मा॒सा॒कु॒श्यप॑+। अनार्षेय इति किम्। (३अ० ६२क०) त्र्या॒यु॒षञ्ज॒म॒दे॒म्नेः॑ क॒श्यप॑स्य। अत्र ऋष्यभिधानं कश्यपशब्दो जमदग्न्यादिभिः सहोच्चारणात्। जातूकर्ण्यस्येति किम्। (२४अ० ३७क०) क॒श्य॒श्यपो॑ रोहित्। "स्वरपूर्वाश्च यचजाः" इत्यस्यापवादः ॥

उच्चैरज्जुमज्जानश्च ॥ १५९ ॥

उच्चैः रज्जुः मज्जानः इत्येतानि पदानि सयकाराणि न भवन्ति। यथा (१६अ० १८क०) उ॒च्चैर्घो॑षाय। वाल्वजीभीरज्जुभिर्युता भवति। रज्जुसन्दानमादाय। (३०अ० ७क०) रज्जुसर्ज्जम्। (१८अ० ८२क०) अ॒स्थि॒ म॒ज्जा॒न॒म्मा॒सैः॑। इदमपि "स्वरपूर्वाश्च यचजाः" इत्यस्यापवादभूतम् ॥

मर्त्तो वुरीत मर्त्तेष्वग्निः परो मर्त्तस्ते मर्त्त इति च ॥ १६० ॥

एते मर्त्तशब्दाः सयकारा न भवन्ति। यथा (४अ० ८क०) मर्त्तो॑ वु॒रीत॒ स॒ख्यम्। (१२अ० २४क०) मर्त्ते॑ष्व॒ग्निर॒मृतो

निधायि। (२१अ० ५क०) परो मर्त्तं + परः) ग्ना। (२८अ० १८क०) यदा ते मर्त्तोऽअनु। एत इति किम्। (४अ० १६क०) देवऽआ मर्त्येषा। (३१अ० १७क०) तन्मर्त्यस्य। (२१अ० १४क०) सोमो देवोऽअमर्त्यः॥

अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम् ॥१६१॥

पदमध्येऽपञ्चमः स्पर्शः पञ्चमेषु स्पर्शेषु प्रत्ययेषु विच्छेदमापद्यते। विच्छेदो यम इत्यनर्थान्तरम्। रुक्क्म इत्यत्र "स्वरात्संयोगादिः" इत्यादिना ककारस्य द्विर्भावे कृतेऽनेन सूत्रेण द्वितीयस्य ककारस्य यम इत्ययं कार्य्यक्रमः क्रियते। यथा (८अ० ४क०) यज्ञ्नः)। जकारयमौ जकारश्च संयोगः। दद्ग्ना। दकारधकारयमौ नकारश्च संयोगः। अन्तःपद इति किम्। (२०अ० ४५क०) त्मन्या समञ्जन्। अत्र द्विरुक्त्यभावात्तकारमकारौ संयोगः॥

ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः॥ १६२॥

एवमधस्तनसूत्रेण यमापत्तिं विधायाधुना यत्र यमा नेष्यन्ते तत्र दोषमाह। ऊष्मभ्यः परेषु पञ्चमेषु "ऊष्मान्तस्थाभ्यश्च स्पर्शः" इत्यनेन सूत्रेण पञ्चमानां स्पर्शानां द्विरुक्तौ कृतायां प्रथमानां स्पर्शानां यमापत्तिः सम्भवति स चात्र दोषः॥

स्फोटनं च ककारवर्गे वा स्पर्शात्॥ १६३॥

स्फोटनं च स्पर्शानां दोषमापद्यते ककारवर्गे परभूते। स्फोटनं नाम पिण्डीभूतस्य संयोगस्य पृथगुच्चारणं स्फोटनाख्यो दोषो वा न दोषः। यथा (१३अ० २०क०) काण्डात् काण्डात्। (७अ० २६क०) वषट् कृतम्। (१८अ० ८५क०) यक्कात् क्लोमानम्।

यथा सूत्रकारप्रस्थानं तथा स्फोटनं दोषः "स्वरात्सँयोगादिः" इति द्विरुक्तेर्विधानं न च स्फोटने सति द्विरुक्तिः सम्भवति। तथा चोक्तं याज्ञवल्क्येन "यमान्विद्यादयस्खण्डान् सान्तस्थान्हरुपिण्डवत्। अन्तस्था यमवर्जन्तु ऊर्णापिण्डं विनिर्दिशेत्"। यथाऽयस्खण्डादीनामाश्लेषस्तथैतेषां व्यञ्जनानामिति श्लोकार्थः॥

स्वरात् स्वरे समानपदे जोयन्नतु ऋकारे ॥१६४॥

वाशब्दो विकल्पार्थः पूर्वसूत्रादिहानुवर्त्तते। स्वरात्परो जकारो वा यकारमापद्यते। स्वरे परभूते समानपदे न तु ऋकारे परे। यथा (१३अ० ५१क०) अ॒जो ह्य॒ग्नेरज॑निष्ट। स्वरादिति किम्। (१०अ० २४क०) अ॒जा गोजाः। स्वर इति किम्। (१८अ० ४२क०) भुज्यु॑ः। (२अ० ८क०) आज्यं॑म्। समानपद इति किम्। (१७अ० ३४क०) तदिन्द्रे॑ण जयत। नत्वृकार इति किम्। (२२अ० ७क०) वि॒जृम्भ॑माणाय॥

ख्यातेः खयौ कशौ गार्ग्यः सक्ख्योक्ख्यमुक्ख्यवर्जम् ॥ १६५ ॥

ख्या प्रकथन इत्यस्य धातोः खकारयकारौ संयोगमाहुः केचित्। यथा (११अ० २०क०) वि॒ख्याय॒ चक्षु॑षा। आख्यातम्। ककारशकारौ संयोगार्थं गार्ग्य आह। विक्शाय चक्षुषा। आक्शातम्। एतानि पदानि वर्जयित्वा सक्ख्यम्। उक्ख्यम्। मुक्ख्यम्। अधस्तनयोगे जकारस्य यकारापत्तिरुक्ता या चास्मिन् योगे ख्यातेः क्शापत्तिरुक्ता एते चरकाणां इतरेषां माध्यन्दिनानां न भवत इति॥

त्रिपदाद्यावर्त्तमाने संक्रमः ॥ १६६ ॥

"सठ०हितायाम्" इत्यत आरभ्य संहिताया लक्षणं विधा याधुना पदसंहितालक्षणं विधित्सयेदमाह। त्रिपदप्रभृत्या वर्त्तमाने ग्रन्थे सङ्क्रमो भवति। आवर्त्तमानानि पदानि अति क्रम्यानावर्त्तमानेन पदेन सह सन्धिर्भवतीत्यर्थः। यथा व॒यम्। स्वा॒म्। पत॑यः। र॒यी॒णाम्। स्वाहा। रु॒द्र। यत्। तस्मै॑। ते। द्र॒न्दो॑। ह॒विषा॑। वि॒धे॒म॒। ब॒र्हि॑षदः। पि॒तर॑ः। द्र॒न्द्र॑। आ। या॒हि॒। चि॒त्र॒भा॒नो॒। सु॒ताः॑। इ॒मे। त्वा॒यवः॑। अ॒ग्नौ॑भिः। तना॑। पू॒ता॒स॒॑। धि॒या। इ॒षि॒तः॑। अयं तावदुत्सर्गः॥

द्विपदैकपदान्यप्यनुवाके ॥१६७॥

द्वे पदे समाहृते द्विपदं एकं च तत्पदं च एकपदं द्विप दानि च एकपदानि च बहुवचनोपदेशात् त्रिवर्त्तमानानि सङ्क्रम्यन्ते। अतिक्रम्यन्त इत्यर्थः। चिरावृत्त इति हि वक्ष्यति। वाज॒॑। च। मे। प्रस॑वः॑। प्र॒यति॑ः॑। एक पदे यथा (१४अ० १४क०) मा। क्र॒न्द॒॑। प्र॒मा। प्र॒ति॒ मा। अनुवाक इति किम्। (१अ० २क०) वसो॒॑। प॒वित्र॑म्। अ॒सि॒। द्यौः॑। पृ॒थि॒वी। (१अ० १६क०) कु॒क्कु॒टः॑। अ॒सि॒। चिरावृत्त इति किम्। (४अ० ११क०) व्र॒तम्। क्र॒णु॒त॒। व्र॒तम्। क्र॒णु॒त॒। (७अ० २०क०) सोम॒॑। प॒व॒ते॒। सोम॒॑। प॒व॒ते॒। (१अ० १क०) ऊ॒र्जे। त्वा॒। ऊ॒र्जे। त्वा॥

अनन्तरे ॥१६८॥

उभयोरपि योगयोरयं योगविशेषः। "त्रिपदाद्यावर्त्तमान" इति यदुक्तं तदनन्तरे पुनरुक्ते भवति। आनन्तर्यं चार्थकृतं शब्दकृतं च गृह्यते। यत्रानन्तरोऽर्थो व्यवहितो वा बुद्धौ विपरिवर्त्तते तदर्थकृतमानन्तर्यम्। यथा (२अ० ३क०)

गन्धर्वः)। त्वा। विश्वावसुः। परि। दधातु। अरिष्टौ। यजमानस्य। परिधिः)। असि। अग्निः)। इडः)। ईडितः)। इन्द्रस्य। बाहुः)। असि। दक्षिणः)। मित्रावरुणौ। त्वा। अनन्तरेऽर्थे एतदुदाहरणम्। व्यवहिते तु। यथा (१३अ० २३क०) मधु÷। च। माधवः। च। वासन्तिकौ। ऋतू। (१४अ० ५क०) शुक्रः)। शुचिः÷। ग्रैष्मौ। स्वयमातृण्णाद्यासु एवं स्वमहर्षिणा प्रथमादिचितिषु कृतव्योपधाने दृष्टासु कण्डिकासु अर्थकृतमानन्तर्यं द्रष्टव्यम्। शब्दकृतं तु यथा (१अ० १४।१५क०) हविःकृत्। आ। इहि। कुक्कुटः)। असि "द्विपदैकपदान्यप्यनुवाके" इत्यत्रार्थानन्तर्यं मुच्यते। यथा (१अ० ६क०) कः)। त्वा। युनक्ति। सः)। कस्मै। तस्मै। (११अ० २४क०) त्वम्। अग्ने। द्युभिः÷। आशुशुक्षणिः)। (१२अ० ६६क०) याः)। ओषधीः। पूर्वाः÷। जाताः) अत्र या इत्येतदोषधिविषयं पदम्। याः फलिनीरित्येतदपि ओषधिविषयं तदर्थव्यवधानान्न लुप्यते। अतो याः। फलिनीः। अफलाः) इत्यत्र सन्निधानाल्लुप्यते। यद्येवं अपुष्पाः)। याः)। पुष्पिणीः। इत्यत्र कस्माद्या इत्येतत्पदं न लुप्यते शृणु। (१२अ० ८०क०) याः। फलिनीः। याः)। अफलाः)। याः)। अपुष्पाः)। याः)। च। पुष्पिणीः। एवं चत्वारोऽत्र याःशब्दा अर्थदृष्टा भवन्ति। तत्र प्रथमस्य द्वितीयेन सम्बन्धः। तृतीयस्य चतुर्थेन सम्बन्धः। तत्र तृतीयं या इत्येतत्पदं न विद्यत इत्येतस्य ख्यापनार्थं चतुर्थं न लुप्यते या इत्येतत्पदम्। शब्दानन्तर्यं तु यथा (३८अ० २क०) अश्विभ्यामिन्वस्य सरस्वत्यै। इन्द्राय। स्वाहा। इन्द्रवत्। वः)। ते। (१७अ० ६।७क०) द्विवः)। सꣳस्पृशः÷। पाहि। मधु। गर्भः÷। देवानाम्॥

अपराङ्के ॥ १७० ॥

अपरस्य अन्यस्याङ्गभूते पुनरुक्ते सङ्क्रमो भवति । यथा (४अ० ६क०) स्वाहा । यज्ञम् । मनसः । उरोः । अन्तरिक्षात् । द्यावापृथिवीभ्याम् । वातात् । आ । रभे । अत्र स्वाहाकारः अपराङ्गम् । अपराङ्गत्वाल्लोपः । अपराङ्ग इति किम् । (४अ० ७क०) स्वाहा । आकूत्यै । प्रयुजे । अयं च स्वाहाकारः अपराङ्गं न भवति केवलत्वात् ॥

अस्वरविकारे ॥ १७१ ॥

न विद्यते स्वरविकारो यस्मिन् पुनरुक्ते तदस्वरविकारं पुनरुक्तं तस्मिन् पुनरुक्ते सङ्क्रमो भवति । यथा (१अ० ३१क०) तेजः । असि । शुक्रम् । अमृतम् । धाम । नाम । अस्वरविकार इति किम् । (१अ० २७क०) मुच्मा । च । असि । शिवा । च । असि । स्योना । (२०अ० १०क०) देवाः । यज्ञम् । अतन्वत । भेषजम् । (३०अ० १३क०) यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥

अलिङ्गविकारे ॥ १७२ ॥

लिङ्गविकारो न विद्यते यस्मिन् पुनरुक्ते तदतिक्रम्यते । यथा (१४अ० १९क०) अग्नेः । भागः । असि । दीक्षायाः । आधिपत्यम् । ब्रह्म । सूतम् । विवृत् । स्तोमः । इन्द्रस्य । विष्णोः । क्षत्रम् । पञ्चदशः । अत्र सूतशब्दो नपुंसकविषयो नोऽतिक्रम्यते । अलिङ्गविकार इति किम् । (१४अ० २०क०) आदित्यानाम् । मरुताम् । गर्भाः । सूताः । देवस्य । सवितुः । बृहस्पतेः । समीचीः । दिशः । सूताः । एकत्र शब्दः पुरुषविषयः । एकत्र स्त्रीविषयो नो गृह्यतेऽपि

न लुप्यते। १२अ० १०३क०) सम्। ते। पयाꣳसि। सम्। ऊँ। यन्तु। वाजाः। द्रुणयानि। अत्र त्रयाणां समग्रब्दानां मध्ये प्रथमो नपुंसकविषयो द्वितीयः पुरुषविषयोऽतो गृह्यते। तृतीयो नपुंसकविषय एव अतो लिङ्गभेदादतिक्रम्यते॥

असमाने॥ १७३॥

असमानविषये आवर्त्तमाने पुनरुक्ते संक्रमो भवति। यथा (६अ० २०क०) आयु÷। यज्ञेन। कल्पताम्। प्राणः। चक्षु÷। श्रोत्रम्। पृष्ठम्। अत्र आयुरादयो यज्ञकृतेरसमानाः। असमान इति किम्। यज्ञो यज्ञेन कल्पताम्। अत्र यज्ञो यज्ञेनेति। यज्ञकृतेः समानोऽतो गृह्यते॥

विरावृत्ते॥ १७४॥

विरावृत्ते पुनरुक्ते संक्रमो भवति। "द्विपदैकपदान्यप्यनुवाके" इत्यस्यायं शेषः। यथा (१४अ० १७क०) दृषे। ऊर्जे। रय्यै। पोषाय। आशुः। त्रिवृत्। विरावृत्त इति किम्। (१अ० १क०) दृषे। त्वा। ऊर्जे। त्वा। वायवे÷॥

गूढे॥ १७५॥

गूढेऽपि विरावृत्ते सङ्क्रमो भवति। गूढं नाम यत्र तृतीयपदस्यावृत्तिरनुषङ्गापेक्षितत्वात्पदस्याधस्तनपदानुषङ्गेण भवति। यथा (६अ० २२क०) दृयम्। ते। राट्। यन्ता। असि। यमनः। ध्रुवः। धरुणे÷। अत्रासिशब्दो यन्ता ध्रुव इत्यनयोः पदयोः सँलग्नः पठ्यते। यमनधरुणपदयोस्तु अनुषज्यते। अनुषङ्गापेक्षिणौ हि तौ। अतः स एवं गूढश्चतुरावर्त्तमानः श्रुत्या विरावृत्तौ व्यतिक्रम्यते। गूढ इति किम्। १अ० १क०) दृषे। त्वा। ऊर्जे। त्वा॥

पदसमूहे ॥ १७६ ॥

पदसमूहः पदसङ्घातः । यत्रैकादि पदं बहु कृत्वा आवर्त्तते स पदसमूहोऽत्राभिप्रेतः । "त्रिपदाद्यावर्त्तमानः" इत्यनेनैवेतरस्य गतार्थत्वात् । यथा (१६अ० १७क०) शतरुद्रियाध्याये । नमो हिरण्यबाहवे सेनान्ये । (१८अ० १क०) वाजः । च । मे । प्रसवः । प्रयतिः । ननु स्वरिति स्वः । च । मे । यज्ञेन । कल्पताम् । इत्यत्र कस्मान्न लोपो भवति । शृणु । अविकारार्थं च पुनरुक्तस्य ग्रहणमित्युपरिष्टाद्वक्ष्यति । तेन सूत्रेणेह पुनरुक्तं गृह्यते । एवमर्थविशेषात् पुनरुक्तस्य ग्रहणं भवति । अर्थसामान्यात् पुनरुक्तस्यातिक्रमः । तथा चोक्तम् । द्रव्यदेवतार्थलिङ्गवचनस्वरकर्त्तृभेदैः पुनरुक्तस्य ग्रहणं भवति । आह च । पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः । अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति ॥

सर्वसंहितायाम् ॥ १७७ ॥

आर्षी च संहितायां पुनरुक्ते आवर्त्तमाने सङ्क्रमो भवति । यथा (१२अ० ५४क०) लोकन्ताऽइन्द्रम् । (३२।३।२४अ० १०।११।१२।१३क०) हिरण्यगर्भऽइत्येषः (१२अ० १०२क० मा मा हिꣳसीदित्येषा (८अ० ३६।३७क०) यस्मान्न जातऽइत्येषः । एवं च कृत्वा ब्रह्मयज्ञसंहितायां गलिता ऋचोऽध्येतव्याः । ब्रह्मयज्ञसंहितायाः परिपूर्णतायै इति बोध्यम् ॥

अवसानार्थं पुनर्ग्रहणम् ॥ १७८ ॥

एवमधस्तादर्थनिबन्धनं पुनरुक्तस्य ग्रहणं चोक्त्वेदानीं संहितार्थमाह । संहिताऽवसानार्थं च न पुनरुक्तस्य ग्रहणं भवति । यथा आकूत्यै । प्रयुजे । अग्नये । स्वाहा ।

मेधायै। मनसे। दीक्षायै। तपसे। सरस्वत्यै। पूष्णे। अग्नये। स्वाहा। अग्नये स्वाहेत्येतदत्र पुनरुक्तमवसानार्थं गृह्यते। बृहस्पतये। हविषा। विधेम। स्वाहा। नात्रावसानादन्यत्प्रयोजनमस्तीति॥

अविकारार्थं च॥ १७९॥

पदाविकारज्ञापनार्थं च पुनरुक्तं गृह्यते। यथा (२२ख० २७क०) दृषाय। ऊर्जाय। स्वरिति स्व÷। स्वाहा। मदृघ्ने व्यश्नुविने। अत्र स्वरित्येतस्य पदस्य परतो यत् स्वाहाकारस्य ग्रहणं तदविकारार्थम्। यदिह स्वाहाकारो लुप्यते। तदा क्रमसंहितायामप्यस्य पदस्य विकारः स्यात्। स्वर्मृदृघ्ने। मृदृघ्ने व्यश्नुविने। तथा च सति दृष्टरेफत्वादस्य पदस्य क्रमसंहितायां वेष्टको न स्यात्। अतः पदक्रमसंहिताया विकारार्थं स्वाहेत्यस्य पदस्य ग्रहणम्॥

उत्सर्गश्च॥ १८०॥

उत्सर्गः परित्यागः। परित्यागश्चाधस्तनसूत्रविहितस्य लक्षणस्य भवति केषाञ्चिदाचार्याणां मतेन। यथा स्वर्मृदृघ्ने। मृदृघ्ने व्यश्नुविने। एवं च कृत्वा विकल्पेनैतल्लक्षणम्॥

क्रमः स्मृतिप्रयोजनः॥ १८१॥

क्रम इत्ययमधिकार आऽध्यायपरिसमाप्तेः। संहिताध्ययने प्रयोजनं प्रसिद्धम्। यत्ते स्वाध्याये च संहितायाः सम्बन्धात् पदाध्ययने संहितार्थपरिज्ञानं प्रयोजनमिति गम्यते। उक्तं च भाष्यकारेण "पदानि स्वं स्वमर्थङ्गमयन्तीति"। पदानि स्वं स्वमर्थमभिधाय चित्तवृत्तिव्यापाराण्यर्थमवगमयन्ति। अथेदानीं पदार्था अवगताः वाक्यार्थमवगमयन्तीति पदपूर्वकं

पदार्थपरिज्ञानं पदार्थपरिज्ञानपूर्वकवाक्यार्थपरिज्ञानं दर्शयति। एवं संहितापाठे पदपाठे च प्रसिद्धं प्रयोजनम्। न तथा क्रमपाठ इत्यत आह। स्मृतिः प्रयोजन इति। स्मृतिः प्रयोजनमस्येति स्मृतिप्रयोजनः। संहिताविषयं दृढस्मरणं करोति पदविषयं च। प्रयोजनदिगियं सूत्रकृता प्रदर्शिता। प्रयोजनानि तु अस्यान्यानि बहूनि यथा द्वयोर्द्वयोः पदयोर्वर्णसंहितोदात्तादिस्वरसंहिता च क्रमं मुक्त्वा नान्येन ज्ञायते। संहितावसानं च। उक्तमं चैतत्। पदकारणं क्रमः, क्रमणं क्रमः, सम्मानं च शिष्टानां मध्ये क्रमं करोति। व्याकरणस्मृतिश्च क्रमाध्यायिनि प्रत्ययं विदधाति। तदधीते तद्वेद इत्युपक्रम्य "क्रमादिभ्यो वुन्निति" अत्र क्रममधीते क्रमकः। पदमधीते पदकः। सिद्धक्रमस्याध्ययनं दर्शयति। अतो हि क्रमो बहुप्रयोजनवान् ॥

द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमाऽवसानादपृक्तवर्जम् ॥ १८२ ॥

द्वे द्वे पदे सन्दधाति कथं सन्दधाति उत्तरेणोत्तरं पदं सन्दधाति। ततस्तेनान्यदुत्तरमेवमवसानं यावत् अपृक्तं वर्जयित्वा। अपृक्ते वक्ष्यति। यथा (३अ० ४क०) उपोत्त्वा। त्वाऽग्ने। अग्ने हविष्मतीः। हविष्मतीर्घृताचीः। घृताचीर्यन्त। यन्तहर्य्यत। हर्य्यतेतं हर्यत। अपृक्तमिति किम्। (२४अ० २२क०) सोमाय हृठ्ठसान्। हृठ्ठसानालभते। आलभते। (१अ० १क०) कर्मणऽआप्यायध्वम्। आप्यायध्वम्। प्यायध्वमघ्न्याः। (१२अ० २७क०) उदुत्त्वा। जꣳइत्यूँ। त्वा। विश्वे। (७अ० ४१क०) उदुत्यम्। जꣳइत्यूँ। त्यम्।

जातवे दसम्। (११अ० ३०क०) तमुत्वा। ज॒ꣳइत्यू॑। त्वा। दृ॒ध्यङ्।

अपृक्तमध्यानि त्रीणि स त्रिक्रमः ॥१८३॥

अपृक्त आकार उकारश्च अपृक्त एषां मध्य इत्यपृक्तमध्यानि तद्गुणसंविज्ञानो बहुव्रीहिः। लम्बकर्णवत्। त्रीणि मध्यानि स त्रिक्रमो भवति। यथा (२४अ० २२क०) सोमाय॑ हृ॒ठ॰सान्। हृ॒ठ॰सानालभते। आल॑भते। (१अ० १क०) कर्म॑णऽआप्यायध्वम्। आप्यायध्वम्। (११अ० २७क०) उदु॑त्वा। ज॒ꣳइत्यू॑। त्वा विश्वे॑। (११अ० २८क०) तमु त्वा। ज॒ꣳइत्यू॑। त्वा दृ॒ध्यङ्॥

पुनराकारेणोत्तरम् ॥ १८४ ॥

आकार उकारश्चापृक्तौ तयोरुकारस्य प्रगृह्यत्वादुपरिष्टादिष्टकं वक्ष्यति। आकारस्य यदृक्तव्यं तदाह त्रिक्रमं कृत्वा पुनराकारेणोत्तरं पदं सन्दधाति। यथा सोमाय॑ हृ॒ठ॰सान्। हृ॒ठ॰सानालभते। आलभते। कर्म॑णऽआप्यायध्वम्। आप्यायध्वम्॥

मोषूणाभीषुणौ च ॥ १८५ ॥

एतौ त्रिक्रमौ भवतः। यथा (३अ० ४५क०) मोषू॑ण÷। मोऽइति॒ मो। षु ण॑÷। ण॒ऽइन्द्र॒। (२७अ० ४०क०) अभी षु॑ण÷। षु ण॑÷। ण॒ः सखीनाम्॥

चत्वार्यपृक्तपूर्वे नकारपरे सौ ॥१८६॥

चत्वारि पदानि सन्दधाति सुइत्येतस्मिन् पदेऽपृक्तपूर्वे नकारपरे च। यथा (११अ० ३८क०) ज॒र्ह्यज॒ षु॑ण÷। ज॒ꣳइत्यू॑। षु ण॑÷। ण॒ऽज॒तये॑। (१७अ० ७७क०) ए॒ताऽइन्द्रा॑यऽज॒ षु॑ण÷। ज॒ꣳइत्यू॑। षु ण॑÷। ण॒ः सहसः। (२०अ०

७२क०) गोमदूषणासत्या। गोमदिति गो। मत्। ऊँ३इत्यूँ। सुनासत्या। नासत्याश्ववत्॥

मकारपरे चैके॥ १८७॥

सु इत्येतस्मिन् पदे अपृक्तपूर्वे मकारपरे च एके आचार्याश्चत्वारि पदानि सन्दधति। यथा (२१अ० ४क०) महीमूषु मातरम्। ऊँ३इत्यूँ। सु मातरम्। मातरठ्ँ सुव्रतानाम्। मकारपर इति जघन्यस्थायमेकीयः पक्षः। यतश्चतुःक्रमेषु सर्वेषु पूर्वो भावी उत्तरं सुपदं ततो नकारादिपदम्। यथा गोमत्। ऊ। सु। नासत्येति। तत्र उकारो भावी सुपदस्य षत्वे निमित्तम्। सुपदे षत्वं नकारादौ पदे णत्वे निमित्तम्। तत्र यदि चतुःक्रमो न स्यात्तर्हि णत्वं विहन्येत। ततस्तु आर्षी संहिता न स्यात्। चतुःक्रमे तु सा स्मृता भवति। न च कश्चिदिह सुशब्दं विना मकारादेः पदस्य विकारः सम्भवति। अतस्त्रिक्रम एवायम्। महीमूषु। ऊँ३इत्यूँ। सु मातरम्। एवं त्रिक्रमेष्वपि प्रयोजनान्यन्वेष्टव्यानि॥

पुनः सुपदेनोत्तरम्॥ १८८॥

यत्र सुपदनिमित्तस्त्रिक्रमश्चतुःक्रमो वा कृतस्तत्र पुनः सुपदेनोत्तरं पदं सन्दधाति। यथा (३अ० ४५क०) मो षूण÷। मोऽइति मो। सुन÷। (२७अ० ४०क०) अभीषूण÷। नः सखीनाम्। (२०अ० ७२क०) गोमदूषणासत्या। गोमदिति गो। मत्। ऊँ३इत्यूँ। सु नासत्या॥

पूर्वस्योत्तरसठ्ँहितस्य स्थितोपस्थितमवग्रहस्य॥ १८९॥

एवं हित्रिक्रमाद्यनन्तरं परिशिष्टं क्रमविधिमाह। पूर्व-

स्योत्तरपदस्य त्रिपदचतुःक्रमसम्बद्धस्य सतः पश्चात् स्थितोपस्थितं कर्त्तव्यम्। स्थितोपस्थितशब्देन वेष्टकोऽभिधीयते। यथा (१अ० १क) श्रेष्ठतमाय कर्मणे। श्रेष्ठतमायेति श्रेष्ठ। तमाय। (३अ० ११क०) उपप्रयन्तोऽध्वरम्। उपप्रयन्तऽइत्युप। प्रयन्त÷। एतच्च पदप्रदर्शनार्थं क्रियते॥

सुपदे शाकटायनः॥ १९०॥

सुपदे स्थितोपस्थितं शाकटायन आचार्यो मन्यते। पूर्वस्योत्तरसठ०हितस्येति वर्त्तते। यथा (३अ० ४५क०) मो षूण÷। मोऽइति मो। स्विति सु। (१०अ० ७२क०) गोमदूषुणोसत्या। गोमदिति गो। मत्। ऊँऽइत्यूँ। स्विति सु। एतच्च पदस्वरूपज्ञापनार्थं विनापि वेष्टकेन पदस्वरूपं ज्ञायते इति शाकटायनमतं न साधीयः॥

अन्तःपददीर्घीभावे॥ १९१॥

पूर्वस्योत्तरसठ०हितस्य स्थितोपस्थितमिति वर्त्तते। पदमध्ये दीर्घीभावोऽन्तःपददीर्घीभावस्तस्मिन्नन्तःपददीर्घीभावे पूर्वस्योत्तरसंहितस्य स्थितोपस्थितं कर्त्तव्यम्। यथा (३३अ० ३८क०) मामहन्तामदितिः। ममहन्तामिति ममहन्ताम्। (३४अ० २१क०) मादन्यं विदथ्यम्। मदन्यमिति मदन्यम्॥

विनामे॥ १९२॥

पूर्वस्योत्तरसठ०हितस्य स्थितोपस्थितमिति वर्त्तते। विनामशब्देन दन्त्यस्य मूर्द्धन्यभाव उच्यते। विनामश्चैष इत्थंभूतो गृह्यते। यत्र निमित्तनैमित्तिकावेकपदस्थौ भवतः पूर्वपदस्य विनामे उत्तरपदसंहितस्य स्थितोपस्थितं कर्त्तव्यम्। यथा (२६अ० १७क०) सिषासन्तो वनामहे। सिसासन्त-

ऽइति सिसासन्तः । (१८अ० २क०) सुषाव सोमम् । सुसावेति सुसाव ॥

प्रगृह्ये ॥ १९३ ॥

"प्रगृह्यम्" इत्यधिकृत्य यदिहितं तस्यायं विधिः । पूर्वस्योत्तरसंऽहितस्य स्थितोपस्थितमिति वर्त्तते । पूर्वे प्रगृह्ये उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम् । यथा (३३अ० ८३क०) इन्द्राग्नीऽअपात् । इन्द्राग्नोऽइतीन्द्राग्नी । (१२अ० २७क०) उदुत्वा । ऊँऽइत्यूँ । त्वा विश्वे (१३अ० ७क०) अमी रोचने । अमीऽइत्यमी । रोचने दिवः ॥

रिफिते निरुक्ते ॥ १९४ ॥

"विसर्जनीयो रिफितः" इत्यस्मिन्नधिकारे यानि रिफितानि पदानि विहितानि तेषामत्र ग्रहणम् । "पूर्वस्योत्तरसंऽहितस्य स्थितोपस्थितम्" इति वर्त्तते । सप्तमीकृतविभक्तिव्यत्ययम् । पूर्वे रिफिते पदे निरुक्ते संहितायामनिर्ज्ञातरिफे उत्तरपदसंहिते स्थितोपस्थितं कर्त्तव्यम् । यथा (७अ० ५क०) अन्तस्ते । अन्तरित्यन्तः । ते द्यावापृथिवी । (२६अ० २०क०) नेष्टः पिब । नेष्टरिति नेष्टः । पिबऽऋतुना । सर्वे एते वेष्टकाः पदप्रकृतिज्ञापनार्थाः ॥

अवसाने च ॥ १९५ ॥

"विरामोऽवसानम्" इत्युच्यते । अवसाने विरामे स्थितोपस्थितं कर्त्तव्यम् । संहितावसानज्ञापनार्थम् । (३अ० २क०) अग्नये जातवे दसे । जातवेदसऽइति जात । वेदसे ॥

यथासमाम्नातं क्रमावसानर्ठ० सङ्क्रमेषु ॥ १९६ ॥

अवसाने सन्धिः सङ्क्रम इत्युच्यते। गलत्यदमतिक्रम्य-गलता सह सम्धानं सङ्क्रमः। क्रमसन्धिविषयभूतेषु येन प्रकारेण क्रमावसानं परिपठितं तेनैव भवति। यथा (१अ० २।३क०) विश्वधा॑ऽ॑ पर॒मेण॑। ह्व॒ार्षी॑च्छ॒तधा॑रम्। अधस्तनसूत्रापवादः॥

दृङ्दृद्भिः॥ १९७॥

इत्युक्तार्थम्॥

इति कात्यायनकृते प्रातिशाख्यसूत्रे चतुर्थोऽध्यायः॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते माहिषो दाख्ये प्रातिशाख्यभाष्ये चतुर्थोऽध्यायः समाप्तः॥

पञ्चमोऽध्यायः॥

समासेऽवग्रहो ह्रस्वसमकालः॥ १॥

संहितापदलक्षणं वक्तव्यमिति शास्त्रमारब्धं कात्यायनेनाचार्येण तत्र संहितायामित्यधिकृत्य "पदान्तपदयोः सन्धिः" इत्यादिना ग्रन्थेन संहितालक्षणमशेषमुक्तं तथा "क्रमः स्मृतिप्रयोजनः" इत्यादिना ग्रन्थेन क्रमलक्षणमुक्तम्। तथा "अर्थः पदम्" इति पदलक्षणमुक्तम्। स्वरश्च "स्वरितवर्जमेकोदात्तं पदम्" इत्यनेनाध्यायेन विहितः। अर्थविशेषाच्चतुःप्रकारं तत् पदं भवतीत्युपरिष्टाद्वक्ष्यति। "क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्। सत्त्वाभिधायकं नाम निपातः पादपूरणं" इति तत्राख्यातं भवति। यथा पाहि। रक्ष। यज। यच्छेति। उप-

सर्गा भवन्ति यथा । "परोपापावप्रतिपरी"त्यादयः । निपाता भवन्ति । यथा । "वा च कमुचितसमस्मात्" इत्यादयः । नाम त्रिप्रकारं भवति । कृत्तद्धितसमाससंज्ञाभेदेन भिन्नम् । कृतः । यज्ञघ्नः । वेदः । याज्ञा । भूतिः । तद्धिताः । आग्नेयः । अग्नीषोमीयः । ऐन्द्राग्नः । वैष्णवः । समासा भवन्ति यथा विष्वक्कर्मा विमनाः । विहायाः । मदङ् । तत्र समासपदेऽवग्रहो भवति द्वयोः पदयोर्बहूनां वा परस्पराकाङ्क्षया सम्बद्धानां यत्र द्वित्वादिपदसमूहोच्चारणं स समासः । स च समासश्चतुःप्रकारो भवति । यथा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहयः । तत्र पूर्वपदप्रधानोऽव्ययीभावः । यथा समभूमि । विषुरूपम् । अन्तःपदम् । अनुरूपम् । उत्तरप्रधानस्तत्पुरुषः । यथा अघर्षठसः । व्रतपते । आखरेष्ठः । उपप्रयन्तः । उभयपदप्रधानो द्वन्द्वः । यथा अग्नीषोमौ । इन्द्राग्नी । मित्रावरुणौ । दोषातपसोः । अन्यपदप्रधानो बहुव्रीहिः । यथा अनमीवाः । कृष्णग्रीवाः । श्रितिकृच्च । एवमेतस्मिंश्चतुःप्रकारेऽपि समासपदेऽवग्रहो भवति । द्वयोः पदयोः पृथग्ग्रहणमवग्रहः । नाना ग्रह इत्यर्थः । स च ह्रस्वसमकालो ह्रस्वाच्चरतुल्यकालो भवति । यथा (४अ० १क०) ऋक्सामाभ्यामित्यृक् । सामाभ्याम् । मन्तरन्तऽइति सम् । तरन्तः । अधिकारसूत्रमेतत् ॥

तरतमयोश्चातिशयेऽदक्षिणप्रत्यासङ्गे ॥२॥

तरतमयोश्च प्रत्ययोः परभूतयोरतिशयवाचिनोरवग्रहो भवति । न चेदक्षिणशब्दस्तत्र प्रत्यासन्नो भवति । यथा (१८अ० १०क०) पूर्णतरमिति पूर्णं । तरम् । (१अ० ८क०) वक्षितमामिति वक्षि । तमम् । सक्षितमामिति सक्षि । तमम् ।

अतिशय इति किम्। (१९अ० ८क०) कारोतरेण दधतः। (१९अ० ८क०) यदा पिपेष मातरम्। अदक्षिणप्रत्यासङ्ग इति किम्। (१५अ० ५क०) द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषान्देवानामुत्तरम्। असमासार्थ आरम्भः॥

वीतमहूतमसूतमगोपातमरत्नधातमवसुधातमाः पूर्वेण ॥ ३ ॥

एतानि पदानि तमपः पूर्वेण पदेनावगृह्यन्ते। वीतम यथा (११अ० ३४क०) देववीतमऽइति देव। वीतमः। (१अ० ८क०) देवहूतममिति देव। हूतमम्। (६अ० २८क०) इन्द्राय। सुषूतमम्। सुसूतममिति सु। सूतमम्। (८अ० २८क०) सः। सुगोपातमऽइति सु। गोपातमः। (२६अ० २०क०) रत्न धातममिति रत्न। धातमम्। (२७अ० १४क०) वसुधातमऽइति वसु। धातमः॥

सर्पदेवजनेभ्यश्च ॥ ४ ॥

सर्पदेवजनेभ्य इत्येतच्च पदं पूर्वेण पदेनावगृह्यते। यथा (३०अ० ६क०) सर्पदेवजनेभ्यऽइति सर्प। देवजनेभ्यः। उपरिष्टाद्वक्ष्यति "बहुप्रकृतावागन्तुना पर्वणा" इत्यस्यापवादः॥

तूणवध्मुत्तरेण ॥ ५ ॥

तूणवध्मित्येतत्पदं उत्तरेण पदेनावगृह्यते। यथा (३०अ० १८क०) क्रोशाय। तूणवध्मिति तूणव। ध्मम्॥

रायस्पोषदे विजावेति च ॥ ६ ॥

रायस्पोषदे विजावा इत्येते च पदे चशब्दादुत्तरेण पदेनावगृह्यते। यथा (५अ० १क०) रायस्पोषदऽइति रायस्पोष।

दे। (१२अ० ४४क०) स्यात्। नः। सूनुः। तनयः। विजा-येति वि। जाया ॥

बहुप्रकृतावागन्तुना पर्वणा ॥ ७ ॥

बहूनि पदानि यत्र तद्बहुप्रकृतिपदं तत्र आगन्तुना पर्वणा समासलक्षणेन यत्पश्चात्कालिकं पदं भवति तेनावग्रहो भवति। यथा (३१अ० १९क०) प्रजापतिरिति प्रजा। पतिः। (१३अ० १९क०) प्रजापतिगृहीतयेति प्रजापति। गृहीतया। समा-सलक्षणेन यदाऽऽगन्तुकं पदं तदिह गृह्यते न तु पाठेन तेनैतद्भवति। यथा (३अ० ३७क०) सुप्रजाऽइति सु। प्रजाः। (२८अ० ५क०) सुप्रायनाऽइति सु। प्रायनाः ॥

तद्धिते न्यायसंहितं चेत् ॥ ८ ॥

तद्धितीत्यत्र एकस्य वतिशब्दस्य तन्त्रेणोच्चारणं द्रष्टव्यम्। तद्धिते मत्वर्थीये तद्धिते वती च परभूतेऽवग्रहो भवति न्याय-संहितं व्याकरणशास्त्रोक्तसन्धिमत् पदं चेद्भवति। यथा (१३अ० २६क०) मधुमदिति मधु। मत्। (८अ० ५७क०) हिरण्य-वदिति हिरण्य। वत्। वती खल्वपि यथा (११अ० १०क०) वरिष्ठाम्। अनु। मँवतमिति मम्। वतम्। तद्धितीति किम्। (३१अ० ३क०) एतावान्। अस्य। महिमा। न्यायसंहित-मिति किम्। (६अ० २८क०) ऊर्ज्स्वन्तम्। (६अ० २८क०) पयस्वन्तम्। (७अ० ३६क०) मरुत्वन्तम् ॥

मस्त्वन्वातातिषु च ॥ ९ ॥

मस्। त्वम्। वा। ताति। एतेषु तद्धितेषु अवग्रहो भवति। मस् यथा (२३अ० ५०क०) कर्ति। होतारः। ऋत-मऽइत्यृतुः। मः। त्वम् यथा (३१अ० १७क०) मर्यस्य। देव-त्वमिति देव। त्वम्। वा यथा (६अ० १८क०) देवत्वेति देव।

वा। यत्तम्। तति यथा (७अ० ११क०) ज्येष्ठतातिमिति ज्येष्ठ। तातिम्॥ बर्हिषदम्॥

धात्वर्थे यकारे स्वरपूर्वे ॥ १० ॥

प्रातिपदिकं सुब्धातुर्भवतीति कृत्वा यकार उपादीयते स धात्वर्थो यकारः "सुप आत्मनः क्यच्" इत्यादिभिः सूत्रैर्यो विहितः स इह गृह्यते। तस्मिन् धात्वर्थे यकारे प्रत्यये स्वरपूर्वेऽवग्रहो भवति। यथा (२०अ० ३८क०) वृषायमाणः। वृषयमाणऽइति वृष। यमाणः। (३अ० २६क०) अघायतः। अघयतऽइत्यघ। यतः। धात्वर्थ इति किम्। (२८अ० १२क०) यदक्रन्दः प्रथमं जायमानः। स्वरपूर्व इति किम्। (२१अ० ५२क०) इन्द्राय पच्यते मधु। वाच्यति। रूपोदाहरणम्॥

वाऽसौ च भूतकाले स्वरेण ङ्कस्वादनुषि ॥ ११ ॥

वासौ च प्रत्यये परभूतेऽवग्रहो भवति। भूतकालार्थाभिधायिनि स्वरेण ङ्कस्वात् स्वराद्ङ्कस्वात्परभूते स्वरेण वा ङ्कस्वेनोपलक्षिते। एवं तृतीया पञ्चम्यर्थे इति विभक्तिव्यत्ययेन योजना। अनुषि वाऽसौ ऋषिपरभूतेऽवग्रहो न भवति। यथा (८अ० १९क०) यच्चिवाऽसऽइति यच्चि। वाऽस+। (८अ० १९क०) पपिवाऽसऽइति पपि। वाऽस+। (८अ० १८क०) सस्मृवाऽसऽइति सस्मृ। वाऽस+। भूतकाल इति किम्। (१७अ० ६२क०) सुविद्वाऽमऽइति सु। विद्वाऽस+। स्वरेण ङ्कस्वादिति किम्। जिगीवाऽस+। स्वरादिति किम्। (११अ० २२क०) चिकित्वान्मादय। अनुषीति किम्। (७अ० ४४क०) सूर्य+। आत्मा। जगतः। तस्थ+॥

प्रत्नपूर्वविश्वेमर्त्तुभ्यस्था ॥ १२ ॥

एभ्यः परस्थाप्रत्ययोऽवग्रह्यते । प्रत्न यथा (७अ० ११क०) प्रत्नथेति प्रत्न । था । (७अ० ११क०) पूर्वथेति पूर्व । था । (७अ० ११क०) विश्वथेति विश्व । था । (७अ० ११क०) इमथेतीम । था । (२०अ० ५८क०) ऋतूथेत्यृतु । था । इन्द्र + । वनस्पति + । शशमानः । परिस्रुतेति परि । स्रुता ॥

ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यये ॥ १३ ॥

ह्रस्वात् स्वराद्व्यञ्जनाच्च परभूते भकारादिविभक्तिप्रत्ययेऽवग्रहो भवति । ह्रस्वाद्भवति यथा (१६अ० २७क०) तक्षभ्यऽइति तक्ष । भ्यः । (१६अ० २७क०) अग्निभिरित्यग्नि । भि + । व्यञ्जनाद्भवति यथा (१६अ० २३क०) तिष्ठद्भ्यऽइति तिष्ठत् । भ्यः । (१६अ० २३क०) धावद्भ्यऽइति धावत् । भ्यः । ह्रस्वव्यञ्जनाभ्यामिति किम् । (१६अ० २७क०) रथकारेभ्यऽइति रथ । कारेभ्य + । (१६अ० २७क०) कुलालेभ्य + । भकारादौ विभक्तिप्रत्यय इति किम् । (२४अ० ४०क०) कर्णौ गर्दभः । (१८अ० ८५क०) कुम्भो वनिष्ठुः । भकारादाविति किम् । अग्निषु ॥

स्विति चानतौ ॥ १४ ॥

सु इत्येतस्मिँश्च विभक्तिप्रत्ययेऽनताववग्रहो भवति । यथा (१२अ० ३१क०) अप्स्वित्यप् । सु । अग्ने । सधि + । (१७अ० ४१क०) अभि । प्र दृष्टि । निः । दृष्ट । हृत्स्वितीति हृत् । सु । अनताविति किम् । ऋतु । अग्निषु । (१७अ० १३क०) स्रुषु । विभक्तीति किम् । (८अ० १८क०) असुम् । ह्रस्वव्यञ्जनाभ्यामिति पूर्वसूत्वादनुवर्त्तते । ताभ्यामिति किम् । यासु ॥

वर्णसङ्ख्येऽन्यतरतः ॥ १५ ॥

वर्णसमासः सङ्ख्यासमासश्चान्यतरतो विकल्पेनावग्रह्यते। वर्णसमासो भवति यथा (२४अ० २क०) धम्रो'हित'ऽइति धम्र। रो'हित(:। कर्कन्धु'रोहित'ऽइति कर्कन्धु'। रोहित(:। संख्यासमासो भवति यथा (१८अ० २४क०) पञ्च'दशेति पञ्च'। दश। त्रयो'दशेति त्रय÷। दश॥

अनुदात्तोपसर्गे चाख्याते ॥ १६ ॥

अनुदात्त उपसर्गोऽस्येत्यनुदात्तोपसर्गमाख्यातं तस्मिन्नवग्रहो भवति। यथा (२५अ० ३७क०) यत्। अखा'य। वास÷। उप'स्तृणन्तीत्यु'प। स्तृणन्ति'। (२५क० ३२क०) अभि। शूलम्। नि'हत'स्येति नि। हतस्य। अव'धाव'तीत्यव'। धाव'ति॥

गिरिशयोः ॥ १७ ॥

गिरिशब्दोऽवग्रह्यते त्रयोः प्रत्यययोः परयोः। यथा (१६अ० ३क०) शिवाम्। गि'रि'त्रेति गिरि'। त्र। (१६अ० ४क०) गिरि'शेति गिरि'। श। अच्छ। वदा'मसि॥

डूवकाराम्रेडितायनेषु च ॥ १८ ॥

डूवकार आम्रेडित अयन एतेषु सुप्रत्ययेषु परभूतेषु अवग्रहो भवति। डूवे यथा (२०अ० ७०क०) सुची'वेति सुचि। डूव। घृतम्। चम्वी'वेति चम्वी। डूव। सोम÷। कारे यथा। (२२अ० ७क०) हिङ्कारा'येति हिम्। कारा'य। (१९अ० १७क०) वषट्कारे'भि'रिति वषट्। कारे'भि÷। आहु'ती'रित्या। हु'ती(:। आम्रेडिते यथा (२७अ० ४१क०) यज्ञायज्ञ'येति यज्ञा। यज्ञा। व(:। (१५अ० २६क०) सꣳ समिति सम्। सम्। इत्। (३६अ० १२क०) यतो'यत-

ऽइति यत॑+ । यत॑: । अयने यथा (२२अ० ७क०) आय॑ना-
येत्या । अय॑नाय । (२२अ० ७क०) प्राय॑नायेति प्र । अय॑नाय ॥

एकात्समीची ॥ १९ ॥

एकशब्दात्परः समीचीशब्दोऽवग्रहार्हते । यथा (१२अ०
२क०) शिण्ड॑म् । एक॑म् । स॒मीची॑ऽइति॑ सम् । ई॒ची । एका-
दिति किम् । (११अ० २८क०) स्व॒र्विदे॑ति स्व॒: । विदा॑ । स॒मी-
ची॑ऽइति स॒मीची॑ । उर॑सा । मना॑ ॥

त्वायवः शँय्योर्बर्हिर्ष्ठाऽस्मयुं मृण्मयीꣳ सुम्न-
याऽऽशुया साधुया धृष्णुया विशालमनुया ॥२०॥

एतानि पदानि सावग्रहाणि भवन्ति । त्वायवो यथा
(२०अ० ७८क०) सु॒ताः॑ । इ॒मे । त्वायव॑ऽइति॑ त्वा । य॒व॑+ ।
शँय्योर्यथा (३अ० ४२क०) शि॒वम् । शं॒मम् । शँ॒य्योरि॑ति॑
शं॒म् । यो॒: । बर्हिर्ष्ठा यथा (५अ० ११क०) इ॒दम् । अ॒ह॒म् ।
त॒न्न॒म् । वा॒: । ब॒र्हि॒र्ष्ठेति॑ बर्हि॒: । धा । य॒ज्ञ॒स्य॒ । अस्मयुंय्यथा
(११अ० ११क०) अ॒ग्निम् । भर॑न्तम् । अ॒स्म॒युमित्य॑स्म॒ । युम् ।
मृण्मयीँय्यथा (११अ० ५६क०) म॒हीम् । मृ॒ण्म॒यी॒मिति॑ मृत् ।
मयी॑म् । योनि॑म् । अ॒ग्नये॑ । सुम्नया यथा (१२अ० ५४क०)
धीरा॒: । दे॒वेषु॑ । सु॒म्न॒येति॑ सुम्न॒ । या । आशुया यथा (१३अ०
८क०) तव॑ । भ्र॒मास॑+ । आ॒शु॒येत्या॑शु । या । साधुया यथा
(१४अ० १क०) आ । सी॒द॒ । सा॒धु॒येति॑ साधु । या । धृष्णुया
यथा (२७अ० ३७क०) चि॒त्र॒ । व॒ज्र॒ह॒स्ते॒ति॑ वज्र । ह॒स्त॒ ।
धृ॒ष्णु॒येति॑ धृ॒ष्णु । या । म॒ह॒: । विशालँय्यथा (१४अ० ८क०)
दृ॒ष्टि॑+ । वि॒शा॒ल॒मिति॑ वि । शा॒ल॒म् । पु॒रु॒ष॒: । अनुया यथा
(१५अ० ६क०) अह॑+ । अ॒नु॒येत्य॑नु । या । आर्द्रया । रात्री॑म् ।
उ॒शिजा॑ । वसु॑भ्य॒ऽइति॒ वसु॑ । भ्य॒: ॥

मृगयुमुभयादतोऽपामार्गकिम्पूरुषमिति च

॥ २१ ॥

एतानि पदानि सावग्रहाणि भवन्ति। मृगयुँय्यथा (३०अ० ५क०) मृत्यवे। मृगयुमिति मृग। युम्। उभयादतो यथा (३१अ० ८क०) ये। के। च। उभयदतऽइत्युभय। दतः। अपामार्ग यथा (३५अ० १०क०) अपामार्ग। अपमार्गेत्वप। मार्ग। त्वम्। अस्मत्। किम्पूरुषँय्यथा (३०अ० १४क०) पर्वतेभ्यः। किम्पूरुषम्। किम्पुरुषमिति किम्। पुरुषम्॥

पारावतानाग्निमारुताश्चेति जातूकर्ण्यस्य

॥ २२ ॥

पारावतान् आग्निमारुता इत्येते पदे सावग्रहे भवतो जातूकर्ण्याचार्यस्य मतेन। यथा (२४अ० २५क०) अक्रे। पारावतान्। (२४अ० ७क०) कल्माषाः। आग्निमारुताऽइत्याग्नि। मारुताः। जातूकर्ण्यस्येति किम् (२४अ० ७क०) पारावतान्। आग्निमारुताः॥

अधीवासमित्येके ॥ २३ ॥

अधीवासमित्येतत्पदमेके आचार्याः सावग्रहं कुर्वन्ति। (२५अ० ३७क०) अधिवासमित्यधि। वासम्। या। हिरण्यानि। एक इति किम्। अधीवासम् (२५अ० ३७क०)॥

प्रतिषेधेनावग्रहः ॥ २४ ॥

"समासेऽवग्रहः" इति योऽवग्रहाधिकारः कृतस्तस्यायमपवादः। प्रतिषेधवाचिना नञा निपातेन सह समासे सति अवग्रहो न भवति। यथा (११अ० २१क०) न रक्षसा। अरक्षसा। मनसा। (११अ० ४४क०) न दूराः। अनिराः।

अमीवाः। निषीदन्। अत्र "नलोपो नञः" इति नकारलोपः। "तस्मान्नुडचि" इति नुडागमः। प्रतिषेधेनेति किम्। (१अ० २९क०) अनिशितऽइत्यनि। शितः। असि ॥

उत्तरेण चाकारेण ॥ २५ ॥

प्रतिषेधवाचिनो नञ्निपातादुत्तरेण चाकारेण सह समासेऽयग्रहो न भवति। यथा (१६अ० १४क०) अनातताय। धृषवे। (२७अ० ७क०) अनाधृष्यः। जातवेदाऽइति जात। वेदाः ॥

द्वापूर्वम् ॥ २६ ॥

द्वापदपूर्वं समासपदं नावग्रह्यते। यथा (१७अ० २५क०) द्वादश। (१४अ० १८क०) द्वाविंऽशः। (१७अ० २५क०) द्वाविंऽशत् ॥

सङ्ख्यापूर्वश्च धा ॥ २७ ॥

सङ्ख्यापूर्वपदो धापदोत्तरपदः समासो नावग्रह्यते। यथा (८अ० ५५क०) अष्टधा। दिवम्। (२३अ० ५०क०) कति। होमासः। कतिधा। समिद्धऽइति सम्। इद्धः। सङ्ख्यापूर्वइति किम्। (५अ० ११क०) इदम्। अहम्। तत्त्वम्। वाः। बर्हिर्इति बर्हिः। धा ॥

द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि ॥ २८ ॥

द्वन्द्वसमासपदानि द्विवचनान्तानि स्वरान्तपूर्वपदानि नावग्रह्यन्ते। यथा (७अ० ८क०) अयम्। वाम्। मित्रावरुणा। (७अ० ३०क०) इन्द्राग्नीऽआगतम्। (२अ० १५क०) अग्नीषोमयोः। उज्जितिम्। द्वन्द्वानीति किम्। (१अ० ८क०)

अङ्तमसि। हविर्धानमिति हविः। धानम्। खरान्तपूर्वपदादीति किम्। (४अ० ८क०) ऋक्सामयोरित्यृक्। सामयोः। शिल्पे॥

तद्धिते चैकाक्षरे हृद्भावनिहिते॥ २९॥

समासादुत्तरकालं तद्धिते उत्पन्नेऽवग्रहो न भवति यत्र तद्धितजनितैवैकाक्षरे पूर्वपदे हृद्भिर्भवति। यदि च तत्पूर्वपदेन सह अनिहितं भवति अव्यवहितं भवति यदि पूर्वपदहृद्या उत्तरपदमव्यवहितं भवतीत्यर्थः। यथा (११अ० ७क०) वैष्टभेन छन्दसा। (२०अ० ८क०) मे। भाग÷। सौभाग्यं पस्÷। तद्धित इति किम्। (२३अ० ३१क०) गायत्री। त्रिष्टुप्। त्रिस्तुबिति त्रि। स्तुप्। (२५अ० १४क०) सुभगेति सु। भगा। एकाक्षरहृद्भाविति किम्। (२४अ० ३१क०) मयुःऽ। प्राजापत्यऽइति प्राजा। पत्यः। अनिहित इति किम्। साम्राज्यमिति साम्। राज्यम्। अत्र पूर्वपदोत्तरपदयोर्व्यञ्जनेन व्यवधानं कृतम्॥

अश्नुतिसहत्योः क्लृप्तोपे॥ ३०॥

अश्नुतेर्धातोः सहतेश्च क्तप्रत्ययलोपे सति अवग्रहो न भवति। अश्नुतेर्न भवति यथा (१८अ० २क०) प्राङ् (१०अ० २८क०) प्रत्यङ्। सहतेः खल्वपि यथा (१८अ० ३६क०) कृतधामा। (१७अ० ३६क०) दुश्चावनःऽ पृतनाषाट्। अश्नुतिसहत्योरिति किम्। (२७अ० १२क०) सुकृदिति सु। कृत्। देवः। सविता। क्लृप्तोप इति किम्। (१८अ० ५०क०) आप्येत्या। अश्। जानुं (१८अ० ६२क०) पृतनासह्यायेति पृतना। सह्याय॥

अनुरुसुभ्याम्॥ ३१॥

उरु सु इत्येताभ्यां परयोरवतिसहित्योः लोपे सत्यवग्रहो भवति। यथा (१५अ० २२क०) उरुव्यचसमित्युरु । व्यचसम्। अश्नुते। (१३अ० २क०) सुरुचऽइति सु। रुचे÷। वेनः)। आवः। (२५अ० २३क०) सुप्राङिति सु। प्राङ्। अजः)। अधस्तनयोगस्यापवादः॥

समिदाभ्याँ वत्सरः॥ ३२॥

सम् इदा एताभ्यां परो वत्सरशब्दो नावग्रह्यते। यथा (२७अ० ४४क०) संवत्सरः)। अग्नि। इदावत्सरः)। समिदाभ्यामिति किम्। (२७अ० ४४क०) परिवत्सरऽइति परि। वत्सरः)। इडवत्सरऽइतीत्। वत्सरः)॥

प्राग्निभ्यामनिन्धौ प्रश्लेषे॥ ३३॥

प्र अग्नि इत्येताभ्यां प्रश्लिष्टसन्धाववग्रहो न भवति। इन्धिदीमाविति मुन्धातुं वर्जयित्वा। प्रशब्दाङ्गवति यथा (१८अ० २क०) प्राणः)। अग्निशब्दाङ्गवति यथा (१८अ० १६क०) आग्नीध्रम्। यत्। सरस्वति। प्राग्निभ्यामिति किम्। (१६अ० ३८क०) वीध्रायेति वि। ईध्राय। अनिन्धाविति किम्। प्रेङऽइति प्र। इङः। प्रश्लेष इति किम्। (२२अ० ७क०) प्रायणाय। प्रायनायेति प्र। अयनाय॥

पाङ्क्तानुदुद्रोऽबभ्राय सर्ठ०शयात्॥३४॥

पाङ्क्तान् उद्रः अबभ्राय एतानि पदानि संशयान्नावग्रह्यन्ते। पङ्क्तेः पूर्वपदं त्रायतेरुत्तरपदं, पातेर्वा पूर्वपदं तनोतेरुत्तरपदम्। तथा उद्रः उत् ऊर्ध्वं द्रवतीति उद्रः उत्शब्दः पूर्वपदं द्रवतेरुत्तरपदम्। यद्वा उत् रातीति उद्रः। उत् पूर्वपदं रातेरुत्तरपदम्। तथा अबभ्रशब्दः अपो बिभर्त्ति धारय-

ोत्सब्भ्रः। अप्शब्दः पूर्वपदं बिभर्त्तेरुत्तरपदम्। यद्वा। अभ्र-
भ्रं मभ्रचरमत्यर्थाः। इत्यभ्रतेरेवाभ्रम्। एवमेतानि पदानि
पूर्वोत्तरपदसंशयान्नावग्रह्यन्ते। हेतुवचनादन्यत्रापि यत्र
संशयस्तत्रावग्रहो न भवति। यथा (२४अ० २६क०) अन्तरि-
क्षाय पाङ्क्त्वान्। (२२अ० २४क०) अपामुद्रो मार्षाम्
२२अ० २४क०) अब्भ्राय स्वाहा। एतान्युदाहरणानि पद-
संहिताया अन्यान्यपि यथासम्भवमूह्यानि चेति॥

**जनयत्याऽओषधयो दृषायिषत च नाम्न-
म्यमजावयो वलगम् ॥ ३५ ॥**

एतानि पदानि नावग्रह्यन्ते। यथा (१अ० २२क०) जन-
यत्यै। त्वा। (११अ० ४४क०) ओषधयः। प्रति। मोदध्वम्।
२अ० ३०क०) आ। दृषायिषत। (३अ० ३२क०) नहि।
षाम्। अमा। चन। (३अ० ३२क०) कदा। चन। स्तरीः।
रसि। (४अ० १७क०) पावकः। अस्मभ्यम्। शिवः। भव।
ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्ययः" इत्यस्यापवादः।
अजावयो यथा (३अ० ४२क०) उपहूताऽइत्युप। हूताः।
अजावयः। "समासेऽवग्रहः" इत्यस्यापवादः। वलग यथा
५अ० २३क०) इदमहन्तं वलगमुत्किरामि॥

समानोऽनश्वमेधे ॥ ३६ ॥

समानशब्दोऽश्वमेधमन्त्रमुक्ताऽन्यत्र नावग्रह्यते। यथा
५अ० २३क०) यमे समानः। यमसमानः। अनश्वमेध
इति किम्। (२२अ० ३३क०) समानो यज्ञेन कल्पताए स्वाहा।
समानऽइति सम्। आनः। एकस्मै। द्वाभ्याम्॥

वायुरसजातः समुद्रमहोरात्रे विश्वानरो

विश्वाहाऽऽग्रयणोऽसपत्क्रा गोधा गोधूमाऽआशुशु-क्षणिर्न्यग्रोधः पुरोडाशः प्रावणेभिरशौतम तस्करा मस्मसाऽश्वत्थऽउपस्तिर्माकिर्विश्वामित्रो गोपा-म्राऽउगमङ्कानि कक्षीवन्तमदधात्पवीरवन्नीहारेण प्रावृता घनाघनाऽईहङ्घान्याहङ् शूघनासः कुयवं कुचरः प्रियङ्गवो नीवाराऽएकादश षोडश चन्द्र-माऽआयुवो व्याघ्राऽनड्वान् गविष्ठिरः कपर्दिने पुलस्तये निषङ्गिणे कुलालेभ्यः कर्मारेभ्यः पुञ्जि-ष्ठेभ्यो ह्रीषाय नीषाय किठं०शिलायैलष्टदाः शूकाराय शूकृताय चराचरेभ्यः पारावतान् गोल-क्तिकाऽऽखुरजगरो विपन्यवो दाक्षायणाऽआयु-धर्ठ० सुरामं बृहस्पतिर्वनस्पतिर्नराशर्ठ०सः सुर-भिर्नरिष्टायै॥ ३७॥

वायुरित्यादीनि पदानि नावगच्छन्ति। वायुर्यथा (३३अ० ४४क०) वायुः पूषा स्वस्तये। असजातो यथा (५अ० २३क०) यमसंजातो निचखान। समुद्रं यथा (६अ० २१क०) समुद्रं गच्छ स्वाहा। अहोरात्रे यथा (३१अ० २२क०) अहोरात्रे पार्श्वे। विश्वानरो यथा (३३अ० २३क०) अर्चा विश्वानराय। विश्वाहा यथा (१७अ० ४८क०) विश्वाहा ग्रर्मं यच्छतु। आग्रयणो यथा (७अ० २०क०) आग्रयणोऽसि। असपत्क्रा यथा (७अ० २५क०) असपत्क्राः समनमस्करत्। गोधा यथा २४अ० ३५क०) गोधा कालका। गोधूमा यथा (१८अ०

१२क०) गोधूमाश्च मे। आशुशुक्षणिर्यथा (११अ० २७क०) त्वमाशुशुक्षणिः। न्यग्रोधो यथा (२२अ० १४क०) न्यग्रोधश्च-मसैः। पुरोडाशो यथा (२१अ० ५९क०) पचन् पुरोडाशान्। प्रावणेभिर्यथा (१२अ० ५०क०) प्रावणेभिः। सजोषसः। अशीतम यथा (२अ० २०क०) अग्नेऽदब्धायोऽशीतम। तस्करा यथा (११अ० ७७क०) तस्करोऽ२॥ऽ उत। मस्सा यथा (११अ० ७९क०) सर्वन्तम्मस्सा कुरु। अश्वत्थे यथा (११अ० ७९क०) अश्वत्थे वो निषदनम्। उपस्तिर्यथा (११अ० १०१क०) उपस्तिरस्तु सोऽस्माकम्। मार्किर्यथा (१३अ० ११क०) अग्ने मार्किष्टे व्यथिः। विश्वामित्रो यथा। (१३अ० ५७क०) विश्वामित्रऽऋषिः। गोपां यथा (३अ० २३क०) गोपामृतस्य दीदिवम्। प्रऽउगं यथा (१५अ० ११क०) प्रउगमुक्थमव्य-थायै। अङ्गानि यथा (१८अ० ३क०) अङ्गानि च मे। कक्षी-वन्तं यथा (३अ० २९क०) कक्षीवन्तँयऽऔशिजः। अदधा-द्यथा (१९अ० ७७क०) अश्वंद्रामनृतेऽदधात्। पवीरवद्यथा (११अ० ७१क०) लाङ्गलं पवीरवत्। नीहारेण प्रावृता यथा (१७अ० ३१क०) नीहारेण प्रावृता। हे पदे अनन्तर्हिते यथा (१७अ० ३३क०) घनाघनःऽ क्षोभणः। (१६अ० ८१क०) दृंहऽ क्षान्याहृङ्। हे पदे यथा (१७अ० १४क०) सिन्धोरिव प्राध्वने शूघनासः। कुयवं यथा (१८अ० १०क०) कुयवञ्च मे। कुचरो यथा (५अ० २०क०) मृगो न भीमः कुचरो गिरिष्ठाः। प्रियङ्गवो यथा (१८अ० १२क०) प्रियङ्गवश्च मे। नीवारा यथा (१८अ० १२क०) नीवाराश्च मे। एकादश यथा (१८अ० २४क०) एकादश च मे। षोड़श यथा (१८अ० २५क०) षोडश च मे। चन्द्रमा यथा (३३अ० ९०क०) चन्द्रमाऽअप्सु। आयुवो यथा (१८अ० ३९क०) आयुवो नामः। व्याघ्रा यथा (१५अ०

१७क०) व्युप्ता क्षेतिः)। अनड्वान्यथा (२८म० ५८क०) अनड्वा-नधोरामौ। गविष्ठिरो यथा (१५म० २५क०) गविष्ठिरो नमसा। कपर्दिने पुलस्तये यथा (१६म० ४३क०) नमः+ कप-र्दिने च पुलस्तये। हे पदे यथा (१६म० २०क०) निषङ्किणे। (१६म० २७क०) कुलालेभ्यः। (१६म० २०क०) कर्मारेभ्यः। हे पदे अनन्तर्हिते यथा (१६म० २७क०) नमः कुलालेभ्यः। कर्मारेभ्यः। पुञ्जिष्ठेभ्यो यथा (१६म० २७क०) पुञ्जिष्ठे-भ्यश्च। हीप्याय यथा (१६म० ३१क०) हीप्याय च। नीप्याय यथा (१६म० ३७क०) नीप्याय च। किर्ठ-शिलाय यथा (१६म० ४३क०) किर्ठ-शिलाय च। ऐलबृदा यथा (१६म० ६०क०) ऐलबृदाऽऽयुर्युध+। शुकाराय शुक्लताय यथा (२१म० ८क०) शुकाराय स्वाहा शुक्लताय। चराचरेभ्यो यथा (२२म० २८क०) चराचरेभ्यः स्वाहा। पारावतान्यथा (२४म० २५क०) अश्वे पारावतान्। गोलक्तिका यथा (२४म० ३७क०) गोलक्तिका तुऽस्तरसाम्। आखुर्यथा (३म० ५७क०) आखुस्ते पशुः। अजगरो यथा २४म० ३८क०) अजगरो वसूनाम्। विपन्यवो यथा (३४म० ४४क०) तद्विप्रासो विपन्यव+। दाक्षायणा यथा (३४म० ५२क०) यदाबध्नन्दाक्षायणाः)। आयुधं यथा (१६म० ५१क०) परमे व्योमन्नायुधमनिधाय। सुरामं यथा (१०म० ३४क०) यत्सुरामं व्यपिबः। बृहस्पतिर्यथा। (२६म० ३क०) बृहस्पते ऽअति यत्। वनस्पतिर्यथा (२८म० ३५क०) वनस्पति+ ग्रमि-ताटवः)। नराशंसो यथा (२८म० २७क०) नराशंस-स्य महिमानम्। सुरभिर्यथा (२५म० ३५क०) यऽईमाहुः सुरभिः)। नरिष्ठाये यथा (३०म० ६क०) नरिष्ठाये भीमलम्। यैष हेतुभिरेतानि पदानि नावगच्छन्ते तान् हेतूनन्यपद-

व्याजेन विचिख्यासुराचार्यो वक्ष्यमाणसूत्रैर्वक्ष्यति। येषु च पदेषु वक्ष्यमाणहेतवो न सन्ति ते जातिवचनाः प्रत्येतव्याः। यथा (१७अ० १२क०) गोधूमपारावतादयः॥

उत्तम्भनादीन्यादिसंठ०शयात् ॥ ३८ ॥

उत्तम्भनादीनि पदानि आदिसंशयान्नावगच्छन्ति। यथा (४अ० ३६क०) वरु॑णस्योत्तम्भ॑नमसि। (११अ० ६४क०) उ॒त्याय॑ बृह॒ती भ॑व। (२२अ० ८क०) उत्थि॑ताय॒ स्वाहा॑। एतानि त्रीणि पदान्युदाहरणानि। उत्पूर्वपदानि स्तम्भेत्युत्तरपदं प्रथममुदाहरणम्। तिष्ठत्युत्तरपदे उत्तरे तत्र "उदः स्थास्तम्भोः पूर्वस्य" इति सकारस्य पाणिनिः पूर्वरूपतां विदधाति। अन्ये तु सकारलोपं विदधति। अत उत्तरपदस्यादिसंशयादेतानि पदानि नावगच्छन्ति। यथैतान्येवमन्यान्यपि द्रष्टव्यानि॥

विशौजा इत्यन्यायसमासात् ॥ ३९ ॥

विशौजा इत्येतत्पदमन्यायसमासान्नावगच्छति। विडौजा इति प्राप्ते यथा (१०अ० २८क०) विशौ॑जाः। इन्द्रो॑ऽसि॒ विजौ॑जाः॥

द्वित्यौह्यौ तुर्य्यौह्यौ षष्ठौह्यौ हृदयोपशेनेति च ॥ ४० ॥

एतानि च पदान्यन्यायसमासान्नावगच्छन्ति। अत्र च "उवर्ण ओकारम्" इति ओकारे प्राप्ते औकारोऽन्यायसमासजः॥

दुष्टरो विष्टरो विष्टपो विष्टम्भो विष्टम्भनीम् ॥ ४१ ॥

दुष्टर इत्यादीनि पदानि नावगच्छन्ति। अत्राचार्येण

कारणञ्चोपन्यस्तम्। तत्र तावत् दुष्टरपदं धातुसंश्रयान्नावग्रह्यते। दुरुपसर्गः पूर्वपदान्तरतेः स्तृणातेर्वोत्तरपदमतो धातुसंश्रयान्नावग्रह्यते। विष्टरादीनि तु अन्यायषत्वसंहितानि। अतः षत्वागमोऽपि पदकारैर्न कृतः ॥

ऊवध्यमुगणाऽउखऽइष्कृतिरिष्कर्त्तारमुदरमित्युपसर्गैकदेशलोपात् ॥ ४२ ॥

एतानि पदान्युपसर्गैकदेशलोपान्नावग्रह्यन्ते। तत्र इष्कृतिः। इष्कर्त्तारमित्यनयोः पदयोर्नकारस्य नकारलोपान्नावग्रहः शेषाणामुद उपसर्गस्यान्त्यवर्णलोपान्नावग्रहः। ऊवध्यं यथा (१८अ० ८४क०) ऊर्वद्र्यवार्तठं० मद्व्यन्तद्वारात्। उगणा यथा (१६अ० २४क०) नमऽउगणाभ्यः। उखे यथा (११अ० ६१क०) अभीन्धतामुखे। इष्कृतिर्यथा (१२अ० ७४क०) इष्कृतिर्नाम वः। इष्कर्त्तारं यथा (१२अ० १०१क०) इष्कर्त्तारमध्वरस्य। उदरं यथा (२०अ० ८क०) पृष्टीर्मे राष्ट्रमुदरम् ॥

सँस्कृतठं० सँस्कृतिर्मांस्पचन्याः पूँश्चलूमित्यनुनासिकोपधत्वात् ॥ ४३ ॥

एतानि पदानि अनुनासिकोपधत्वान्नावग्रह्यन्ते। अत्र च "अग्ने पकारादुकारोदयात्" इत्यादिभिः सूत्रैरुपधानुनासिकत्वमुक्तम्। पचे चानुस्वारः, अतो वाजसनेयिनामुपधानुनासिकत्वान्नावग्रहः। काण्वानां तु वक्ष्यमाणसूत्रेण। संस्कृतं यथा (४अ० ३४क०) तन्नौ सँस्कृतम्। संस्कृतिर्यथा (७अ० १४क०) सा प्रथमा सँस्कृतिः। मांस्पचन्या यथा (२५अ० ३६क०) माँस्पचन्याऽऽउखायाः। पूँश्चलं यथा (३०अ० २०क०) नर्माय पूँश्चलूठं० हसाय ॥

अनुस्वारागमत्वादित्येके ॥ ४४ ॥

अनुस्वारागमत्वादेतोरेवैक आचार्य्या एतान्येव पदानि नावगृह्णन्ति। सर्ठंस्कृतम्। सर्ठंस्कृतिः। माण्सचन्याः। पूण्श्वलम्। काण्वादीनामयं पाठो बोध्यः॥

परीत्तोऽवत्तानाण् सुविताय सग्धिरिति च ॥ ४५ ॥

एतानि पदानि यथायोगं कारणैर्नावगृह्यन्ते। तत्र तावत्परीत्तः। अवत्तानाम्। सग्धिः। एतानि धात्वेकदेशलोपान्नावगृह्यन्ते। सुवितायेत्येतत्पदं सुदृताय सुगताय वा गृह्यते। सुताय प्रजायै वा इति धातुसंशयान्नावगृह्यते। यथा (८अ० ८क०) श्येने परीत्तोऽचरत्। (२१अ० ४३क०) अङ्गादङ्गादवत्तानाम्। (१५अ० २७क०) अग्निः सुदक्षः सुविताय। (१८अ० ८क०) सग्धिश्च मे सपीतिश्च मे। इतिशब्दोऽन्यपदप्रदर्शनार्थः। यथैतानि पदानि एतैर्हेतुभिर्नावगृह्यन्ते। एवमन्यान्यपि द्रष्टव्यानि। तथा चोक्तम्। आदिमध्यान्तलुप्तानि समासान्यायभाञ्जि च। नावगृह्यन्ति कवयः पदान्यागमवन्ति च ॥ १ ॥

वृद्धं वृद्धिः ॥ ४६ ॥

इत्युक्तार्थम्॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे पञ्चमोऽध्यायः॥

इत्यानन्दपुरवास्तव्यवज्झटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये पञ्चमोऽध्यायः समाप्तः।

षष्ठोऽध्यायः ।

अनुदात्तमाख्यातमामन्त्रितवत् ॥ १ ॥

"स्वरितवर्जमेकोदात्तम्पदम्" इत्यत्र नामाख्यातोपसर्ग-निपातानां सामान्येन स्वरोऽभिहितः । यथा "नो नौ मे मदर्थः" इत्यादिभिर्नाम्नां विशेषस्वरोऽभिहितः । यथा "वा च कमुचित्" इत्यादिसूत्रेण निपातानां च विशेषस्वरोऽभिहितः । तथा नामाख्यातोपसर्गाणां विशेषस्वरोऽभिहितः । अतस्तत्प्रतिपादनार्थमाह । "अनुदात्तमाख्यातमामन्त्रितवत्" इति । आमन्त्रितपदवदनुदात्तमाख्यातं पदं भवति । यैरेव कारणैरनुदात्तमामन्त्रितं भवति तैरेव कारणैराख्यातमपीत्यर्थः । "पदपूर्वमामन्त्रितमनानार्थे पादादौ" इत्यामन्त्रितस्यानुदात्तत्वमुक्तमिहाऽपि तथैव भवति । एतदुक्तं भवति पूर्वपदमाख्यातमनुदात्तम्भवति तच्च नानार्थे न भवति । अपादादौ च भवति पदपूर्वम्भवति (१अ० १क०) । तद्यथा । मा वस्तेनऽईशत । (१अ० १क०) मा पतौ स्यात् । अनानार्थ इति किम् । (२अ० ६क०) प्राहि यज्ञं प्राहि यज्ञपतिम् । अपादादाविति किम् । (१५अ० ३६क०) ऋतुग्रामा तऽओषैः । (१८अ० २क०) सपात्र सोमसंदृभिः ॥

उपसर्ग उपसर्गे ॥ २ ॥

उपसर्गोऽनुदात्तो भवत्युपसर्गे प्रत्यये । एतच्च समासपदे एव द्रष्टव्यम् । यथा (१५अ० ५३क०) सम्प्रचवध्वम् । सम्प्रयातारग्ने पथः । अत्र सम्प्रुपसर्ग उपसर्गोऽनुदात्तः । उपसर्ग इति किम् । (१८अ० १८क०) प्रयतिः । प्रसितिः ॥

आमन्त्रिते चोत्तरः ॥ ३ ॥

आम्रेडिते च पदे उत्तर उपसर्गोऽनुदात्तो भवति। यथा (६अ० १८क०) सठं॑ स॒मिति॒ सम्। सं॑म्। (३अ० ३४क०) उप॒ो-पेत्यु॑पं। उप। अधस्तनयोगापवादः॥

क्तादाख्यातयोश्चोदात्तयोः॥ ४॥

उदात्ते क्तप्रत्यये चाख्याते परभूते उपसर्गोऽनुदात्तो भवति। क्तति भवति यथा (१५अ० ४४क०) स्व॑+। आ। भर॑न्तः। (१५अ० ४७क०) वि॒भ्राज॑मानः॒ सरि॒रस्य॒ मध्ये॑। आख्याते भवति यथा (२५अ० २९क०) ये चार्वं॑ते पच॑नठं० स॒म्भर॑न्ति। (२५अ० ३३क०) य॒दूवं॑ध्य॒मुदर॑स्याप॒वार्ति॑। क्तादाख्यातयोरिति किम्। (२९अ० १९क०) अनुगावोऽनु भग॑÷क॒नीन॑म्। उदात्तयोरिति किम्। (१८अ० १क०) प्रय॑तिः। प्रसि॑तिः। (४अ० २क०) ग्रि॒वाऽ॒ ग्रम्माम्परि॑ दधे। यत्र चानुदात्तत्वमुपसर्गस्य न भवति। तत्र पृथक्पदत्वमपि भवति। "स्वरितवर्जमेकोदात्तं पदम्" इति परिभाषितत्वात्॥

नाम्येकाक्षरश्च स्वरसन्धेयेऽक्तति॥ ५॥

अभ्युपसर्ग एकाक्षरश्चोपसर्गः स्वरात्मके उपसर्गे स्वरसन्धेये चाक्तति प्रत्यये नानुदात्तो भवति। अभेः स्वरात्मके भवति यथा (१२अ० ९४क०) अ॒भि। आ। व॒र्त्त॑स्व। अभेः स्वरसन्धेये अक्तति भवति यथा (१०अ० १क०) या॑भि÷। मि॒त्रावरु॑णौ। अ॒भि। अ॒भि॒स्रुत्। (३२अ० ७क०) अ॒भि। ऐ॒क्षेता॑म्। मन॑सा। एकाक्षरस्य स्वरात्मके भवति यथा (१९अ० ७५क०) वि। आ। अ॒क॒रो॒त्। (१७अ० १६क०) नि। असी॑दत्। एकाक्षरस्य स्वरसन्धेयेऽक्तति भवति यथा (१२अ० १०२क०) स॒त्यधर्मा॑ वि आ॒न॒ट्। (३१अ० १०क०) य॒त्। पुरु॑षम्। वि। अ॒ट॒धुः। अधस्तनयोगापवादः॥

आ पूतजातयोः ॥ ६ ॥

आ इत्ययमुपसर्गः पूतजातयोः प्रत्यययोर्नानुदात्तो भवति। यथा (४अ० २क०) आ पूतः। एमि। (१२अ० १३क०) आ जातो विश्वा ॥

अधिनिप्रप्रति श्रिताऽत्रिणभानवपचतेषु ॥ ७ ॥

अधि नि प्र प्रति एते उपसर्गाः श्रित अत्रिण भानव पचत एषु प्रत्ययेषु नानुदात्तो भवति। अधि यथा (२०अ० ३२क०) अधि श्रिताः। नि यथा (१७अ० १६क०) विश्वन्न्यत्रिणम्। प्र यथा (१५अ० २४क०) प्रभानवः। प्रति यथा (२१अ० ६०क०) प्रति पचता गभीषत ॥

उज्जेषमावर्त्तेऽआपनीफणत्सनिष्यदत्सँवतं प्रयाणꣳ सञ्चरन्तꣳ सठꣳरभध्वं प्रसितिँ विक्रमस्वेत्येतेष्वनु ॥ ८ ॥

उज्जेषम्, आवर्त्ते, आपनीफणत्, सनिष्यदत्, सँवतम्, प्रयाणम्, सञ्चरन्तम्, सठꣳरभध्वम्, प्रसितिम्। विक्रमस्व, एतेषु प्रत्ययेषु अन्वित्ययमुपसर्गो नानुदात्तो भवति। उज्जेषं यथा (२अ० १५क०) अग्नीषोमयोरुज्जितिमनूज्जेषम्। आवर्त्ते यथा (२अ० २७क०) सूर्य्यस्याहृतमन्वावर्त्ते। आपनीफणद्यथा (६अ० १४क०) पथामङ्काꣳस्यन्वापनीफणत्। सनिष्यदद्यथा (६अ० १४क०) अनु सठꣳ सनिष्यदत्। सँवतं यथा (११अ० १२क०) वरिष्ठामनु सँवतम्। प्रयाणं यथा (१२अ० ३क०) अनु प्रयाणमुषसो विराजति। सञ्चरन्तं यथा (१३अ० ५क०) समानँयोनिमनु सञ्चरन्तम्। सठꣳ रभध्वं यथा (१७अ० ३८क०) इन्द्रꣳ सखायोऽनु सठꣳ रभध्वम्। प्रसितिं यथा (१३अ० ६क०) तृष्वी-

मनु प्रसितिन्द्रूणानः)। विक्रमस्व यथा (१२अ० ५क०) पृथिवी-मन विक्रमस्व ॥

ओपप्रोदात्ते ॥ ९ ॥

आ उप एतौ प्रोपसर्गे उदात्ते प्रत्यये नानुदात्तौ भवतः। आ यथा (१८अ० ७२क०) आ प्रयातु परावत॰। (५अ० १९क०) आ प्रयच्छ दक्षिणात्। उप यथा (३४अ० १९क०) उप प्रयाहि। (२९अ० २३क०) उप प्रागाच्छसनम् ॥

अभिप्रेह्युपसम्प्रयातप्रत्यातनुष्वासुषाव ॥१०॥

अभि प्रेहि उपसम्प्रयात प्रत्यातनुष्व आसुषाव एते चोप-सर्गा यथागृहीता नानुदात्ता भवन्ति। यथा (१७अ० ४४क०) अभि प्रेहि निर्दह। (१५अ० ५३क०) उप सम्प्रयाताग्नेः पथः)। (१३अ० १२क०) उदग्ने तिष्ठ प्रत्यातनुष्व। (१९अ० २क०) आ सुषाव सोमसर्दृभिः ॥

प्रकृत्याऽऽख्यातमाख्यातपूर्वम् ॥ ११ ॥

यदुक्तम् "अनुदात्तमाख्यातमामन्त्रितवत्" इति तस्यायमप-वादः। आख्यातपूर्वमाख्यातं प्रकृतिस्वरं भवति। उदात्तपूर्वं भवति यथा (२१अ० ४२क०) पिबन्तु। मदन्तु। व्यन्तु ॥

उदात्ताच्चामन्त्रितादनन्तरम् ॥ १२ ॥

उदात्तस्वराच्चामन्त्रितपदादनन्तरमाख्यातं पदं प्रकृति-स्वरं भवति। यथा (८अ० ३८क०) अग्ने पवस्व (२१अ० २८क०) होतर्यज ॥

एकान्तरादपि ॥ १३ ॥

एकेन पदेन व्यवहितादप्यामन्त्रितपदात्परमाख्यातं प्रकृति-स्वरं भवति। यथा (२२अ० ४क०) ब्रह्मन्त्स्तभ्नन्त्यामि।

१८अ० ६०क०) देवा॑ ÷ । मध्स्थाः । विद । रूपम् । अ स्य अपिशब्देन विकल्पो ज्ञेयः । क्वचिद्भवति क्वचिन्न भवति यथा । (३अ० २८क०) इडे॑ । आ । इ॒हि ॥

यदृत्तोपपदाच्च ॥ १४ ॥

यदो वृत्तं यदृत्तं सर्वविभक्त्यन्तं सर्वप्रत्ययान्तं च गृह्यते त् । यम् । येन । यतः । यथा । यत्र । यदि । इत्यादि । यदृत्तोपपदात्परमाख्यातं पदं प्रकृत्या भवति । (१५अ० ४९क० माहुर्मनवस्तोर्णबर्हिषम् । (१५अ० ४९क०) येनऽऋषयस्तसा सत्रमायन् । (३अ० १४क०) यतो॑ जातोऽअरो॑चथाः । ३अ० २८क०) यथाऽयँ वायुरेजति । (१८अ० ५८क०) यत्रऽऋष्टयो जजग्मुः । (२०अ० १५क०) यदि॒ दिवा यदि नक्तमे॑ांसि चक्रम । अत्र सर्वत्र यदि यदृत्तस्याख्यातपदेन सम्बन्धो भवति तदैवाख्यातपदं विक्रियते न तु सन्निधिमा॑ण । यथा (२०अ० १७क०) यदेकस्याधिधर्मणि तस्यावय॑नमसि । तथा चोक्तम् । यस्य येनार्थसम्बन्धो दूरस्थस्यापि स्य तत् । अर्थतो ह्यसमर्थानामानन्तर्यमकारणमिति ॥

हेश्च ॥ १५ ॥

हिशब्दाच्च परमाख्यातं पदं प्रकृत्या भवति । यथा (११अ० ०क०) आपो॑ हिष्ठा मयो॑भुवः ÷ ॥

उत्तरेऽपि ॥ १६ ॥

उत्तरेऽपि हिशब्दे आख्यातं पदं प्रकृत्या भवति । यथा अ० ८क०) इन्दवो वा मृजन्ति॒ हि ॥

नेत् ॥ १७ ॥

नेदित्यस्मान्निपातसमाहारात्परमाख्यातपदं प्रकृतिस्वरं भवति। यथा (२अ० १७क०) ए॒षनेत्त्वदप॑चे॒त या॑ते ॥

समनसस्करत् ॥ १८ ॥

करदित्येतदाख्यातं पदं समनस इत्येतत्पूर्वं प्रकृत्या भवति। यथा (७अ० २५क०) अ॒मप्र॒क्षाऽ॒ मम॑नसस्क॒र॑त्। समनस इत्येतत्पूर्वमिति किम्। (२१अ० २२क०) सत्त्वो भे॑षज॒ं कर॑त् ॥

द्वयोः पूर्वठ० समुच्चये ॥ १९ ॥

द्वयोराख्यातयोः समुच्चयेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं पदं प्रकृत्या भवति। समुच्चयो नाम द्वयोराख्यातयोरेकस्मिन्नर्थे समावेशः। यथा (११अ० २७क०) शर्म॑ च॒ स्थः। वर्म॑ च॒ स्थ॒ः। (८अ० २२क०) शम्। च॒ वक्त्व॑ पर॑ च॒ वक्त्व॒ ॥

वा विचारणे ॥ २० ॥

द्वयोराख्यातयोर्विचारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातम्प्रकृत्या भवति, वा शब्देन चेदाख्यातयोर्योगो भवति। संहितायां प्रायश उदाहरणानि न लभ्यन्ते। रूपोदाहरणानि तु दीयन्ते। देवदत्तो भुङ्क्तां वा यज्ञदत्तो वा भुङ्क्ताम् ॥

अहविनियोगे ॥ २१ ॥

द्वयोराख्यातयोर्विनियोगेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति। अहशब्देन चेदाख्यातयोर्योगो भवति। विनियोगो नाम द्वयोः पुरुषयोरेकस्मिन् कर्मणि एकस्य पुरुषस्य सम्बन्धः। अन्यस्मिन् कर्मण्यपरस्य सम्बन्धः। रूपोदाहरणन्दीयते। यथा "देवदत्तोऽहं ग्रामं गच्छतु" यज्ञदत्तोऽहं गाः पालयतु ॥

एवावधारणे ॥ २२ ॥

द्वयोराख्यातयोरवधारणेऽर्थे वर्त्तमानयोः पूर्वमाख्यातं प्रकृत्या भवति। एवशब्देन चाख्यातयोर्योगो भवति। अवधारणं नाम द्वयोः कर्मणोर्द्वयोश्च कर्त्तोरेकस्मिन् कर्मण्येकः कर्त्ताऽवधियते परस्मिन्नन्यः। यथा देवदत्त एव ग्रामं गच्छतु, यज्ञदत्त एव भुङ्क्ताम् ॥

उपपदाप्रयोगेऽपि च ॥ २३ ॥

च वा ह अह एव एतानि च प्रभृतीनि यान्युपपदानि उक्तान्याख्यातस्य विकारीणि तेषामर्थो यदि कथञ्चिदवगम्यते। तथा चोक्तम्। उपसर्गात्परो यस्तु पदादिरपि दृश्यते। उच्चस्थानास्थितो यत्र गुरुं तत्रैव कारयेत्। इति तदा एतेषामुपपदानामुच्चारणेऽपि आख्यातं न विक्रियते। तथा रूपोदाहरणम्। सुखं भवथ। पवित्रकं भवथ। चशब्दोऽत्र लुप्तः। इत्थंभूतानि छन्दस्युदाहरणानि द्रष्टव्यानि ॥

परोपापावप्रतिपर्य्यन्वपत्यध्याङ्प्रसन्निर्दुरुन्निविस्वभि ॥ २४ ॥

परा उप अप अव प्रति परि अनु अपि अति अधि आङ् प्र मम् निर् दुर् उद् नि वि सु अभि एते विंशतिरुपसर्गाः प्रकृतिस्वरा भवन्ति। अस्य चोपसर्गस्य "उपसर्ग उपसर्गे" इत्यादिकः पुरस्तादपवादो द्रष्टव्यः। प्रकृतिस्वरस्तु व्याकरणपठितोऽत्र गृह्यते। तथा च तल्लक्षणम्। "निपाता आद्युदात्ताः" "उपसर्गाश्चाभिवर्जम्" इति। तथा चोक्तम्। एकारोऽथ चकारो वा रेफा दीर्घपरेषु च। समुपसर्गेत्येतेष्वेव न संशयः ॥ १ ॥ उक्तानामुपसर्गाणामनित्यमुपसर्गगुरु। यथा (३अ० ५३क०)

स्वनु योजान्विन्द्र ते हरी। विंशतेरुपसर्गाणामुञ्चा एकाक्षरा नव। आद्युदात्ता दशैतेषामन्तोदात्तस्त्वभीत्ययम्॥

द्विस्पर्शम्॥ २५॥

द्वौ स्पर्शौ यस्मिन् पदे तद्द्विस्पर्शं पदम्। अधिकारसूत्रमेतत्॥

वेत्तु वित्त्वाऽस्मद्ग्रुक्पात्त्रमभित्यम्मृत्तिकाद्वन्दात्त्रठ० समाववर्त्यृद्विर्वृद्विरराध्याऽर्द्धशुद्धबुद्धनक्तंनिषस्पखिन्नान्नसन्नाश्च॥ २६॥

एतेषु पदेषु द्वौ स्पर्शौ भवतः। वेत्तु यथा (१अ० १८क०) प्रति त्वा पर्वती वेत्तु। द्वौ तकारौ संयोगः। वित्त्वा यथा। (२अ० २१क०) वित्त्वा मातुर्मित। द्वौ तकारौ वकारश्च संयोगः, अस्मद्ग्रुक् यथा (७अ० ३८क०) अस्मद्ग्रुग् वाहधे। पात्त्रं यथा (७अ० २४क०) आसन्ना पात्त्रञ्जनयन्त देवाः। द्वौ तकारौ रेफश्च संयोगः। अभित्त्यं यथा (४अ० २५क०) अभित्त्यन्देवम्। द्वौ तकारौ यकारश्च संयोगः। मृत्तिका यथा (१८अ० १३क०) अश्मा च मे मृत्तिका च मे। द्वौ तकारौ संयोगः। द्वं यथा (१२अ० ७१क०) विमुच्यद्वमघ्न्या देवयानाः। दकारधकारौ वकारश्च संयोगः। दात्त्रं यथा (१अ० ६क०) सोमस्य दात्त्रमसि स्वाहा। द्वौ तकारौ रेफश्च संयोगः। समाववर्त्ति यथा (२०अ० १३क०) समाववर्त्ति पृथिवी। रेफौ द्वौ तकारौ संयोगः। ऋद्धिर्यथा (८अ० ८२क०) मत्स्यऽऋद्धिरसि। दकारधकारौ संयोगः। वृद्धिर्यथा (१८अ० ४क०) वृद्धञ्च मे वृद्धिश्च मे। दकारधकारौ संयोगः। अराद्धा यथा (३०अ० ९क०) अराद्धाऽएदिधिषुः पतिम्। दकारधकारौ यकारश्च संयोगः। अर्द्धो यथा

(१७अ० २क०) अन्तश्च परार्द्धश्चैता मे । रेफदकारधकाराः संयोगः । शुद्धो यथा (२४अ० ३क०) शुद्धबालः सर्वशुद्धबालः । दकारधकारौ संयोगः । बुद्धो यथा (२२अ० ७क०) प्रबुद्धाय स्वाहा । दकारधकारौ संयोगः । नक्तं यथा (१३अ० २८क०) मधु नक्तमुतोषसः । द्वौ ककारौ तकारश्च संयोगः । निषत्तो यथा (२२अ० ८क०) निषत्ताय स्वाहा । द्वौ णकारौ संयोगः । स्विन्नो यथा (२०अ० २०क०) स्विन्नः स्नातो मलादिव । द्वौ नकारौ संयोगः । अन्नं यथा (११अ० ८३क०) अन्नपतेऽन्नस्य । द्वौ नकारौ संयोगः । सन्नो यथा (८अ० ६८क०) सन्नऽ मिन्धु ÷ । द्वौ नकारौ संयोगः । "स्वरात् संयोगादिः" इत्यस्य प्रायशोऽपवादभूतमेतत् सूत्रम् ॥

न त्त्वर्चिश्विसतयेभ्यस्त्वैकम् ॥ २७ ॥

त्त व्व र्च श्वि स त य एतेभ्यः परस्त्वशब्दो न द्विरुच्यते एकमेव व्यञ्जनं भवति । त्त यथा (१०अ० ८क०) त्तत्वस्य योनिरसि । व्व यथा (१०अ० ८क०) वृत्रं वधेत् । र्च यथा (७अ० ४२क०) चित्रं देवानाम् । श्वि यथा (२४अ० ३८क०) श्वित्रऽआदित्यानाम् । स यथा (८अ० ५२क०) मत्वस्यऽऋद्धि ÷ । त यथा (१३अ० ३१क०) तत्र गच्छ । य यथा (१३अ० ३१क०) यत्र पूर्वे परेताः । "स्वरात् संयोगादिः" इत्यस्यायमपवादः ॥

ईध्म्रायवार्ध्नीनसोद्राश्वराश्वेत् ॥ २८ ॥

ईध्म्राय वार्ध्नीनस उद्रः एते स्पर्शाः संयोगादयो न द्विरुच्यन्ते । चरद्रव्यवचनाश्चेद्भवन्ति । ईध्म्राय यथा (१६अ० ३८क०) नमो वीध्म्राय च । धकाररेफौ यकारश्च संयोगः । वार्ध्नीनसो यथा (२४अ० ३८क०) वार्ध्नीनसस्ते । रेफधकारौ रेफश्च संयोगः ।

द्रो यथा (२४अ० ३७क०) अपामुद्रो मासाङ्कश्यप+। चरद्व्यवचना इति किम्। (२४अ० २१क०) समुद्राय शिशुमारान्। अत्र समुद्रशब्देन पार्थिवः समुद्र उच्यते॥

उपोत्थित उत्तम्भनमुत्तभानोत्थायोत्थिताय्येति त्रीणि॥ २९॥

उपोत्थितः उत्तम्भनम् उत्तभान उत्थाय उत्थिताय एतेषु पदेषु त्रीणि स्पर्शाख्यानि व्यञ्जनानि भवन्ति। उपोत्थितो यथा (८अ० ५५क०) क्रयाय्योपोत्थितोऽसुरः। द्वौ तकारौ थकारश्च संयोगः। उत्तम्भनं यथा (४अ० ३६क०) वरुणस्योत्तम्भनम्। त्रयस्तकाराः संयोगः। उत्तभान यथा (१७अ० ७२क०) दिवमुत्तभान तेजसा। त्रयस्तकाराः संयोगः। उत्थाय यथा (११अ० ६४क०) उत्त्थाय बृहती भव। द्वौ तकारौ थकारश्च संयोगः। उत्थिताय यथा (२२क० ८क०) उत्त्थिताय स्वाहा। द्वौ तकारौ थकारश्च संयोगः॥

बर्हिरङ्क्ताम्भद्रेण पृङ्क्तं पङ्क्तिः समङ्धि परिवृङ्धि पाङ्क्तानिति द्वावनुनासिकौ पूर्वावारपन्तीवर्जमिति च॥ ३०॥

बर्हिरङ्क्ताम् भद्रेण पृङ्क्तम् पङ्क्तिः समङ्धि परिवृङ्धि पाङ्क्तान्। एवं जातीयकेषु स्पर्शात् पूर्वौ द्वावनुनासिकौ ङकारौ भवतः। आरपन्तीशब्दं वर्जयित्वा। बर्हिरङ्क्तां यथा (२अ० २२क०) सम्बर्हिरङ्क्ताम्। भद्रेण पृङ्क्तं यथा (८अ० ४क०) सम्भद्रेण पृङ्क्तम्। पङ्क्तिर्यथा (१४अ० १७क०) पङ्क्तिश्छन्द+। समङ्धि यथा (१३अ० ४१क०) पयसा समङ्धि। परिवृङ्धि यथा (१३अ० ४१क०) परि वृङ्धि

हरसा । पाङ्क्तमथा (२४म० २६क०) अन्तरिक्षाय प्राङ्ङ्-त्वान् । आरपन्तीवर्जमिति किम् (२२म० २क०) कृतस्य धाम्ने त्वरमारपन्ती ॥

वृद्धँ वृद्धिः ॥ ३१ ॥

वृद्ध्यर्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

इत्यानन्दपुरवास्तव्यवज्यटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

सप्तमोऽध्यायः ।

अथावसानानि ॥ १

अथशब्दोऽधिकारार्थः । पदावसानान्यधिक्रियन्ते वेदितव्यानि । पदान्तस्येतिकरणस्यादेश यः सन्धिः स उच्यत इति यावत् ॥

कण्ठ्यस्वरमेकारेण परिगृह्णीयात् प्लुतवर्जम् ॥२॥

कण्ठ्यो ह्रस्वोऽकारो दीर्घश्चाकारः स्वरस्तमेकारेण परिगृह्णीयात् प्लुतमाकारं वर्जयित्वा । यथा (१अ० ९क०) यज्ञस्यान्तां पश्च । पश्चेति पश्च । (३३म० ९क०) द्रविणस्युर्विपन्यया । विपन्ययेति विपन्यया । प्लुतवर्जमिति किम् । (२२म० ४९क०) विवेशा३ इति विवेशा ॥

ईवर्णमीकारेण ॥ ३ ॥

ईवर्णमीकारेण परिगृह्णीयात् । यथा (१अ० १क०) प्रशून्

धाहि। प्राहीति पाहि। (७अ० १०क०) अश्विना सनृतावती। सनृतावतीति सू। नृतावती॥

उवर्णं वकारेण ॥ ४ ॥

उवर्णं वकारेण परिगृह्णीयात्। यथा (३३अ० १२क०) तवं द्युम्नान्युत्तमानि सन्तु। सन्विति सन्तु॥

औकारं च ॥ ५ ॥

औकारं च वकारेण परिगृह्णीयात्। यथा (६अ० ३०क०) अभिषिञ्चाम्यसौ। असावित्यसौ॥

ह्रस्वकण्ठ्योपधं विसर्जनीयान्तमरिफितं विवृत्त्या ॥ ६ ॥

विसर्जनीयान्तमदं ह्रस्वाकारोपधं रिफितं यन्न भवति तद्विवृत्त्या परिगृह्णीयात्। यथा (३अ० १५क०) होता यजिष्ठोऽमध्वरेष्वीड्य+। ईड्य ऽइतीड्य÷। (३अ० १६क०) शुक्रन्दुदुक्षेऽमक्षय(:। अमक्षय ऽइत्यक्षय(:। अरिफितमिति किम्। (१३अ० ३क०) सतस्य योनिमसतस्य वि व÷। वरिति व(:। सुरुचो वेनऽआव(:। आवरित्याव(:॥

दीर्घकण्ठ्योपधंविसर्जनीयान्तमेकारान्तमैकारान्तं प्लुतं प्रगृह्यं च ॥ ७ ॥

दीर्घाकारोपधं विसर्जनीयान्तं च यत्पदं तद्विवृत्त्या परिगृह्णीयात्। एकारान्तमैकारान्तं प्लुतं प्रगृह्यं च। एतानि च पदानि विवृत्त्या परिगृह्णीयात्। दीर्घाकारोपधं विसर्जनीयान्तमुदाहरणं यथा (३अ० १५क०) यतो जातोऽअरो चथा(:। अरो चथाऽइत्यरो चथा(:। एकारान्तं यथा (३अ० ११क०) मन्ह वोचेमाग्नये। अग्नयऽइत्यग्नये। ऐकारान्तं यथा

(३अ० १३क०) उभा राधसः सह मादयध्यै। मादयध्या ऽइति मादयध्यै। प्लुतं यथा (२३अ० ४९क०) भुवनमा विवेशाऽ। विवेशाऽइति विवेशाऽ। प्रगृह्यं यथा (३३अ० ५क०) अन्यान्यावत्समुपधापयेते। धापयेतेऽइति धापयेते॥

औकारान्तञ्चैके ॥ ८ ॥

औकारान्तं च पदमेके आचार्या विवृत्या परिगृह्णन्ति। यथा (९अ० ३०क०) अभिषिञ्चाम्यसौ। अस्माऽइत्यसौ। एक इति किम्। अस्मावित्यसौ॥

भाव्युपधं च रिह्यसर्जनीयान्तानि रेफेण ॥ ९ ॥

अकण्ठ्यो भावीत्युक्तम्। भाव्युपधं रिह्यसर्जनीयान्तं रिक्षितविसर्जनीयान्तं च यत्पदं तद्रेफेण परिगृह्णीयात्। यथा (१३अ० ४३क०) अग्निमीडे पूर्वचित्तिनमोभिः। नमोभिरिति नमः। भिः। (३३अ० ५९क०) सम्राजः। कारिति कः, (१३अ० ३क०) सतश्च योनिमसतश्च विवः। वरिति वः॥

प्रथमान्तन्तृतीयेन ॥ १० ॥

प्रथमान्ताः कचटतपाः तृतीयान्ता गजडदबाः वर्गप्रथमान्तं पदं स्ववर्गतृतीयेन वर्णेन परिगृह्णीयात्। यथा (२१अ० २क०) विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्। अस्मदित्यस्मत्। (१७अ० ८९क०) समर्मृतत्वमानट्। आनडित्यानट्॥

उत्तमान्तमुत्तमेन ॥ ११ ॥

उत्तमान्तं पदमुत्तमेनैव परिगृह्णीयात्। यथा (२०अ० ८१क०) वर्त्तीं वन्द्रा नृपाय्यम्। नृपाय्यामिति नृपाय्यम्॥

इदं इदिः ॥ १२ ॥

इत्युक्तार्थम् ॥

इति कात्यायनकृतौ प्रातिशाख्यसूत्रे सप्तमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवज्रटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्ये सप्तमोऽध्यायः समाप्तः ॥

अष्टमोऽध्यायः।

अथातो वर्णसमाम्नायं व्याख्यास्यामः ॥

अथातःशब्दादुक्तार्था वर्णा यस्मिन् समाम्नाये पठ्यन्ते स वर्णसमाम्नायस्तं व्याख्यास्याम इति प्रतिज्ञा समाधानार्थम् ॥

तत्र स्वराः प्रथमम् ॥ १ ॥

व्याख्यायन्त इति शेषः। तद्यथा। अइति। आइति। आ३इति। इइति। ईइति। ई३इति। उइति। ऊइति। ऊ३इति। ऋइति। ॠइति। ॠ३इति। ऌइति। ॡइति। ॡ३इति ॥

अथ सन्ध्यक्षराणि ॥ २ ॥

व्याख्यायन्त इति सूत्रशेषः। एइति। ए३इति। ऐइति। ऐ३इति। ओइति। ओ३इति। औइति। औ३इति ॥

इति स्वराः ॥ ३ ॥

व्याख्याता इति सूत्रशेषः ॥

अथ व्यञ्जनानि ॥ ४ ॥

व्याख्यायन्त इति सूत्रशेषः। तद्यथा। किति खिति गिति

घिति ङिति कवर्गः । चिति छिति जिति झिति ञिति चवर्गः । टिति ठिति डिति ढिति णिति टवर्गः । तिति थिति दिति धिति निति तवर्गः । पिति फिति बिति भिति मिति पवर्गः ॥

इति स्पर्शाः ॥ ५ ॥

व्याख्याताः इति सूत्रशेषः ॥

अथान्तस्थाः ॥ ६ ॥

व्याख्यायन्त इति शेषः । यिति रिति लिति विति ॥

अथोष्माणः ॥ ७ ॥

व्याख्यायन्त इति शेषः । शिति षिति सिति हिति ॥

अथायोगवाहाः ॥ ८ ॥

व्याख्यायन्त इति शेषः । अकारादिना वर्णसमाम्नायेन संहिताः सन्त एते वहन्त्यालालाभं प्राप्नुवन्त्ययोगवाहाः । तथाहि ॥

ँक इति जिह्वामूलीयः ॥ ९ ॥

इति ककारपूर्वं जिह्वामूलीयं दर्शयति तथा ॥

ँप इत्युपध्मानीयः ॥ १० ॥

इति पकारपूर्वमुपध्मानीयं दर्शयति एवमन्यत्रापि द्रष्टव्यम् ॥

अं इत्यनुस्वारः ॥ ११ ॥

इति स्वरपूर्वमनुस्वारं दर्शयति ॥

अः इति विसर्जनीयः ॥ १२ ॥

इति स्वरपूर्वं विसर्जनीयं दर्शयति ॥

ङुँ इति नासिक्यः ॥ १३ ॥

अयमृक्शाखायां प्रसिद्धः ॥

कुँ खुँ गुँ घुँ इति यमाः ॥ १४ ॥

इति यमसंज्ञका वर्णा विंशतिसंख्यका भवन्तीत्येतच्चतुर्थाध्याये व्याख्यातम् ॥

एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाचः ॥ १५ ॥

य एते पञ्चषष्टिवर्णास्ते समस्ता एव त्रयीलक्षणो ब्रह्मराशिः। एत एव कदाचिदानुपूर्वा व्यवस्थिताः सन्त ऋग्यजुःसामाख्या भवन्तीत्यर्थः। लौकिकस्या अपि वाचोऽयमेवात्मा। एतदेव स्पष्टीकर्त्तुमाह ॥

यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥ १६ ॥

यत्किञ्चिद्वाङ्मयं लोके इत्यादि, एते पञ्चषष्टिवर्णा लोके वेदे च प्रतिष्ठाताः। यत्किञ्चिद्वाङ्मयं लोके इत्यादिना ते च लोके लोकैरनियतदेशकालाः प्रयुज्यमानाः सन्तो दृष्टाः। अतो वेदे तन्नियमार्थः स्वाध्यायविधिः क्रियते ॥

शुचिना ॥ १७ ॥

स्नानाचमनादिभिः शौचयुक्तेन ब्रह्मचर्य्यवता त्रैवर्णिकेन स्वाध्यायोऽध्येतव्यः ॥

शुचौ देशे ॥ १८ ॥

अनुपहतदेशे स्वाध्यायोऽध्येतव्यः। तथा चोक्तम्। द्वावेतौ वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥ १ ॥

शूद्रपतितयोरसञ्श्रावञ् स्वाध्यायोऽध्येतव्यः

॥ १९ ॥

शूद्रपतितादयो न शृण्वन्ति तथा स्वाध्यायोऽध्येतव्यः ॥

ज्ञाने ॥ २० ॥

एवं स्वाध्यायविधिमुक्त्वाऽधुना वेदस्य ग्रन्थतोऽर्थतश्च परिज्ञाने फलमाह ॥

पौरुष्यम् ॥ २१ ॥

पुरुष आत्मा तस्य विवेकस्य साधकं पौरुष्यं मुक्तिप्रदमित्यर्थः ॥

स्वर्ग्यम् ॥ २२ ॥

स्वर्गसाधकञ्च ॥

यशस्यम् ॥ २३ ॥

यशः कीर्त्तिस्तस्याः साधकम् ॥

आयुष्यम् ॥ २४ ॥

आयुषो वर्द्धनम् । यद्वेदस्यार्थज्ञाने तन्मुक्तिसाधकं स्वर्गसाधकं च भवति ॥

तथा विभक्तिपरिज्ञानम् ॥ २५ ॥

पदार्थज्ञानं तन्मुक्तिसाधकम् । यत्प्रकृतिप्रत्ययादिपरिज्ञानं तत् स्वर्गयश आयुषां साधकमित्ययं विभागो ज्ञानस्य द्रष्टव्यः ॥

अथापि भवति ॥ २६ ॥

अयमेवार्थः प्रकृत्या । अन्योऽपि श्लोको भवति, वेदस्याध्ययनाद्धर्मः सम्प्रदानात्तथा श्रुतेः ॥

वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च ॥ २७ ॥

वेदस्य पाठमात्रात्तावद्धर्मो भवति तथा शिष्येभ्यः सम्प्रदानात्। तथा श्रवणात्तथा वर्णपरिज्ञानात्तथाऽक्षरपरिज्ञानात् विभक्तिपरिज्ञानाच्च पदपरिज्ञानाच्चोत्तरोत्तरं धर्मो भवति। इत्येतदेवानुवर्त्तते ॥

चयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः।
द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसंग्रहः॥२८॥

शब्दस्वरूपचिन्तकैस्त्रयोविंशतिः स्वरा अकारादय उक्ताः। द्विचत्वारिंशद्व्यञ्जनानि कादीनि एतावान् वर्णसङ्घातः ॥

तस्मिन् ह्लजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् ॥ २९ ॥

लृकारो दीर्घः प्लुताश्चोक्तवर्जम् ॥ ३० ॥

अधस्तनश्लोकरूपसूत्रेण वर्णानुक्त्वा अधुना ये माध्यन्दिनानाम्नेष्यन्ते वर्णास्तान्निराकर्त्तुमाह। ढकारष्टवर्गीयो डकारश्च तत्प्रकृती ह्लकारो जिह्वामूलीयो य उपध्मानीयश्च नासिक्यश्च एते वर्णा न सन्ति माध्यन्दिनानाम्॥ किमेतावन्त एव नेत्युच्यते। लृकारो दीर्घः। लाजोल्काचौनित्येवमादयो ये पठितास्तान् प्लुतान् वर्जयित्वा अन्ये प्लुता न सन्ति माध्यन्दिनानाम्॥

वर्णदेवताः ॥ ३१ ॥

प्रकृतानां वर्णानां देवता वक्ष्याम इति सूत्रशेषः॥

आग्नेयाः कण्ठ्याः ॥ ३२ ॥

कण्ठस्थाना वर्णा अग्निदेवत्या भवन्ति ॥

नैर्ऋत्या जिह्वामूलीयाः ॥ ३३ ॥

जिह्वामूलस्थाना वर्णा निर्ऋतिदेवत्या भवन्ति ॥

सौम्यास्तालव्याः ॥ ३४ ॥

तालुस्थाना वर्णाः सोमदेवत्या भवन्ति ॥

रौद्रा दन्त्याः ॥ ३५ ॥

दन्तस्थाना वर्णाः रुद्रदेवत्या भवन्ति ॥

ओष्ठ्या आश्विनाः ॥ ३६ ॥

ओष्ठस्थाना वर्णा अश्विदेवत्या भवन्ति ॥

वायव्या मूर्धन्याः ॥ ३७ ॥

मूर्धस्थाना वर्णा वायुदेवत्या भवन्ति ॥

शेषा वैश्वदेवाः ॥ ३८ ॥

एतानि स्थानानि विहाय येऽन्यस्थानजन्या वर्णास्ते वैश्वदेवा भवन्ति । स्पष्टार्थान्येतानि सूत्राणि ॥

तत्समुदायोऽक्षरम् ॥ ३९ ॥

तेषां वर्णानां एकीभावलक्षणः समुदायोऽक्षरं भवति । तद्यथा कखगघङेत्यादि ॥

वर्णो वा ॥ ४० ॥

वर्णसमुदायो वा वर्णो वाऽक्षरमवति । तद्यथा । अग्नाविन्द्रश्च दृत्येवमादि । वर्णसमुदायोऽक्षरं भवति कखगघङ दधा । एवमादि । व्यवस्थितविभाषा चेयम् । स्वरः केवलोऽप्य-

स्वरं भवति। व्यञ्जनसमुदायस्तु स्वरसंहित एवाक्षरं भवति। तथा च प्रतिपादितम्। "स्वरोऽक्षरम्"। "सहाद्यैर्व्यञ्जनैः"। "उत्तरैश्चावसितैः" इति। प्रथमाध्याये एवेति॥

अक्षरसमुदायः पदम्॥ ४१॥

अक्षराणां समुदायः पदं भवति। तद्यथा। इषे त्वा। ऊर्जे। त्वा। (१८अ० १क०) वाजं+। च। मे॥

अक्षरं वा॥ ४२॥

अक्षरं वा पदं भवत्यक्षरसमुदायो वा पदं भवति। (५५अ० ५क०) इन्द्र। आ याहि। (४०अ० ८०क०) यः)। उ। विद्यार्याम्। रताः)। अक्षरसमुदायः पदं भवति। इषे। त्वा। ऊर्जं। त्वा॥

तच्चतुर्धा॥ ४३॥

तदेतत्पदं चतुर्धा भिद्यत इति सूत्रशेषः॥

नामाख्यातोपसर्गनिपाताः॥ ४४॥

नामपदं यथा गौरश्वः पुरुषः हस्तीत्येवमादि। आख्यातपदं यथा पचति पठति गच्छति धावति वल्गतीत्येवमादि। उपसर्गपदं यथा प्र परा आ अभीत्येवमादि। निपातपदं यथा वा च कम् उचित् इत्यादि। नामाख्यातोपसर्गनिपाता इति बहुवचनं पदचतुष्टयापेक्षम्॥

तत्र प्रति विशेषः॥ ४५॥

तत्र च वाक्यपदचतुष्टयं प्रति यो विशेषः स प्रतिपाद्यते वक्ष्यमाणेन सूत्रेणेति वाक्यशेषः॥

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।

सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥४६॥

अथ व्यवस्थया पदचतुष्टयस्य लक्षणं कर्त्तुमाह। क्रिया। कालः। कर्त्ता। सङ्ख्या। उपसर्गे विशेष इत्याख्यातार्थः। तत्र क्रियैव प्रधानमुपसर्गस्तु क्रियाया एव विशेषं करोति। यथा पचतीत्यत्र पाचकः प्रतीयते। पुनः प्रपचतीत्युक्ते आदिकर्त्ता प्रतीयते। एवं गच्छत्यागच्छतीत्यादिषु द्रष्टव्यम्। सत्त्वं धातुः। कारकं विभक्तिरिति नाम्नोऽर्थः। तत्र सत्त्वमेव विशेषतोऽभिधीयते। निपातस्त्वर्थासम्भवे पादपूरणो भवति॥

चतुर्दश निपाता येऽनुदात्तास्तेऽपि सञ्हिताः।
निहन्यते खल्वाख्यातमुपसर्गचतुष्टये ॥ ४७ ॥

एवं नामाख्यातोपसर्गनिपातानामर्थभेदं व्याख्यायाधुना स्वरसंस्कारावपि तत्रोक्तावेवैतौ प्रतिपादयति चतुर्दशेति। चतुर्दश निपाता येऽनुदात्तास्तेऽपि अधस्तात्सञ्हिता एव वा च कमुचिदित्यादिसूत्रेण। निपातग्रहणमुपलक्षणम्। नाम्नामपि स्वरः सूत्रविहित एव। यथा "नो नौ मे मदर्थे त्रिद्व्येकेषु" इत्यादिना। यश्च पदचतुष्टये आख्यातमुक्तं तन्निहन्यते अनुदात्तं भवति उपसर्गादीनां पदानां परभूतम्। उपसर्गे विशेषकृत्। सत्त्वाभिधायकं नाम निपातः पादपूरणः इत्येतन्नामानुपूर्वीमङ्गीकृत्यैतदुक्तम्। निहन्यते खल्वाख्यातमुपसर्गाणां चतुष्टय इति। खलुशब्द उपलक्षणार्थः। उपसर्गाणामपि तत्र स्वरो विहित इति "उपसर्ग उपसर्गे" इत्यादिना। एतदुक्तं भवति। यदधस्तान्मया प्रतिज्ञातं "स्वरसंस्कारयोश्छन्दसि नियमः" इति छन्दः प्रतिपादितमित्यर्थः। अतः छन्दःशास्त्रमिदं शास्त्रमिति कृत्वा आदर्त्तव्यं ग्रिभैः॥

अथ पदगोत्राणि ॥ ४९ ॥

एवं पदचतुष्टयगोत्राणि वक्ष्यन्त इति सूत्रशेषः ॥

भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते।
वासिष्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः॥५०॥

भरद्वाजेन दृष्टमाख्यातं भारद्वाजगोत्रं वा भारद्वाजसगोत्रं वा तथा भृगुणा दृष्टं नाम भार्गवगोत्रं भार्गवसगोत्रं वा तथा वसिष्ठेन दृष्टा उपसर्गा वासिष्ठगोत्रं वासिष्ठसगोत्रं वा तथा काश्यपेन दृष्टा निपाताः काश्यपगोत्राः काश्यपसगोत्रा वा ॥

अथ पददेवताः ॥ ५१ ॥

अथ पदानां देवता वक्ष्यन्त इति सूत्रशेषः ॥

सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते॥
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः॥५२॥

सर्वमाख्यातं सोमदैवत्यम्। सर्वन्नाम वायुदैवत्यम्। अग्निदैवत्या उपसर्गाः। निपाता वरुणदैवत्याः॥

अथ वर्णदेवताः ॥ ५३ ॥

इत्याद्युपासनार्थमुक्तम्। एवं ह्युपासिताः सन्तोऽर्थानभिप्रायापि पुरुषस्य फलप्रदा भवन्ति। यो वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वाऽऽपद्यते प्रमीयते पापीयान् भवतीत्येवमादिदोषेण सम्बध्यते। घृतकुल्या मधुकुल्या इत्येवमादिभिस्तु गुणैः सम्बध्यत एव ॥

इत्याह स्वरसर्ठ॰स्कारप्रतिष्ठापयिता भगवान् कात्यायनः ॥ ५४ ॥

एवं स्वरसंस्कारयोः प्रतिष्ठापयिता भगवान् कात्यायनः इदं शास्त्रमाह ॥

इष्टं इष्टिः ॥ ५५ ॥

इत्युक्तार्थः ॥

इति कात्यायनकृतौ प्रातिशाख्य-
सूत्रेऽष्टमोऽध्यायः ॥

इत्यानन्दपुरवास्तव्यवच्चटसूनुनोव्वटेन कृते माहमोदाख्ये प्रातिशाख्यभाष्येऽष्टमोऽध्यायः समाप्तः ॥

———